(अथ)ज्ञानेन्द्रियपञ्चकं कर्मेन्द्रियपञ्चकं प्राणादिपञ्चकं वियदादिपञ्चकमन्तःकरणचतुष्टयं कामकर्मतमांस्यष्टपुरम् — पैङ्गलो. २।६
ज्ञानेन्द्रियाणि पञ्चैव श्रोत्रत्वग्लोचनादयः — वराहो. १।२
ज्ञानेन्द्रियैःसहबुद्धिर्विज्ञानमयकोशः — पैङ्गलो. २।५
ज्ञानेन्द्रियैःसह मनो मनोमयकोशः — पैङ्गलो. २।५
ज्ञाने परिसमाप्यते — भ.गी. ४।३३
ज्ञानैर्बिभर्ति ज्ञायमानं च पश्येत् — श्वेता. ५।२
ज्ञानोदयात्पुरारब्धं कर्मज्ञानान्न नश्यति। अदत्वास्वफलं लक्ष्यमुद्दिश्योत्सृष्टबाणवत् — अध्यात्मो. ५३
ज्ञेयं वस्तुपरित्यागाद्विलयं याति मानसम् । मानसे विलयं याते कैवल्यमवशिष्यते — शांडि.१।७।२३
ज्ञेयं चाज्ञेयं च विकल्पासहिष्णु तत्सशक्तिकं गजवक्त्रं गजाकारं जगदेवावरुन्धे — ग.शो. ३।३
ज्ञेयं चोक्तं समासतः — भ.गी. १३।१९
ज्ञेयं यत्तत्प्रवक्ष्यामि — भ.गी. १३।१३
ज्ञेयं सर्वप्रतीतं च तज्ज्ञानं मन उच्यते । ज्ञानं ज्ञेयं समं नष्टं नान्यः पन्था द्वितीयकः — शांडि. १।७।२२

ज्ञेयः स नित्यसंन्यासी — भ.गी. ५।३
ज्ञेयोऽसि नियतात्मभिः — भ.गी. ८।२
ज्ञोऽमृतोहुतसंवित्कः शुद्धः संविष्टो निर्विघ्न इममसुनियमेऽनुभूय इहेदं सर्वं दृष्ट्वा.. स प्रपञ्चहीनः.. — नृसिंहो. ३।३

झ

झषाणां मकरश्चास्मि — भ.गी. १०।३१

ण

णकारो भगवान् भवति (नारायणः) — तारसा. १।४

त

त इमेऽवस्थिता युद्धे — भ.गी. १।३३
त इमे सत्याः कामा अनृतापिधानाः — छान्दो. ८।३।१
त इह व्याघ्रो वा सिꣳहो वा वृको वा वराहो वा कीटो वा..यद्यद्भवन्ति तदा भवन्ति [छान्दो. ६।९।३ +६।१०।२
त इह व्रीहियवा ओषधिवनस्पतयस्तिलमाषा इति जायन्ते — छान्दो. ५।१०।६
त ऋषयोऽभवंस्तदृषीणामृषित्वम् — सह्वै. १३
त ऋषीनब्रुवन्–नमोवोऽस्तु भगवतोऽस्मिन्धामनिकेनवःसमर्पयामीति — सह्वै. ११
त एतस्यैव सर्वे रूपमभवन् — बृह. १।५।२१
त एतदेवरूपमभिसंविशन्त्येतस्माद्रूपादुद्यन्ति [छान्दो. ३।६।२+७।२+८।२ +९।२+१०।२
त एतं ब्रह्मयज्ञमपश्यंतमाहरन् — सह्वै. १३
त एतानि सूक्तान्यपश्यन् यद्वा देवहेळनं यद्दीव्यं.. — सह्वै. ११
त एतावन्तो भवन्ति (पशवः) यथाप्रज्ञं हि संभवाः — १ऐत. ३।२।४
त एते सर्व एव समाः सर्वेऽनन्ताः स यो हैतानन्तवत उपास्तेऽन्तवꣳ लोकं जयति — बृह. १।५।१३
त एनं तृप्ता आयुषा तेजसा वचसा श्रिया..ब्रह्मवर्चसेनान्नाद्येनचतर्पयन्ति — सह्वै. १४
त एव पुनरावर्तन्ते तस्मादेते ऋषयः प्रजाकामा दक्षिणं प्रतिपद्यंते — प्रश्नो. १।९
त एव भूमतां प्राप्ताः संशान्ताशेषकिल्बिषाः..येयाता विमनस्कताम् — महो. ५।६०
त एवमेवानुपरिवर्तन्ते — बृह. ६।२।१६
त एवैनमुपमन्त्रयंते ददाम त इति — कौ.उ. २।१,२
त एषु लोकेष्वस्पर्धन्त — बृ. उ. १।३।१
त ऐक्षन्त हन्तैनमासुरं पाप्मानं प्रसाम इति — नृसिंहो. ६।१

त ऐक्षन्तास्माकमेवायं विजयोऽस्माकमेवायं महिमेति — केनो. ३।१
तकारस्तारलक्ष्म्या च वैराजः प्रस्तरः स्मृतः। इकाररूपिणी...महामाया... अव्यक्तस्वरूपा भवतीति सीतेत्युदाहरन्ति — सीतो. २,३
तक्रं क्षीरस्वरूपं चेत्क्वचिन्नित्यं जगद्भवेत् — ते.बिं. ६।८०
तक्ष्णुवन्ति वासीभिः कृण्वति फलीभिर्न हैव शक्नुवत इति — आर्षे. १।२
तच्च कारणमेकं हि न भिन्नं नोभयात्मकम्। भेदः सर्वत्र मिथ्यैव धर्मादेरनिरूपणात्। — पञ्चब्र. ३२
तच्चक्रमध्ये पापपुण्यप्रचोदितो जीवो भ्रमति — शांडि. १।४।४
तच्चक्षुषाऽजिघृक्षत्, तन्नाशक्नोच्चक्षुषा ग्रहीतुम् — २ ऐत. ३।५
तच्च न मुख्योऽस्ति, कोऽयं मुख्य इति च हृदयं मुख्यः.. — प.हं.प. २
तच्च निरतिशयानन्दाखण्डब्रह्मानन्दनिजमूर्त्याकारेण ज्वलति — त्रि.म.ना. १।४
तच्च संस्मृत्य संस्मृत्य — भ.गी. १८।७७
तच्चानन्दसमुद्रमग्ना योगिनो भवन्ति, तदपेक्षया इन्द्रादयःस्वल्पानन्दाः — मं.ब्रा. २।९
तच्चानिर्वाच्यमनिर्देश्यमखण्डानन्दैकरसात्मकं भवति — त्रि.म.ना. १।४
तच्चालौकिकपरमानन्दलक्षणाखण्डामिततेजोराशिर्ज्वलति — त्रि.म.ना. १।४
तच्चित्स्वरूपं निर्विकारमद्वैतं च — पा.शो. ४।२
तच्चेज्जिज्ञास्यसि मावगच्छेति (ब्रह्मतेजः) — अव्यक्तो. २
तच्चेत्त्वं याज्ञवल्क्य सूत्रमविद्वाꣳस्तं चान्तर्यामिणं.. — बृह. ३।७।१

तच्छब्दवर्ज्यैस्त्वंशब्दहीनो वाक्यार्थवर्जितः। क्षराक्षरविहीनो यो नादान्तज्योतिरेव सः — ते.बिं. ५।६
तच्छंयोरावृणीमहे गातुं यज्ञाय गातुं यज्ञपतये दैवी स्वस्तिरस्तु नः [सहवै. २५+ [ऋ. खि. १०।१९१।५ — चित्सु. शां.
तच्छान्तमशब्दमभयमशोकमानन्दं विष्णुसंज्ञितं सर्वापरं धामेति — मैत्रा. ७।३
*तच्छास्त्रं शास्त्रितं चेति पौरुषं द्विविधं मतम्। तत्रोच्छास्त्रमनर्थाय परमार्थाय शास्त्रितम् — मुक्तिको. २।१
तच्छिश्नेनाजिघृक्षत्, तन्नाशक्नोत्.. — २ ऐत. ३।९
तच्छुद्धमप्राप्यं प्राप्यंच ज्ञेयंचाज्ञेयं च — ग.शो. ३।३
तच्छुद्धं तच्छबलम्, ततः प्रकृतिमहत्तत्त्वानि जायन्ते — ग.शो. २।५
तच्छुभ्रं ज्योतिषां ज्योतिस्तद्यदात्मविदो विदुः — मुण्ड. २।२।९
तच्छियो(तच्छिरो)ऽश्रयत, यच्छिरोऽभवत् — १ऐत. १।४।२
तच्छ्रीरित्युपासीत, तद्यश इत्युपासीत — कौ. उ. २।६
तच्छ्रेयो रूपमत्यसृजत — बृह. १।४।११
तच्छ्रोत्रेणाजिघृक्षत्। तन्नाशक्नोच्छ्रोत्रेण ग्रहीतुम् — २ऐत. ३।६
तज्जपाल्लभते पुण्यं नरोरुद्राक्षधारणात् — रु. जा. ६
तज्जापकानां वाक्सिद्धिःश्रीसिद्धिः... — हयग्री. ६
तज्ज्ञः कर्मफलेनान्तस्तथा नायाति रञ्जनम् — अ. पू. ५।९८
तज्ज्ञानप्रवाहाधिरूढेन ज्ञेयम् — मं. ब्रा. २।१
तज्ज्ञानं विद्धि राजसम् — भ. गी.१८।२०
तज्ज्ञानं विद्धि सात्त्विकम्। — भ. गी.१८।२१
तज्ज्ञानेन संसारनिवृत्तिः — मं. ब्रा. १।४
तज्ज्ञानेन हि विजानीहि, य एको देव आत्मशक्तिप्रधानः सर्वज्ञः सर्वेश्वरो भूतान्तरात्मा.. — शाण्डि. २।४
(उत) तटस्थो द्रष्टा तटस्थो न द्रष्टा द्रष्टृत्वाच्च द्रष्टैव — ना. प. ६।६

*'उच्छास्त्रं' इति पाठान्तरं, तदेव साध्विति भाति, तृतीयचरणे तथैवोक्तत्वात्, उकारवाक्येषु तथोल्लेखाच्च। [पृ.९८पं.१०]

तडित्सु शरदभ्रेषु गन्धर्वनगरेषु च। स्थैर्यं येन विनिर्णीतं स विश्वसतु विग्रहे — महो. ३।३२
तण्डुलस्य यथा चर्म यथा ताम्रस्य कालिमा। नश्यति क्रियया विप्र पुरुषस्य तथा मलम्। — महो. ५।१८५
तत उपनिषदः श्रुतय आविर्बभूवुः — गोपीचं. २७
तत उपरि पूर्णचन्द्रमण्डलम् — मं. ब्रा. २।३
तत उपस्थगुदयोन्येतन्मूत्रपुरीषं कस्मादाहारापानसिक्तत्वादनुपचति — निरुक्तो. २।१
तत उ ह बालाकिः समित्पाणिः प्रतिचक्रमे उपायानीति — कौ. उ.४।१८
तत उ हैनं यष्ट्या विचिक्षेप स तत एव समुत्तस्थौ — कौ. उ. ४।१८
(अथ) तत ऊर्ध्व उदेत्य नैवोदेता नास्तमेतैकल एव मध्ये स्थाता — छांदो.३।११।१
तत एकशफमजायत — बृह.१।४।४
(उद्वैव) तत एत्यगदो हैव भवति — छांदो. ३।१६।६
तत एव उदेत्य नैवोदेता (मा. पा.) — छां.उ.३।११।१
तत एव च विस्तारं — भ. गी.१३।३१
तत एव पवमानपावकशुचय आविष्कृतमेतेनास्य यज्ञम् — मैत्रा. ६।३४
तत एव सत्यमात्मानं कुरुते स सत्याभिसन्धः. — छान्दो.६।१६।२
तत एवानृतमात्मानं कुरुते सोऽनृताभिसन्धोऽनृतेनात्मानमन्तर्धाय परशुं तप्तं प्रतिगृह्णाति — छांदो. ६।१६।१
तत एवास्य भयं वीयाय, कस्माद्ध्यभेष्यत् — बृह. १।४।२
तत ओङ्कारमपश्यत्ततो व्याहृतीस्ततो गायत्री, गायत्र्या वेदास्तैरिदमसृजत् — गोपीचं. २७
तत ओषधयोऽन्नं च ततः पिण्डाश्चतुर्विधाः — त्रि. ब्रा. २।५
तत एतन्नामधेयं लेभे (वसिष्ठ इति) — १ऐत. २।४।१
ततश्चतुर्जालं ब्रह्मकोशं प्रणुनेत्.. — मैत्रा. ६।२८
ततश्चतुर्जालं ब्रह्मकोशं भिन्दद्ततः परमाकाशम् — मैत्रा. ६।३८

ततश्च दशमे मासि प्रजायते।
  जातश्च वायुना स्पृष्टो न
  स्मरति जन्ममरणम् (गर्भः) निरुक्तो. १।८
ततश्च महदाद्या ब्रह्मणो महामाया-
  सम्मीलनात् पञ्चभूतेषु गन्ध-
  वती पृथिव्यासीत् गोपीचं. ८
ततश्चन्द्रः प्रजापतिशक्रौ,ततो
  माया (भवति) कामराज. १
ततश्च हृद्देशे महान्तं पुरुषं गजवक्त्रं
  ..श्रीहृत्कं..दृष्ट्वा स्तुवन्तिस्म ग. शो. ४।७
ततश्चाग्रे कोटिसूर्यप्रकाशमानन्द-
  रूपं गजवक्त्रं विलोकयति ग. शो. ३।६
ततश्चात्मानमिति मन्यते स्म। न
  चैवमतः परं किञ्चित् ग. शो. ३।६
ततश्चाधःप्रदेशे दश दिक्षु भ्रमन्तो
  न कश्चित् पश्यन्ति स्म ग. शो. ४।६
ततश्चाप्रमादेन निवसेत्... काश्यां
  लिङ्गरूपिण्याम् भस्मजा. २।१६
ततश्चाहङ्कारादिपञ्चतन्मात्राण्जायन्ते ग. शो. २।५
ततश्चाहतं वासः परिधत्ते
  पाप्मनोपहत्यै भस्मजा. २।२
ततश्चैकादशाहेन लयस्थस्य लयो-
  दयात्। मनसा सहितः सोऽपि
  गंतुमिच्छति दूरतः अमन. १।६१
ततश्चोमिति ध्वनिरभूत्स गजाकारः ग. शो. ४।६
ततस्ततो नियम्यैतत् भ.गी. ६।२६
ततस्तद्वृत्तिनैश्चल्यं कुम्भकः प्राणसं-
  यमः...प्रत्याहारः स विज्ञेयः.. ते.बिं. १।३३
ततस्तस्मान्निर्विशेषमतिनिर्मलंभवति त्रि.म.ना. ४।१
ततस्तादृग्गुणगतं मनो भावयति
  क्षणात्। गन्धतन्मात्रमेतस्मात्.. महो. ५।१५१
ततस्तु तं पश्यते निष्कलं ध्याय-
  मानः (आत्मानं) मुण्ड. ३।१।८
ततस्तुतांपश्यतिनिष्कलांच (ज्ञानेन) गुह्यका. ३७
ततस्तु सम्बभूवासौ यद्गिरामप्य-
  गोचरः। यच्छून्यवादिनां शून्यं.. अ.पू. ३।१९
ततस्तेजोहिरण्मयमण्डलम्। तत्र ब्रह्मा
  चतुर्मुखोऽजायत महो. १।४

ततस्तेमुक्तामामनुविशन्ति विज्ञान-
  मयेनाङ्गेन, न पुनरावर्तन्ते भस्मजा. २।१५
ततस्त्रयोदशाहेनलयेनापि.. सिद्धिं
  लभते चिन्तनादपि अमन. १।६३
ततःकनीयसाएवदेवाज्यायसाअसुराः बृह. १।३।१
ततःकराग्रेणाहङ्कारंसृष्टवान् (गणेशः) ग.शो. ४।२
ततःकण्ठान्तरे योगी समूहन्नाडि-
  सञ्चयम् क्षुरिको. १५
ततःकालवशादेव ह्यात्मज्ञानविवेकतः।
  योगाभ्यासं स्थितश्चरन्... त्रि.ब्रा. २।१८
ततः कालवशादेव प्रारब्धेतु क्षयंगते।
  ब्रह्मप्रणवसन्धानंनादोज्योतिर्मयः
  शिवः। स्वयमाविर्भवेदात्मा.. ना.बिं. २९
ततः कालवशादेवप्रारब्धेतुक्षयंगते।
  वैदेहीं मामकीं मुक्तिं यान्ति... मुक्तिको. १।४
ततः कुरु यतात्मवान् भ.गी. १२।११
ततः कूर्चं व्योम षष्ठस्वरबिन्दु-
  मेलनरूपम् तारोप. ३
ततः कृशवपुःप्रसन्नवदनो..निर्मुक्त-
  रोगजालो जितबिन्दुः पट्वग्नि-
  भवति शांडि. १।७।१४
ततः क्षत्रं बलमोजश्च जातम् चित्यु. ११।९
ततः पक्वकषायेण नूनंविज्ञातवस्तुना।
  शुभोऽप्यसौ त्वया त्याज्यो
  वासनौघो निराश्रिना मुक्तिको. २।३१
ततः पतिश्च पत्नी चाभवतां
  तस्मादिदमर्धबृगलमिव.. बृह. १।४।३
ततः पदं तत्परिमार्गितव्यम् भ.गी. १५।४
ततः पद्मासनं बद्ध्वा समग्रीवोदरः
  सुधीः।...प्राणं घ्राणेन रेचयेत् यो. कुं. १।१२
ततः परतरं शुद्धं व्यापकं निर्मलं
  शिवम्। सदोदितं परं ब्रह्म.. ना.बिं. १७
ततः परमेष्ठी व्यजायत,सोऽभि-
  जिज्ञासत किमेकुलं किमेकृत्यमिति अव्यक्तो. १
ततः परं ब्रह्म परं बृहन्तं यथा
  निकायं सर्वभूतेषु गूढम्।
  ..ईशं तं ज्ञात्वाऽमृता भवन्ति श्वेता. ३।७

ततः परिचयावस्था जायते-
ऽभ्यासयोगतः १यो. त. ८१
ततः पवित्रं परमेश्वराख्यमद्वैत-
रूपं... (आत्मरूपं दृश्यते) पैङ्गलो. ४।११
ततः पीयूषमिव विषं जीर्यते शांडि. १।७।४३
ततः पुण्यवशात्सिद्धो गुरुणा
सहसङ्गतः ।..सत्वरं फलमश्नुते यो.शि. १।१४२
ततः पूर्वापरे व्योम्नि...नारायण-
मनुध्यायेत्स्रवन्तममृतं सदा यो.शि. ५।४३
ततः पृथ्व्यप्तेजोवाय्वाकाशानि
पञ्चमहद्भूतानि जायन्ते ग. शो. २।५
ततः प्रकाशते परं ब्रह्म मेघापाये-
ऽशुमानिव कलिसं.
ततः प्रकृतिमहत्तत्त्वानि जायन्ते ग.शो.२।५
ततः प्रक्षाल्य (हस्तौ) तद्भस्मापः
पुनन्त्विति पिबेत् भस्मजा. १।५
ततः प्रजाः प्रजायन्ते य एवं वेद..
प्रत्यग्ज्योतिष्यात्मन्येव रन्ताऽरम् अव्यक्तो. ७
ततः प्रणतोमायानुकूलेनहृदामह्यमष्टा-
दशार्णस्वरूपं सृष्टये दत्त्वाऽन्तर्हितः गो. पू. ३।८
ततः प्रद्युम्नसंज्ञं मन आसीत् । तस्मा-
दहङ्कारनामाऽनिरुद्धः सङ्कर्षणो. १
ततः प्रवर्तते वाणी स्वच्छया ललिता-
क्षरा । गद्यपद्यात्मकैः शब्दैः... सरस्व. ३३
ततः प्रवेशयामास जनकः शुकमङ्गणे ।
तत्राहानि सप्तैव तथैवावसदुन्मनाः महो. २।२३
ततःप्रवेशयामासजनकोऽन्तःपुराजिरे ।
राजा न दृश्यते तावत्.. महो. २।२४
ततः प्रव्रज्य शुद्धात्मा सञ्चरेद्यत्रकुत्र-
चित् ।..सम्पश्यन्हि जनार्दनम् ना.प. ५।४८
ततः प्रव्रज्याख्यं धृतिदण्डं धनु-
र्गृहीत्वाऽनभिमानमयेन चैवेषुणा.. मैत्रा. ६।२८
ततः प्राणमयो ह्यात्मा विभिन्न-
श्चान्तरः स्थितः । ततो विज्ञान
आत्मा तु..आनन्दमय आत्मा
तु ततोऽन्यः कठरु. २१
ततः प्राणोऽजायत स इन्द्रः बृह. १।५।१२
ततः शङ्खाश्च भेर्यश्च भ. गी. १।१३
ततःशरीरेलघुदीप्तिवह्निवृद्धिनादाभि-
व्यक्तिर्भवति शांडि. १।५।२

ततः शुद्धश्चिदेवाहं व्योमवन्निरु-
पाधिकः । जीवेश्वरादिरूपेण.. वराहो. २।५३
ततः शुद्धःसत्त्वान्तरस्थमचलममृत-
मच्युतं ध्रुवं विष्णुसंज्ञितं
स्वमहिम्नि तिष्ठमानं पश्यति मैत्रा. ६।३८
ततः शुभाशुभकर्माणि सर्वाणि
सवासनानि नश्यंति त्रि.म.ना. ५।५
ततः शष्कवृक्षवन्मूर्च्छानिद्रामय-
निश्श्वासोच्छ्वासाभावान्नष्टद्वन्द्वः
..मनः प्रचारशून्यं परमात्मनि
लीनं भवति मं.ब्रा. ३।२
ततः शून्यं च द्वौ दिवाकरहरौ तदनु
गोत्रभृन्माया... कामरा. १
ततः श्वेतैर्हयैर्युक्ते भ.गी. १।१४
ततः सदाचारप्रवृत्तिर्जायते, सदा-
चारादखिलदुरितक्षयो भवति त्रि.म.ना. ५।४
ततः सद्गुरुकटाक्षमंतःकरणमाकाङ्क्षति त्रि.म.ना. ५।४
ततः संध्यां सकुशोऽहरहरुपासीत भस्मजा. २।३
ततः स्वर्गेषुलोकेषु शरीरत्वायकल्पते कठो. ६।४
ततः सर्वं ततः सर्वं ततः सर्वं जगत्.. ग.शो. २।५
ततः सविलासमूलविद्यासर्वकार्यो-
पाधिसमन्विता..अव्यक्तंविशति त्रि.म.ना. ३।७
ततः स विस्मयाविष्टः भ.गी. ११।१४
ततः संवत्सरस्यान्ते ज्ञानयोगमनु-
त्तमम् । आश्रमत्रयमुत्सृज्यप्राप्तश्च
परमाश्रमम् ना.प. ६।३४
ततः साधननिर्मुक्तः सिद्धो भवति
योगिराट् । तत्स्वं रूपं भवेत्तस्य
विषयो मनसो गिराम् ते.बिं. १।३९
ततः सावरण ब्रह्माण्डं विनाशमेति त्रि.म.ना. ३।५
ततः सुदुर्निरीक्षोऽभवत् (इन्द्रः)
तस्मै विद्यामानुष्टुभीं प्रादात्
प्रजापतिः अव्यक्तो. ८
ततः स्तिमितगम्भीरं न तेजो न तम-
स्ततम् । अनाख्यमनभिव्यक्तं
सत्किञ्चिदवशिष्यते महो. २।६५
ततः स्थावरजङ्गमात्मकंजगद्भविष्यति मुद्गलो. २।५
ततः स्वकार्यान्सर्वप्राणिजीवान्सृष्ट्वा
पश्चात्तयाः प्रादुर्भवन्ति मुद्गलो. २।५

ततः स्वधर्मं कीर्तिं च	भ. गी. २।३३
ततः स्वभवनं यान्ति शापं दत्त्वा सुदारुणम् (पितरः श्राद्धाकर्तारं)	इतिहा. ९३
ततः स्वमनसः स्थैर्यं मनसा विगतैनसा। अहो नु चञ्चलमिदं प्रत्याहृतमपि स्फुटम्	अ. पू. ३।५
तते ब्रह्मघने नित्ये सम्भवन्ति न कल्पिताः। न शोकोऽस्ति न मोहोऽस्ति..न जरास्ति न जन्म वा	महो. ६।१३
ततो गावोऽजायन्त, वडवेतराऽभवत्	बृह. १।४।४
ततोऽङ्गसंविदं स्वच्छां प्रतिभासमुपागताम्। सद्योजातशिशुज्ञानं प्राप्तवान्मुनिपुङ्गवः	अ. पू. ३।१५
ततो जलाद्भयं नास्ति जले मृत्युर्न विद्यते	१ यो. त. ९०
ततो जालन्धरो बन्धः कर्मदुःखौघनाशनः	ध्या. बिं. ७८
ततोऽजावयोऽजायन्त, एवमेव यदिदं किञ्च मिथुनमापिपीलिकाभ्यस्तत्सर्वमसृजत	बृह. १।४।४
ततो दक्षिणहस्तस्य अङ्गुष्ठेनैव पिङ्गलाम्। निरुध्य पूरयेद्वायुमिडयातु शनैः शनैः	१ यो. त. ३६
ततो दुःखतरं नु किम्	भ. गी. २।३६
ततो दृढतरशुद्धसात्त्विकवासनया भक्त्यतिशयो भवति	त्रि. म.ना.५।५
ततो दृढतरा वैष्णवी भक्तिर्जायते	त्रि. म.ना.५।४
ततो दृढशरीरः स्यान्मृत्युस्तस्य न विद्यते। ब्रह्मणः प्रलयेनापि न सीदति महामतिः	१यो. त.१०३
ततो देवः प्रीतो भवति स्वात्मानं दर्शयति [नृ.पू. ४।३६+	रामो. ४।४८
ततो देवा अभवन् परासुरा..	बृह.१।३।७
ततो देवास्तमाविपत्यायानुमेनिरे	अव्यक्तो. ८
ततो देवी स्वात्मानं दर्शयति	आथ. द्वि. २
ततोऽधिकतराभ्यासाद्भूमित्यागश्च जायते। पद्मासनस्थ एवासौ भूमिमुत्सृज्य वर्तते	१यो. त. ५४
ततोऽधिकतराभ्यासाद्धूलमुत्पद्यते बहु। येन भूचरसिद्धिः स्याद्भूचराणां जये क्षमः	१ यो. त. ५८
ततोऽधिकतराभ्यासाद्दार्दुरी स्वेन जायते। यथा च दर्दुरो भाव उत्प्लुत्योत्प्लुत्य गच्छति	१ यो. त.५३
ततो न जपो न माला नासनं न ध्यानावाहनादि	ग.शो. ता.५।६
ततो नवरत्नप्रभामण्डलम्	मं. ब्रा. २।३
ततो निधनपतयेत्रयोविंशज्जुहोति च	बृ. जा. ३।१४
ततो निधनसामान्यादन्तःसामिकानि निधनानि...	संहितो. ३।१
ततो निरात्मकत्वमेति, निरात्मकत्वान्न सुखदुःखभाग्भवति	मैत्रा. ६।२१
ततो नैकञ्चन वेदेति। कतमे त इति ह प्रतीकान्युदाजहार	बृह. ६।२।३
ततोऽन्नमभिजायते। अन्नात्प्राणो मनः सत्यं लोकाः कर्मसु चामृतम्	मुण्ड. १।१।८
ततोऽन्यद्विभक्तं यच्छृणुयाम्	बृह. ४।३।२७
ततोऽन्यद्विभक्तं यजिघ्रेत्	बृह. ४।३।२४
ततोऽन्यद्विभक्तं यद्रसयेत्	बृह. ४।३।२५
ततोऽन्यद्विभक्तं यत्पश्येत्	बृह. ४।३।२३
ततोऽन्यद्विभक्तं यद्वदेत्	बृह.४।३।२६
ततोऽन्यद्विभक्तं यद्विजानीयात्	बृह. ४।३।३०
ततोऽन्यद्विभक्तं यत्स्पृशेत्	बृह. ४।३।२९
ततोऽन्यद्विभक्तं यन्मन्वीत	बृह. ४।३।२८
ततोऽन्यश्चान्तरःस्वतः (विज्ञानात्मा)	कठरु. २१
ततोऽपश्यज्ज्योतिर्मयं श्रियाऽऽलिङ्गितं सुपर्णस्थं.. मृगमुखं नरवपुषं...	अव्यक्तो. ३
ततोऽपिधारणाद्वायोः क्रमेणैव शनैः शनैः। कम्पो भवति देहस्य..	१ यो. त. ५२
ततो ब्रह्मोपदिष्टं वै सच्चिदानन्दलक्षणम्। जीवन्मुक्तः सदा ध्यायन्नित्यस्त्वं विहरिष्यसि	शु. र. ३।१७
ततो ब्राह्मणः संयोगं संयुयुजे, तमादित्यात्पुरुषो भास्करवर्णो निष्क्रान्य स एवं ग्राहयाञ्चकार	इतिहा. १

ततो भवति भारत — भ. गी.१४।३

ततो भवेद्धठावस्था पवनाभ्यास-
तत्परा। प्राणोऽपानो मनो बुद्धि-
र्जीवात्मपरमात्मनोः — १ यो. त. ६५

ततो भूय इव ते तमो य उ विद्याया
रताः। [ईशा. ९ + — बृह.४।४।१०

ततोभूय इवते तमोयउसंभूत्या रताः — ईशा. १२

ततोऽभ्यासपाटवात् सहस्रशः सदा-
ऽमृतधारा वर्षति — पैङ्गलो. ३।३

ततो मदर्पितकर्मणां मदाविष्टचेतसां
मद्रूपता भवति — भस्मजा. २।१५

ततो मध्याह्नार्कमण्डलम् (दृश्यते) — मं. ब्रा. २।३

ततो मनुष्या अजायन्त — बृह. १।४।३

ततो मया नचिकेतश्चितोऽग्निर-
नित्यैर्द्रव्यैः प्राप्तवानस्मि नित्यम् — कठो. २।१०

ततो (अविद्याशबलब्रह्मतः) महत्,
महतोऽहङ्कारः, अहङ्कारात्पञ्च-
तन्मात्राणि — त्रि.म.ना. २।५

ततो मात्रा-श्रुतिर्ज्ञेया
निमिषोन्मेष एव च — योगो. ३५

ततोऽमृतत्वमश्नुते — गोपीचं. ८

ततो मां तत्त्वतो ज्ञात्वा — भ. गी. १८।२५

ततो मे श्रियमावह लोमशां
पशुभिः सह स्वाहा — तैत्ति. १।४।१

ततो यदुत्तरतरं तद्रूपमनामयम्।
य एतद्विदुरमृतास्ते भवन्त्यथेतरे
दुःखमेवापियन्ति — श्वेता. ३।१०

ततो याति परां गतिम् — भ.गी.६।४५
[+१३।२९+१६।२२

ततो यान्त्यधमां गतिम् — भ. गी.१६।२०

ततो युञ्जीत मेधावी..मनः पूर्वं
मनः सर्वं मनस्तस्मान्न लङ्घयेत् — योगो. २।१६

ततो युद्धाय युज्यस्व — भ. गी. २।३८

ततो योगविदमाः समाधि
धर्ममेवं प्राहुः — पैङ्गलो. ३।३

ततो योषाग्नी जायन्ते, लोकान्प्रत्यु-
त्थायिनस्त एवमेवानु परिवर्तन्ते — बृह. ६।२।१६

ततो योऽस्य भगाख्यस्तं
बभिनत्याधि... — कौ. उ. ६।७

ततो रक्तोत्पलाभासं पुरुषायतनं
महत्। तत्र सञ्चारयेत्प्राणा-
नूर्णनाभीव तन्तुना — क्षुरिको. १०

ततो रहस्युपाविष्टः प्रणवं प्लुत-
मात्रया।... जपेत्पूर्वार्जिता-
नां तु पापानां नाशहेतवे — १ यो. त. ६३

ततो रात्रिरजायत (रात्र्यजायत) — महाना. ६।१
[ऋ.अ.८।८।४८=मं.१०।१९०।१
[+ तै. आ. १०।१।१३

ततो वक्ष्यामि ते हितम् — भ. गी. १८।६४

ततो वह्निशिखामण्डलं क्रमाद्दृश्यते — मं. ब्रा. २।३

ततो वायुस्थैर्यम्। तच्चिह्नानि-
आदौ तारवद्दृश्यते, ततो वज्र-
दर्पणम्.. — मं. ब्रा. २।३

ततो विज्ञान आत्मा तु ततोऽन्यश्चा-
न्तरः स्वतः। आनंदमय आत्मा तु
ततोऽन्यश्चान्तरः स्थितः — कठरु. २१

ततो विलीनपाशोऽसौ विमलःकमला-
प्रभुः। तेनैव ब्रह्मभावेन
परमानन्दमश्नुते — ना.बिं. २०

ततो विशुद्धं विमलं विशोकमशेष-
लोभादिनिरस्तसङ्गम्। यत्त-
त्पदं.. तदेव स वासुदेवो.. — गो.पू. ४।३

ततो विष्वङ्(ध्वर) व्यक्रामत् — त्रि.म.ना. ४।४
[पु.सू. ऋ.अ.८।४।१७= — मं. १०।९०.४
[वा.सं. ३१।४ + — चित्यु. १२।२

ततो वै खलु दुर्निष्प्रतनं यो यो
ह्यन्नमत्ति यो रेतः सिञ्चति
तद्भूय एव भवति (मा.पा.) — छां.उ. ५।१०।६

ततो वै गृहीतायां शक्त्यां ब्रह्मणः
सृष्टिरजायत — ग.शो. ३।११

ततो वै ध्यानस्थिता अभू-
वन् (देवाः) — ग.शो. ४।६

ततो वै परस्परमसहमानाश्चोर्ध्वं
जग्मुः (देवत्रयम्) — ग.शो. ४।६

ततो वै भूतेभ्यश्चतुर्दश लोका
जायेरन् — ग.शो. ४।५

ततो वैराग्यमुदेति (भक्त्या) — त्रि.म.ना. ५।४

ततो वै सत्त्वं (विष्णुः) तामा-
द्याय जगत्पाति स्म — ग.शो. ३।१२

ततो वै सदजायत तैत्ति. २।७
ततो वै सृष्टिमचीकरत् (ब्रह्मा) ग.शो. ३।६
ततो वै सोऽहमभूत् । नैकाकिता-
त्युक्तेति गुणान् निर्ममे ग.शो. ३।४
ततो व्यैच्छत् व्येवास्मा उच्छति अव्यक्तो. ६
ततोऽश्वः समभवत्, यदश्वत्तन्मेध्यम-
भूत्, तदेवाश्वमेधस्याश्वमेधत्वम् बृह. १।२।७
ततोऽसंसक्तिनामिका (ज्ञानभूमिः) महो. ५।२५
ततोऽसौ सन्नियोगेन निरालम्बो
भवेद्यदि । तदा समरसीभूतः
परमानन्द एव सः अमन. २।९५
ततो ह बालिशा ऊचुरवात्त वा
संवत्सरमिमे ब्राह्मणाः छाग. ५।१
ततो ह वै तद्रेतस्तदिमाःप्रजाःप्रजायन्ते प्रश्नो. १।१४
ततो ह वै ते देवा रुद्रमपृच्छन्,
ते देवा रुद्रमपश्यन् अ.शिरः. ११
ततो ह वै विदाञ्चकार ब्रह्मेति(मा.पा.) केनो. ४।१
ततोऽहंनामाऽभवत् तस्मादप्येतर्ह्या-
मंत्रितोऽहमयमित्युक्त्वाऽथा-
न्यन्नाम प्रब्रूते बृह. १।४।१
ततो ह्यसुराः पुनरेवोदयन्ति, ते ह
माध्यन्दिनस्यैव सवनस्य
पवमानेषु यज्ञवास्त्वभवन् शौनको. ३।१
ततो ह्यसुराः पराभवन् [शौनको.२।४+ ३।४
ततो हिरण्यगर्भोऽजायत, तस्माद्दश
प्रजापतयो मरीच्यादयः..अजायन्त सङ्कर्षणो. १
ततो हृदयस्थिताः कामाः सर्वे विन-
श्यन्ति तस्माद्धृदयपुण्डरीक-
कर्णिकायांपरमात्माविर्भावोभवति त्रि. म.ना.५।४
ततो हेन्द्रोऽपश्यत्, स ह गायत्रीमेव
प्रतिसन्दिदेश शौनको. १।२
ततो हैव विदाञ्चकार ब्रह्मेति (इन्द्रः) केनो. ४।१
तत्कथमिति अज्ञानप्राबल्यात् त्रि.म.ना. ५।३
तत्कर्म कृत्वा विनिवर्त्य भूय-
स्तत्त्वस्य तत्त्वेन समेत्य योगम् ।
एकेन द्वाभ्यां त्रिभिरष्टभिर्वा..
आत्मगुणैश्च सूक्ष्मैः । आरभ्य कर्माणि श्वेता. ६।३
तत्कर्मणा करोति [बृहज्जा. १।१+ नृ.पू. १।१
तत्कारणशरीरम् (आनंदमयकोशः) पैङ्गलो. २।५
तत्कारणं साङ्ख्ययोगाधिगम्यं ज्ञात्वा
देवं (देवीं) मुच्यते सर्वपाशैः श्वेता.६।१३
[गुह्यका. ७१+ भवसं. २।४८
तत्किं कर्मणि घोरे मां भ.गी. ३।१
तत्कुरुष्व मदर्पणम् भ.गी. ९।२७
तत्केन कमभिवदेत्, तत्केन कं
मन्वीत, तत्केन कं विजानीयात्
येनेदꣳ सर्वꣳ विजानाति, तं
केन विजानीयाद्विज्ञातारम्.. बृह. २।४।१४
तत्केन कं जिघ्रेत्.. तत्कं विजानी-
यात्, येनेदं सर्वꣳ विजानाति, तं
केन विजानीयाद्विज्ञातारं.. बृह.२।४।१४
तत्केन कं पश्येत्तत्केन कं
जिघ्रेत्तत्केन कं रसयेत्... बृह. ४।५।१५
तत्केन कं मन्वीत बृह. २।४।१४
तत्केन कं विजानीयात्, येनेदं
सर्वꣳ विजानाति तं केन
विजानीयाद्विज्ञातारं.. बृह. ४।५।१५
तत्केन कं स्पृशेत्तत्केन कं विजानी-
यात्... बृह. ४।५।१५
तत्कैवल्यपदं विदुः अ. पू.५।१९
तत्तत्कार्यकारणभेदरूपेणांशतत्त्व-
वाचक-वाच्य-स्थानभेद-विषय-
देवताकोशभेद-विभागा भवन्ति त्रि. ब्रा. १।२
तत्क्षामये त्वामहमप्रमेयम् भ. गी.११।४२
तत्क्षेत्रं यच्च यादृक् च भ. गी. १३।४
तत्तज्जन्तुध्वनौ चित्तसंयमात्सर्व-
जन्तुरुतज्ञानं भवति शाण्डि.१।७।५२
तत्तदेवावगच्छ त्वम् भ. गी.१०।४१
तत्तदेवेतरो जनः भ. गी. ३।२१
तत्तत्पदविरक्तस्य....आनन्दः
स्वयं भाति कठ. रु. ३३
तत्तत्प्राधान्येन तत्तद्व्यपदेशः,
वस्तुतस्त्वभेद एव त्रि.म.ना. १।४
तत्तत्प्राप्य शुभाशुभम् भ. गी. २।५७

तत्तत्स्थाने (चित्तस्य) संयमा- तत्तत्सिद्धयो भवन्ति	शांडि.१।७।५२
तत्तदरश्च (तदरश्च) वै ण्यश्चार्णवौ ब्रह्मलोके तृतीयस्यामितो दिवि तदैरं मदीयᳶ सरस्तदश्वत्थः	छां. उ. ८।५।३
तत्तद्देवताग्रहान्वितैः श्रोत्रादि- ज्ञानेन्द्रियैः..जाग्रदवस्था भवति	पैङ्गलो. २।७
तत्तद्ब्रह्ममार्गे सम्यक्सम्पन्नः शुद्ध- मानसः प्राणसन्धारणार्थं.. भैक्ष्य- माचरन्..स परमहंसो नाम	जाबा. ६
तत्तद्रूपमनुप्राप्य	....
तत्तद्वृत्तिव्यापारभेदेन पृथगाचारभेदः	ना.प. ५।१२
तत्तमः खल्वीरितं तमसः संप्रास्रवति	मैत्रा. ५।५
तत्तस्माद्यज्ञोपवीत्येवाधीयीत, याजयेद्यजेत वा	सहवै. १
तत्तस्यैतत्ते यदसावादित्य ओमित्ये- तदक्षरस्य चैतत्तस्मादोमित्यने- नैतदुपासीत	मैत्रा. ६।४
तत्तामसमुदाहृतम् [२२+	भ.गी.१७।१९, १८।२२,३९
तत्तारकं द्विविधं–पूर्वार्धंतारकमुत्तरा- र्धममनस्कं चेति	अद्वयता. ४
तत्तारकं द्विविधं मूर्तितारकममूर्ति- तारकं चेति	अद्वयता. ५
तत्तुर्यातीतचिन्मात्रं स्वमात्रं चिन्तयेऽन्वहम्	तुरीया.शीर्षकं
तत्तृप्यति तस्यानुतृप्तिं तृप्यति प्रजया पशुभिरन्नाद्येन तेजसा ब्रह्म- वर्चसेनेति (मा.पा.)	छां.उ. ५।२०।२
तत्ते कर्म प्रवक्ष्यामि	भ.गी. ४।१६
तत्तेज आत्मचैतन्यरूपं बलमवष्टभ्य गुणैरैक्यं सम्पाद्य.. चिन्तयन् भवेत्	नृसिंहो. ३।४
तत्तेज आपद्य उदस्येति तत्रैत- देव शुङ्गमुत्पतितᳶ सोम्य विजानीहि	छान्दो. ६।८।५
तत्तेज ऐक्षत बहु स्यां प्रजायेयेति	छान्दो. ६।२।३
तत्तेजो विद्धि मामकम्	भ.गी. १५।१२
तत्तेजोऽसृजत, तत्तेज ऐक्षत बहुस्यां..	छान्दो. ६।२।३
तत्ते पदं संग्रहेण प्रवक्ष्ये	भ. गी. ८।११
तत्ते पदं संग्रहेण ब्रवीम्योमित्येतत्	कठो. २।१५
तत्त्रयोदशं प्राणं मनो विज्ञानमिति विज्ञाय तं तपसा द्वादश द्वाद- शानंद इति सैषा दशान्नं न निंद्यात्	तैत्ति. ३।११
तत्त्वैपदं ब्रह्मतत्त्वं स्वमात्रमवशिष्यते	यो. शि.शीर्षं.
तत्त्वग्रामोपायसिद्धं परतत्त्वस्वरूपकम् । शारीरोपनिषद्वेद्यं श्रीरामब्रह्ममेगतिः	शारी.शीर्षं.
तत्त्वचाऽजिघृक्षत्, तन्नाशक्नोत्त्वचा ग्रहीतुम्, स यद्धैनं तत्त्वचाऽग्रहीष्यत्	२ ऐत.३।७
तत्त्वज्ञानं गुहायां निविष्टमज्ञानिकृतं मार्गं सुष्ठु वदन्ति	स्वसंवे. ३
तत्त्वज्ञानं मनोनाशो वासनाक्षय एव च । मिथः कारणतां गत्वा	अ.पू. ४।८१
तत्त्वज्ञानार्थदर्शनम्	भ.गी. १३।१२
तत्त्वज्ञानोदयादूर्ध्वं प्रारब्धं नैव विद्यते	ना. बिं. २२
तत्त्वतश्च शिवः साक्षाच्चिज्जीवश्च स्वतः सदा । चिच्चिदाकारतो भिन्ना न भिन्ना चित्त्वहानितः	रुद्रहृ. ४४
तत्त्वतस्त्वेक एव सन्न्यासः, अज्ञानेना- शक्तिवशात् कर्मलोपश्च.. चातुर्विध्यमुपागतः	ना.प. ५।२
तत्त्वतो जायते यस्य जातं तस्य हि जायते	अद्वैत. २७
तत्त्वतो भिद्यमाने हि मर्त्यताममृतं व्रजेत्	अद्वैत.१९
तत्त्वदृष्ट्या तु नास्त्येव तत्त्वमेवास्ति केवलम् । व्यावहारिकदृष्टिस्तु	पा. ब्र. २४
तत्त्वप्रदीपप्रकाशं स्वात्मानं पश्यन् योगी मत्सायुज्यमवाप्नोति	वासुदे. ५
तत्त्वब्रह्ममार्गे सम्यक्सम्पन्नःशुद्ध- मानसः प्राणसन्धारणार्थं.. विमुक्तो भैक्षमाचरन्..सन्न्यासेन देहत्यागं करोति स परमहंसो नाम	याज्ञव. ३
तत्त्वब्रह्ममार्गे सम्यक् सम्पन्नः... याचिताहारमाहरन्.. समो भूत्वा निर्ममः.. सन्न्यासेनैव देहत्यागं करोति स कृतकृत्यो भवति	ना.प.३।८७

तत्त्वत्रयस्य विज्ञानं... स्वधर्माचरणं ..मन्त्रार्थचिन्तनं श्रवणं कीर्तनम्। एते ते कथिता राजन्पारमैकान्त्य-सिद्धिदाः भवसं.५।१८
तत्त्वमसि श्वेतकेतो [छान्दो.६।८।७+ ६।९।४ —६।१४।३+शु.र.।२।३+ पैङ्गलो. ३।१
तत्त्वमसि, अहं ब्रह्मास्मि, सर्वं खल्विदं ब्रह्म, नेह नानास्ति किञ्चनेत्यादि महावाक्यार्थानुभवज्ञानाद्ब्रह्मैवाहमस्मीति... निरा. ३१
तत्त्वमसि...अहंब्रह्मास्मीत्यनुसन्धानं कुर्यात् पैङ्गलो. ३।१
'तत्त्वमसि' इत्यादिवाक्यविचारः मठाम्ना. ३
तत्त्वमसीत्यभेदवाचकं ये जपन्ति ते शिवसायुज्यमुक्तिभाजो भवन्ति शु.र. ३।५
तत्त्वमसीत्यहं ब्रह्मास्मीति वाक्यार्थविचारः श्रवणं... पैङ्गलो. ३।२
तत्त्वमसीत्यपदेशेन त्वमेवाहमहमेवं त्वमिति तारक...कृतार्थो भवति मं.ब्रा. ३।२
तत्त्वमसीत्येवं सम्भाष्यते। अयमात्मा ब्रह्मेति वा.. बह्वृचो. ४
तत्त्वमस्यादिवाक्यं तु केवलं मुक्तिदं यतः रामर. ५।१५
तत्त्वमस्यादिवाक्यानिब्रह्मणैकतांजगुः पैङ्गलो.२।६
तत्त्वमात्मस्थमज्ञात्वा मूढः शास्त्रेषु मुह्यति अमन. २।१८
तत्त्वमाध्यात्मिकं दृष्ट्वा तत्त्वं दृष्ट्वा तु बाह्यतः। तत्त्वीभूतस्तदा रामस्तत्त्वादप्रच्युतो भवेत् वैतथ्य. ३९
तत्त्वमार्गे यथा दीपो दृश्यते पुरुषोत्तमः २ यो.त. २
तत्त्वमिच्छामि वेदितुम् भ.गी.१८।१
तत्त्ववित्तु महाबाहो भ.गी. ३।१८
तत्त्वस्य तत्त्वेन समेत्य योगम्। श्वेता. ६।३
तत्त्वं पूषन्नपावृणु, सत्यधर्माय दृष्टये। पूषन्नेकर्षे यम-[ईशा. १५+ बृह. ५।१५।१
तत्त्वं तत्सहजस्वभावममलं तेजोऽमनस्के ध्रुवम् अमन. २।७६
तत्त्वं नारायणः परः।..यच्च किञ्चिज्जगत्सर्वं दृश्यते श्रूयतेऽपि वा। अंतर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः महाना.९।४
तत्त्वानीति च तद्विदः वैतथ्य. २०
तत्त्वा यामि ब्रह्मणा वन्दमानस्तदा शास्ते...[वनदु.४३,५६,६८,७९ ऋ.अ.१।२।१५ [=मं.१।२४।११+वा.सं.१८।४९+ तै.आ.२।३।१ [तै.सं.२।१।११।६+
तत्त्वावबोध एवासौ वासनातृणपावकः। प्रोक्तः समाधियोगेन न तु तूष्णीमवस्थितिः महो. ४।१२
तत्त्वाविचारपाशेन बद्धं द्वैतभयातुरम्। उज्जीवयन्निजानन्दे स्वस्वरूपेण संस्थितः द. मू. २०
तत्त्वीभूतस्तदा रामस्तत्त्वादप्रच्युतो भवेत् वैतथ्य. ३९
तत्त्वेनातश्च्यवन्ति ते भ. गी. ९।२४
तत्त्वेव भयं विदुषो भवति तैत्ति. २।७
तत्पतित्वात्पशुपतिः जाबाल्यु. ३
तत्परमरहस्यशिवतत्त्वज्ञानं (शिवसाक्षात्करणं) द.मू. २
तत्परमित्यक्षरं गुह्यम् (ओमित्यक्षरं) सन्ध्यो.२०
तत्परमित्याह, यमेतेनाप्नुवन्ति ग.शो. ३।२
तत्परं ज्योतिरोमिति [यो.शि.६।५६ +यो. चू. ८१
तत्परं नापरं त्यजति। तदेव कपालाष्टकं सन्धाय य एष स्तनइवावलम्बते सेन्द्रयोनिः परब्र. २
तत्परं यच्चित्तं परमात्मानमानन्दयति परब्र. २
तत्परः परमात्मा च श्रीरामः पुरुषोत्तमः तारसा. २।५
तत्परः संयतेन्द्रियः भ.गी. ४।३९
तत्पारेणममानमभूत् (ब्रह्माण्डं) ततः परमेष्ठी व्यजायत अव्यक्तो. १
तत्परिभाषया कामःककारंव्याप्नोति। काम एवेदं तत्तदितिककारोगृह्यते त्रि.ता. १।५
तत्प्रेरणप्रेरितं विषमत्वंप्रयाति(तमः) मैत्रा. ५।५

तत्पर्वते कर्मज्ञानमयीभिर्बहु-
शाखा भवन्ति सीतो. ११
तत्पश्चात्तत्परेणेरितं विषमत्वं प्रयाति मैत्रा. ५।५
तत्पार्श्वे (मनसः) संयमान्नि-
ऋतिलोकज्ञानम् शांडि. १।७।५२
तत्पुरुषस्य विश्वमाजानमग्रे चित्यु. १।३१
तत्पुरुषं पुरुषो निवेश्य नास्य
प्रजा संवत्सरा जायन्ते महो. १।२
तत्पुरुषाद्वायुः, तस्माच्छान्तिः, तस्याः
श्वेतवर्णा सुशीला (गौः),तस्याः
गोमयेन क्षारं जातम् बृ.जा. १।६
तत्पुरुषाय विद्महे चक्रतुण्डाय
धीमहि। तन्नो नंदिः प्रचोदयात् महाना. ३।४
तत्पुरुषाय विद्महे महादेवाय धीमहि।
तन्नो रुद्रः प्रचोदयात् [महाना. ३।२+१०।७
तत्पुरुषाय विद्महे महासेनाय.. तन्नः
षण्मुखःप्रचोदयात् [महाना.३।५+ वनदु.१३३
तत्पुरुषस्य विद्महे सहस्राक्षस्य महा-
देवस्य धीमहि। तन्नो रुद्रः
प्रचोदयात् महाना. ३।१
तत्पुरुषाय विद्महे सुवर्णपक्षाय.. तन्नो
गरुडः.. [महाना. ३।६+ वनदु. १३४
तत्पुरुषाय विद्महे वक्रतुण्डायधीमहि।
तन्नो दंती (दन्तिः) प्रचोदयात् महाना. ३।३+
[वनदु. १३२+ ग.शो. २।१
तत्पुरुषो नादः, बिन्दुरीशानः,
(ओङ्कारस्य) ना.पू.ता. १।३
तत्पुरुषोऽमानवः स एनान्ब्रह्म
गमयति छान्दो.५।१०।२
तत्पूजनं (मानसं) मोक्षफलप्रदम् मं.ब्रा. १।४
तत्पृथ्वीमण्डले क्षीणे वलिरायाति
देहिनाम्। तद्वदापो गणापाये
केशाः स्युः पाण्डुराः क्रमात् वराहो. ५।४
तत्पृष्ठदेशे विदले समन्तान्न्यस्ता सुधा
मानवदष्टयघृष्टया.. १ बिल्वो. ५
तत्प्रज्ञानेत्रं प्रज्ञाने प्रतिष्ठितं, प्रज्ञा-
नेत्रो लोकः, प्रज्ञा प्रतिष्ठा,
प्रज्ञानं ब्रह्म २ ऐत. ५।३

तत्प्रतिबिम्बितं यत्तत्साक्षि चैतन्य-
मासीत् पैङ्गलो. १।२
तत्प्रतिबिम्बितं यत्तदीश्वरचैतन्यमासीत् पैङ्गलो. १।२
तत्प्रतिबिम्बितं यत्तद्विराट्चैतन्यमासीत् पैङ्गलो. १।२
तत्प्रतिबिम्बितं यत्तद्धिरण्यगर्भचैतन्य-
मासीत् पैङ्गलो. १।३
तत्प्रतिष्ठेत्युपासीत तैत्ति. ३।१०।३
तत्प्रथमावरणे पश्चिमे सम्मुखे स्वर्ण-
मण्डपे देवकन्या राधोप. २।१
तत्प्रमार्जनमात्रं तु मोक्षइत्यभिधीयते अ.पू. ४।५६
तत्प्रसादात्परां शान्ति भ.गी.१८।६२
तत्प्राणेनाजिघृक्षत् तन्नाशक्नोत्
प्राणेन ग्रहीतुम् २ ऐत. ३।४
तत्प्राणेषूत्क्रान्तेषु शरीरंश्वयितुमध्रियत बृह. १।२।६
तत्प्राणोऽभिरक्षति शिरोऽन्नमथोमनः अ.शिरः.३।१४
तत्प्राप्तिहेतुज्ञानं च कर्म चोक्तं... भवसं. १।२२
तत्र का परिदेवना भ. गी. २।२८
तत्फलश्रुतिरितितस्योर्ध्वकिं वदामेति बृ. जा. १।४
तत्र को मोहः कः शोकः, एकत्व-
मनुपश्यतः [ईशा. ७+ ना. प. ९।१३
तत्र चक्रं द्वादशारं तेषु विष्णवादि-
मूर्तयः। अहं तत्र स्थितिश्चक्रं
भ्रामयामि स्वमायया त्रि.ब्रा. ६०
तत्र चत्वारः—अकारश्चायुतावयवा-
न्वितः, उकारः सहस्रावयवा-
न्वितः, मकारः शतावयवोपेतो-
ऽर्धमात्राप्रणवोऽनन्तावयवाकारः ना.प. ८।३
तत्र चान्द्रमसं ज्योतिः भ.गी. ८।२५
तत्र तत्र परंब्रह्म सर्वत्र समवस्थितम् पैङ्गलो. ४।२२
तत्र तमोनिवृत्तिः (कुण्डलिन्यां
नाड्यां)तद्दर्शनात् सर्वपाप-
निवृत्तिः मं.ब्रा. १।२
तत्र (अविद्याण्डे) तत्त्वतो
गुणातीतशुद्धसत्त्वमयो लीला-
गृहीत.. मायोपाधिको
नारायण आसीत् त्रि.म.ना. २।५
तत्र तं बुद्धिसंयोगं भ.गी. ६।४३
तत्र ता ऋचस्तदृचां मण्डलं स
ऋचां लोकः महाना. १०।१

तत्र योगरताः केचिन्नैव जानन्ति तारकम् ।.. केचिद्ध्यानविमोहिताः । जपेन केचित्क्लिश्यन्ति नैव जानन्ति तारकम् अमन. १।४
तत्र योनिं कृण्वते न हि ते पूर्वमक्षिपत् श्वेताश्व. २।७
तत्र रक्षांसिपैशाचानचविद्वेष्टियोनरः इतिहा. ६२
तत्र लोका वेदाः शास्त्राणि पुराणानि ..ज्योतींषि शिवशक्तियोगादित्येवं घटना व्यापठ्यते त्रि. ता. १।४
तत्र वषाशङ्कं भवति यां दिशमेवि प्राणस्यैव सम्राट् कामाय बृह. ४।१।३
तत्र विश्व एव जाग्रद्व्यवहारलोपा- न्नाडिमध्यं चरंस्तैजसत्व- मवाप्य...स्वभासा भासयन् यथेप्सितं स्वयं भुङ्क्ते पैङ्गलो. २।७
तत्र (मठे) वेदान्तश्रवणं कुर्वन् योगं समारभेत् शांडि. १।५।१
तत्र वैखानसा अकृष्टपच्यौषधि- वनस्पतिभिः..अग्निपरिचरणं कृत्वा..आत्मानं प्रार्थयन्ते आश्रमो. ३
तत्र श्रीर्विजयो भूतिः भ. गी.१८।७८
तत्र (नाड्यां) सञ्चारयेत्प्राणा- नूर्णनाभीव तन्तुना क्षुरिको. ९
तत्र सत्त्वं निर्मलत्वात् भ. गी. १४।७
तत्र संलीयते संविन्निर्विकल्पं च तिष्ठति । भूयो न वर्तते दुःखे तत्र लब्धपदः पुमान् अ. पू. ४।६९
तत्र सुषुम्ना विश्वधारिणी मोक्षमार्गेति चाचक्षते शांडि. १।४।६
तत्र सूर्योऽग्निर्नाम सूर्यमण्डलाकृतिः सहस्ररश्मिपरिवृत एकऋषि- र्भूत्वा मूर्धनि तिष्ठति प्रा. हो. २।४
तत्र स्थिते मनसि चक्षुर्मध्यगतनील- ज्योतिष्पश्यति । एवं हृदयेऽपि मं. ब्रा. १।३
तत्र स्थिते मनसि चक्षुर्मध्यगत- ज्योतिःस्थलं विलोक्यान्तर्दृष्ट्या निरतिशयं सुखं प्राप्नोति अद्वयता. २
तत्र (राधाकुण्डे)स्नात्वाराधाङ्गंभवति राधोप. २।१
तत्र ह कुरुपाञ्चालानां ब्राह्मणा अभिसमेता बभूवुः बृह. ३।१।१
तत्र हि रामस्य राममूर्तिः प्रद्युम्नस्य प्रद्युम्नमूर्तिः..वनेष्वेवं.. द्वादशमू- र्तयो भवन्ति गोपालो. १।१९
तत्राज्यस्य पर्णमयी जुहूर्भवति भस्मजा. १।२
तत्रादौ हरिसंस्काराः कर्तव्या मोक्षकांक्षिणाम् । अयमेव परोधर्मः प्रधानं सर्वकर्मणाम् भवसं. २।६७
तत्राधस्तनमेकंपादमविद्याशबलंभवति त्रि.म.ना.१।४
तत्रान्योऽन्यत्पश्येदन्योऽन्यज्जिघ्रेत् बृह. ४।३।३१
तत्रापरा तु विद्यैषा ऋग्वेदो यजु- रेव च ।..निरुक्तं छन्द एव च रुद्रहृ. २८
तत्रापश्यत् स्थितान् पार्थः भ. गी. १।२६
तत्रापश्यन्महामायां.. पर्यङ्कस्थां परिचरन्तीमादिदेवं... लक्ष्म्यु. २
तत्रापि दहं गगनं विशोकस्तस्मिन्स्य- दन्तस्तदुपासितव्यम् महाना. ८।१६
तत्रापि साध्यः पवनस्य नाशः षडङ्ग- योगादिनिषेवणेन अमन. २।२८
तत्राप्यविमुक्तमभ्यर्हितम् भस्मजा. २।८
तत्राश्रुबिन्दवो जाता महारुद्राक्ष- वृक्षकाः । स्थावरत्वमनुप्राप्य भक्तानुग्रहकारणात् रु. जा. उ. ३
तत्राष्टदलकेसरमध्ये मणिपीठे सप्तावरणकम् राधोप. १।४
तत्रास्य यथाकामचारो भवति छां. उ.७।१।५ [+७।२।२+—७।७।९।२
तत्राहमासीनः (शिवः रत्नवेदिकायां) ...तारकं शैवं मनुमुपदिशामि भस्मजा.२।१५
तत्रैकनाशादपरप्रवृत्तिर्विध्वस्तयोर्मोक्ष- पदस्य सिद्धिः अमन. २।२८
तत्रैकैकमात्मनो नवांशकं सचारकविधम् मैत्रा. ६।१४
तत्रैकस्थं जगत्कृत्स्नं भ. गी.११।१३
तत्रैकाग्रं मनः कृत्वा भ. गी. ६।१२
तत्रैतच्छुङ्गमुत्पतितं सोम्य विजानीहि छान्दो. ६।८।३
तत्रैतदेव शुङ्गमुत्पतितं सोम्य विजानीहि छान्दो. ६।८।५

तत्रैता देवता आवाह्य द्वादशावर-
णानि कुर्यात् सूर्यता. ५।१
तत्रैव मुक्त्यर्थमुपदिश्यते शैवोऽयं
मन्त्रः पञ्चाक्षरः भस्मजा.२।१५
तत्रैव श्वानो गर्दभा मार्जाराः कृमयश्च
मत एव, न श्वानगर्दभौ.. स्वसंवे. ३
तत्रैव सति कर्तारं भ.गी. १८।१६
तत्रैवाव्यक्तसंज्ञकम् भ. गी. ११।१८
तत्रोद्गातृनास्तावे वोष्यमाणानु-
पोपविवेश छान्दो.१।१०।८
तत्रोन्मदाभिः कान्ताभिर्भोजनैः-
र्भोगसञ्चयैः। जनको अल-
शामास शुकं.. महो. २।२५
(अथ) तत्रोमिति शब्दोऽनेनो-
र्ध्वमुत्क्रान्तोऽशब्दे निधनमेति मैत्रा. ६।२२
तत्सगुणनिर्गुणस्वरूपम्,
तद्वेत्ता विमुक्तः मं. ब्रा. २।१
तत्सङ्कल्पानुसारिणी विविधानन्त-
महामाया शक्तिसंसेवितानन्त-
महामाया... महाविष्णोः.. एतां
महामायां तरन्त्येव ये विष्णुमेव
भजन्ति, नान्ये तरन्ति त्रि.म.ना. ४।९
तत्सत्कुलप्रसूतः पितृमातृविधेयः
पितृसमीपादन्यत्र.. सद्गुरुमा-
साद्य.. विवाह्य...ततः.. वनस्थो
भूत्वा.. सन्न्यस्तुमर्हति ना. प. २।१
तत्सत्यमित्याचक्षते तैत्ति. २।६
(अत्र) तत्सत्यस्य परमं निधानम् मुण्ड. ३।१।६
तत्सत्यं तत्परं पदम् १यो.त. १३६
तत्सत्यं स आत्मा छान्दो.६।८।७
[+६।९।४–६।१६।३
तत्सत्यानृते मिथुनीकरोति।
तयोर्मिथुनात्प्रजायते,भूयान्भवति १ऐत. ३।६।६
तत्सत्त्वमेवेरितं तत्सत्त्वात्सम्प्रास्रवत् मैत्रा. ५।५
(ॐ) तत्सद्भूर्भुवः सुवस्तस्मै
प्रणात्मने नमोनमः गोपालो. २।२

तत् (शैवं व्रतं) समाचरेन्मुमु-
क्षुर्नपुनर्भवाय जाबाल्यु. ७
तत्समासेन मे शृणु भ.गी. १३।४
तत्सर्वगतो नहीदं सर्वम् (आत्मा) नृसिंहो. ५।१
तत्सदाऽऽसीत्तत्समभवत् तदाण्डं
निरवर्तत छान्दो.३।१९।१
तत्सर्वमित्याचक्षते (गाणेशं ब्रह्म) ग.शो. ३।१,१
तत्सर्वं भूतं भव्यं यत्किञ्चिद्दृश्य-
मानं स्थावरजङ्गमं तत्सर्वं कालि-
कातंत्रे ओतं प्रोतं वेद कालिको. ३
तत्सवितुरिति पूर्वेणाध्वना सूर्या-
धश्चंद्रिकां व्यालिख्य.. त्रि.ता. १।११
तत्सवितुर्वरेण्यमित्यसौ वा
आदित्यः सविता मैत्रा. ६।७
तत्सवितुर्वरेण्यमित्यादिद्वात्रिं-
शदक्षरीं पठित्वा तदिति
परमात्मा सदाशिवः.. त्रि.ता. १।१०
(ॐ) तत्सवितुर्वरेण्यं भर्गो देवस्य
धीमहि। धियो यो नः प्रचोदयात् महाना. ११।७
[त्रि.म.ना.७।११ +त्रि.ता.१।१
[ऋ.अ.३।४।१०=मं.३।६२।१० +वा.सं.३।३५
[+तै.सं.१।५।६।४+ साम. २।८१२
तत्सवितुर्वरेण्यं भर्गो देवः क्षीरं
सेचनीयम् त्रि. ता. १।१३
तत्सवितुर्वरेण्यं भर्गोऽस्याभिध्येयं मैत्रा. ६।३४
तत्सवितुर्वृणीमह इत्याचामति छान्दो. ५।२।७
मंत्रः– ऋ.अ. =मं.
[+एत. ब्रा.४।३०।३+ऐत.आ. १५।३।१
[तै.आ. १।११।३
तत्सशक्तिकं गजवक्त्रं गजाकारं
जगदेवावरुन्धे ग.शो. ३।३
तत्संवत्सरमात्रमुषित्वा द्विधाऽकरोत् सुबालो. १।२
तत्संवत्सरस्य मात्रामशयत, तन्निर-
भिद्यत, ते आण्डकपाले रजतं
सुवर्णं चाभवताम् छां.३।१९।१
तत् (मनः) संवत्सरं प्रोष्य पर्येत्यो-
वाच कथमशकतर्ते मज्जीवितु-
मिति छान्दो.५।१।११

तत् (चक्षुः) संवत्सरं प्रोष्य पर्येत्योवाच कथमशकततें मज्जीवितुमिति छान्दो. ५।१।९
तत् (चक्षुः, श्रोत्रं, मनः, रेतः) संवत्सरं प्रोष्यागत्योवाच कथमशकतमदृतेजीवितुमिति [बृह.६।१।९, १०,११,१२
तत् (भस्म) हैमे राजते ताम्रे मृण्मये वा पात्रे निधाय.. अभ्युक्ष्य..संस्थापयेत् भस्मजा. १।३
तत्सायं प्रातः प्रयुञ्जानो पापोऽपापो भवति [नारा.५+देव्यु.२६ महावा. ६
तत्साधने द्वयं मुख्यं सरस्वत्यास्तु चालनम् । प्राणरोधमथाभ्यासादृज्वी कुण्डलिनी भवेत् योगकुं. १।८
तत्सुखं राजसं स्मृतम् भ. गी.१८।३८
तत्सुखं सात्त्विकं प्रोक्तम् भ. गी.१८।३८
तत्सूत्रं विदितं येन स मुमुक्षुः स भिक्षुकः ।..स विप्रः पंक्तिपावनः परब्र. ९
तत्सूर्यो रश्मिभिर्वर्षति, तेनान्नं भवति,अन्नाद्भूतानामुत्पत्तिः मैत्रा. ६।३७
तत्सृष्ट्वा तदेवानुप्राविशत्। तदनुप्रविश्य सच्च त्यच्चाभवत् तैत्ति. २।६
तस्त्रिया आत्मभूयं गच्छति यथा स्वयमङ्गं तथा तस्मादेनां न हिनस्ति २ऐत. ४।२
तत्स्वयं योगसंसिद्धः भ. गी.४।३८
तत्स्वरूपज्ञानां वैदेही मुक्तिश्च भवति हयग्री. ६
तत्स्वरूपध्यानपरा मुनयश्चाकल्पान्ते तस्मिन्नेवात्मनि लीयन्ते अव्यक्तो. ९
तत्स्वरूपात्सृष्टिर्या समुत्पन्ना सा रसिकानन्देन सुसेव्यतां प्राप्ताऽऽसीत् सामर. ३
तथर्षीणां तथा मनुष्याणां तद्धैतत्पश्यन्नृषिर्वामदेवः प्रतिपेदे बृह. १।४।१०
तथाऽक्षरात्सम्भवतीह विश्वम् मुण्ड. १।१।७
तथा यज्ञेक्रियतेऽरण्येगेयंचाधीमहे संहितो. ३।२
तथा चरेत वै योगी सतां धर्ममदूषयन् । जना यथाऽवमन्येरन् गच्छेयुर्नैव सङ्गतिम् ना. प. ५।४२

तथा जन्म भवेत्तेषां पुत्राज्जन्म पितुर्यथा । अ. शां. १५
तथा जाग्रद्द्वयाभासं स्पन्दते मायया मनः अद्वैत. २९
तथा जीवा अमी सर्वे भवन्ति न भवन्ति च (स्वप्नवत्) अ. शां. ६८
तथा ज्ञातं च चैतन्यं फलमित्यभिधीयते कठरु. ४।४४
तथा तज्जाबालोऽब्रवीन्मनो वै ब्रह्मेत्यमनसो हि किꣳ स्यात् बृह. ४।१।६
तथा तत्प्रयोगकल्पः–प्राणायामः प्रत्याहारो ध्यानं धारणा तर्कः समाधिः षडङ्ग इत्युच्यते योगः मैत्रा. ६।१८
तथा तत्स्वामिन इव सर्वज्ञ ईशः पशुपतिः जाबाल्यु. ४
तथा तद्वार्ष्णोऽब्रवीच्चक्षुर्वै ब्रह्मेत्यपश्यतो हि किꣳ स्यात् बृह. ४।१।४
तथा तद्वृत्तिसम्बंधात्प्रमाणमिति कथ्यते कठरु. ४३
तथा तद्भारद्वाजोऽब्रवीच्छ्रोत्रं वै ब्रह्मेत्यशृण्वतो हि किꣳ स्यात् बृह. ४।१।५
तथा तवामी नरलोकवीराः भ.गी. ११।२८
तथा तेनेदमावृतम् भ.गी. ३।३८
तथाऽऽत्ममनसोरैक्यं समाधिरिति कथ्यते वराहो. २।७५
तथाऽऽत्मा नोपलिप्यते भ.गी. १३।३२
तथाऽऽत्मोपाधियोगेन तद्धर्मैर्नैव लिप्यते अध्यात्मो. ५२
तथा त्रैलोक्यवलितं ब्रह्मैकमिह दृश्यताम् महो. ५।५७
तथा देहादिसङ्घातं मोहगुणजालकलितं तद्रज्जुसर्पवत्कल्पितम् निर्वाणो. ३
तथा देहान्तरप्राप्तिः भ.गी. २।१३
तथा द्वादशभिर्वर्षैर्लयस्तस्य निरन्तरम्। व्योमवत्तस्य सिद्धिः स्याद्व्योमतत्त्वमयो भवेत् अमन. १।७८
तथा द्वादशमात्रस्तु प्राणायामो विधीयते योगो. २५

तथाऽऽनन्दमयश्चापि ब्रह्मणोऽन्येन साक्षिणा। सर्वान्तरेण पूर्णश्च ब्रह्म नान्येन केनचित्	कठरु. २४
तथा नस्त्वं तात जानीथा यथा यदहं किञ्च वेद	बृह. ६।२।४
तथा निरंशश्चिद्भावः सर्वगोऽपि न लक्ष्यते। ..सैषा चिदविनाशात्मा स्वात्मेत्यादिकृताभिधा	महो. ५।९९
तथाऽन्तर्ज्योतिरेव यः	भ.गी. ५।२४
तथापि त्वं महाबाहो	भ.गी. २।२६
तथापि दृढता नो चेद्विज्ञानस्य... द्वात्रिंशाख्योपनिषदं समभ्यस्य निवर्तय	मुक्तिको. १।२८
तथा पुरुषप्रयत्नसाध्यवेदान्तश्रवणादिजनितसमाधिना जीवन्मुक्त्यादिलाभो भवति	मुक्तिको. १।२
तथा पूयति वा अन्नमृते प्राणात्	बृह. ५।१२।१
तथाऽऽप्नोति निबोध मे	भ.गी. १८।५०
तथाप्यथर्वणं तेजसा प्रत्याप्याययेन्मंत्राश्च मामभिमुखीभवेयुर्गर्भा इव	२प्रणवो. ४
तथाप्यसिद्धं चेज्ज्ञानं दशोपनिषदंपठ	मुक्तिको.१।२७
तथाप्यानन्दभुक् चेतोमुखः सर्वगतोऽव्ययः। चतुरात्मेश्वरः प्राज्ञस्तृतीयः पादसंज्ञितः(आत्मनः)	ना. प. ५।७
तथा प्रत्यर्थिकृत्याभिमन्त्रयन्त्रादिकिल्बिषैः (मुच्यते)	सूर्यता. १।१४
तथा प्रलीनस्तमसि	भ.गी. १४।१५
तथाप्राणविपत्तौ तु क्षोभमायाति मारुतः। ततो दुःखशतैर्व्याप्तं चित्तं क्षुब्धं भवेन्नृणाम्	यो. शि. ३०
तथा ब्रह्माणमेव विष्णुमेव रुद्रमेव विभक्तांस्त्रीनेवाविभक्तांस्त्रीनेव लिङ्गरूपानेव च सम्पूज्योपचारैः.. चिन्तयन्प्रसेत्	नृसिंहो. ३।४
तथा भवत्यबुद्धानामात्माऽपि मलिनो मलैः	अद्वैत. ८
तथा भ्रान्तैर्द्विधा प्रोक्तो ह्यात्मा जीवेश्वरात्मना	जा. द. १०।४
तथा मनोमयोह्यात्मापूर्णोह्यानमयेनतु	कठरु. २३
तथा मानापमानयोः [भ.गी.६।७	+१२।१८
तथा यूयं (मुनयः) पञ्चपदं जपन्तः श्रीकृष्णं ध्यायन्तःसंसृतिंतरिष्यथ	गो.पू. ४।१६
तथाऽरसं नित्यमगन्धवच्च यत्। अनाद्यनन्तं महतः परं ध्रुवं निचाय्य तन्मृत्युमुखात्प्रमुच्यते	कठो. ३।१५
तथा लोकानकल्पयत् (गणेशः)	ग.शो.ता.३।११
तथा लोकाँऽअकल्पयन् [ऋ.अ.८।४।१९=मं.१०।९०।१४	चित्त्यु.१२।६+ वा.सं.३१।१३
तथा वायुं समारोप्य धारयेच्छिरसि स्थितम्। शिरोरोगा विनश्यंति..	जा. द. ६।३१
तथा विज्ञानवशतः स्वभावः सम्प्रसीदति	महो. ५।६६
तथा विद्वान्नामरूपाद्विमुक्तः परात्परां जगदम्बामुपैति	गुह्यका. ३८
तथा वृत्तिक्षयाच्चित्तं, स्वयोनावुपशाम्यति [मैत्रा.६।३४+	मैत्रे. १।८
तथा शुष्यति वै प्राण ऋतेऽन्नात्	बृह. ५।१२।१
तथा शरीराणि विहाय जीर्णानि	भ. गी. २।२२
तथा सर्वाणि कर्माणि योगी दग्ध्वा लयं व्रजेत्	क्षुरिको. २२
तथा सर्वाणि भूतानि	भ. गी. ९।६
तथा सूक्ष्ममनाकाशमसंस्पृश्यमचाक्षुषम्।.. आत्मानं सच्चिदानन्दमनन्तं ब्रह्म.. (ध्यायेत्)	जा. द. ९।४
तथाऽसौ त्यक्त्वा कुणपं न तत्तादृशं पुराप्राप्नुवन्ति (वह्निगतहविर्यजमानमिव)	भस्मजा. २।७
तथाऽहङ्कारसम्बन्धादेव संसार आत्मनः	वराहो. ३।२०
तथा ह निष्काम्याः सकाम्या भूगोपालचक्रेसप्तपुर्यो भवन्ति	गोपालो.२।१५
तथेतः प्रेत्य भवति स क्रतुं कुर्वीत	छान्दो.३।१४।१
तथेतित ँसमन्तं परिण्यविशन्त	बृह. १।३।१८
तथेति तेभ्य एव प्राण उदगायत्	बृह. १।३।७
तथेति तेभ्यश्चक्षुरुदगायत्, यश्चक्षुषि भोगस्तं देवेभ्य आगायत्, यत्कल्याणं पश्यति	बृह. १।३।४

तथेति तेभ्यः प्राण उदगायत् बृह. १।३।३

तथेति परमेष्ठी वक्तुमुपचक्रमे ॐ मिति ब्रह्मेति ना.प. ८।१

तथेति प्रत्यवोचद्भुसुण्डं वक्ष्यमाणं, किमिति बृ.जा. १।४

तथेति तेभ्यो मन उद्गायत्, यो मनसि भोगस्तं देवेभ्य आगायत् यत्कल्याणं सङ्कल्पयति बृह. १।३।६

तथेति तेभ्यो वागुदगायत्, यो वाचि भोगस्तं देवेभ्य आगाय-यत्कल्याणं वदति बृह. १।३।२

तथेति तेभ्यः श्रोत्रमुदगायत्, यः श्रोत्रे भोगस्तं देवेभ्य आगायद्यत्कल्याण ँ शृणोति बृह. १।३।५

तथेति समुपविविशुः स ह प्रवाहणो जैवलिरुवाच (मा. पा.) छां. उ. १।८।२

तथेन्द्रियकृता दोषा दह्यन्ते प्राण-धारणात् । प्राणायामैर्दहेद्दोषान् अ. पू. ७

तथैव च पितामहाः भ. गी. १।३४

तथैव ज्ञानकर्मभ्यां प्राप्यते ब्रह्म शाश्वतम् । भवसं. १।३३

तथैव नाशाय विशन्ति लोकाः भ.गी. ११।२९

तथैव निम्नगः सोमः शिवशक्तिपदा-स्पदः । शिवश्चोर्ध्वमयः शक्ति-रूर्ध्वशक्तिमयः शिवः । तदित्थं शिव शक्तिभ्यां नाव्याप्तमिह किञ्चन बृ.जा.२।९

तथैव ब्रह्मविच्छ्रेष्ठः सदा ब्रह्मैव नापरः २ आत्मो. २१

तथैव रसशक्तिश्च सोमात्मा चानला-त्मिका । वैद्युदादिमयं तेजो.. मधुरादिमयो रसः बृ.जा. २।३

तथैव रामबीजस्थं जगदेतच्चरा-चरम् । बीजोक्तमुभयार्थत्वं रामनामनि दृश्यते [रामर.५।११+ रा.पू.ता.२।३

तथैव विद्वान् रमते निर्ममो निरहं सुखी । कामान्निष्कामरूपी सञ्चरत्येकचरो मुनिः २ आत्मो. ११

तथैव (शनैः शनैः) सेवितो(वश्यः) वायुरन्यथा हन्ति साधकम् शांडि. १।७।६

तथैवात्मात्मशक्त्यैव स्वात्मन्येवेति लोलताम् । क्षणं स्फुरति सा देवी.. महो. ५।१२०

तथैवाद्वैतपरमानन्दलक्षणपर-ब्रह्मणो मम सर्वाद्वैतमुपपन्नं त्रि.म.ना. ८।१

तथैवान्नमये कोशे कोशास्तिष्ठन्ति चापरे । यथा कोशस्तथा जीवो यथा जीवस्तथा शिवः त्रि.ब्रा.२।१२

तथैवावशो भूयः स्पन्दते छाग. ६।१

तथैवोपाधिविलये ब्रह्मैव ब्रह्मवित्स्वयम् २आत्मो. २

तथैष देवः स्वप्न आनन्दमभियाति वेद एव ज्योतिः परब्र. २

तथो एवैवं विद्वान् सर्वेषां भूतानां प्राणमेव प्रत्यात्मानमभिसं-स्तूय सहैतैः सर्वैरस्माच्छरीरा-दुत्क्रामति कौ. उ. २।१४

तथो एवास्मै सर्वाणि भूतान्य-याचमानायैव बलिं हरन्ति कौ.उ. २।१२

तथो एवैवं विद्वान्सर्वान्पाप्म-नोऽपहत्य सर्वेषां भूतानां श्रैष्ठ्यं स्वाराज्यमाधिपत्यं पर्येति कौ.उ. ४।२०

तथो एवैवं विद्वान् सर्वेषां भूतानां श्रीमत्तमो यशस्वितमस्तेजस्वि-तमो भवति कौ.उ. २।६

तदक्षरं तत्सवितुर्वरेण्यं प्रज्ञा च तस्मा-त्प्रसूता पुराणी [श्वेता.४।१८+ गुह्यका.६१

तदक्षरे परमे व्योमन् महाना. १।२

तदग्निनैव देवेषु ब्रह्माऽभवद्ब्राह्मणो मनुष्येषु क्षत्रियेण क्षत्रियो वैश्येन वैश्यः शूद्रेण शूद्रः बृह. १।४।१५

तदग्रं ब्रह्म चोच्यते यो.चू. ८०

तदण्डमभूद्धैमं,तत्परिणममानमभूत्, ततः परमेष्ठी व्यजायत अव्यक्तो. १

तदण्डं समभवत्, तत्संवत्सरमात्र-मुषित्वा तद्विधाऽकरोत् सुबालो. १।२

तदतितरां सुशोभायमानं ब्रह्मेति पुराविदो वदन्ति सामर. ५५

तदतीता सप्तमी (योगभूमिका) वराहो. ४।१

तद्त्राविद्यया (भयं) मन्यतेऽथ यत्र देव इव राजेवाहमेवेद॰ सर्वोऽस्मीति मन्यते	बृह. ४।३।२०
तद्दितेरदितित्व॰ सर्वस्यैतस्यात्ता भवति	बृह. १।२।५
तदद्वितीयमखण्डार्थं परं ब्रह्म	बह्वृचो. ३
तदधश्चित्तसंयमादग्निलोकज्ञानम्	शांडि. १।७।५२
तदधिकारीनभवेद्यदि गृहस्थप्रार्थनापूर्वकं 'अभयं सर्वभूतेभ्यो' इत्यनेन मंत्रेण वस्त्रमेकं परिगृह्य...	प.हं.प. ६
तदधिष्ठानमात्मानं संज्वाल्य तत्तेज आत्मचैतन्यरूपं बलमवष्टभ्य मात्राभिरोतानुज्ञात्रनुज्ञाविकल्परूपं चिन्तयन् ग्रसेत्	नृसिंहो. ३।४
तदधीना विषयग्रहणबुद्धिः, बुद्ध्या बुद्ध्यति, चित्तेन चेतयत्यहङ्कारेणाहङ्कारीति	ना.प. ६। ४
तदधीनाः कर्मज्ञानवैराग्यप्रवर्तकाः पुरुषास्तदनुकूलाचाराः सन्ति	ना.प. ५।१
तदध्यात्मविद्यया लब्धं (मनःशौचं)	शांडि. १।१।३
तदनन्यत्तद्वेधाऽभूद्धरितमेकं, रक्तमपरम्। तत्र रक्तं यत्पुंसो रूपमभूत्, चरितं तन्मायायाः	अव्यक्तो. १
तदनभ्यर्च्य नाश्नीयात्फलमन्नमन्यद्वा	भस्मजा.२।१०
तदनुकृतिरसौ मानुषी वीणा भवति	२ऐत. २।५।२
तदनु च समतावशात्स्वरूपे परिणमनं महतामचिन्त्यरूपम्	अ.पू. १।५४
तदनु प्रविश्य सच त्यच्चाभवत्..	तैत्ति. २।६
तदनु विषयवासनाविनाशस्तदनु शुभः परमः स्फुटप्रकाशः	अ.पू. १।५४
तदनु सर्वशमप्रमेयमजं शिवं.. परं ब्रह्म आत्मन्येव पश्यमानो.. परं ब्रह्म प्राप्नोति	मं.ब्रा. ३।१
तदन्तरस्य सर्वस्य तदु सर्वस्य बाह्यतः	ईशा. ५
तदन्तरायोः पूषा वर्तते च पयस्विनी, सुषुम्ना पश्चिमे चारे	वराहो. ५।२५
तदन्तर्गतजीवात्मयः स्थूलशरीरैः सह विराडुच्यते	ग.शो.बा.४।५
तदपराजिता पूर्ब्रह्मणः प्रभुविमित॰ हिरण्मयम्	छान्दो.८।५।३
तदपश्यत्तदभवत् प्रजासु	महाना. २६
तदपाणिपादमचक्षुरश्रोत्रमजिह्वमशरीरमग्राह्यमनिर्देश्यम् (ब्रह्म)	शांडि. २।१।२
तदपानेनाजिघृक्षत् तदावयत्	२ऐत. ३।१०
तदपोऽसृजत तस्मात्तत्र क्व च शोचति स्वेदते वा पुरुषस्तेजस एव तद्ध्यापो जायन्ते	छान्दो. ६।२।३
तदभावे सत्यनन्तविरोधो विभाति	त्रि.म.ना.२।३
तदभिद्रुत्य पाप्मनाविध्यन्स यथाश्मानमृत्वा लोष्टो विध्व॰सेत	बृह. १।३।७
तदभिमृशेदनु वा मंत्रयेत 'यन्मेऽद्य रेतः पृथिवीमस्कान्त्सीद्यदोषधी...' (इति मंत्रेण)	बृह. ६।४।५
तदभिव्यक्तिचिह्नानि सिद्धिद्वाराणि मे शृणु..। दृश्यन्ते सूक्ष्मरूपेण सदा युक्तस्य योगिनः	यो.शि. २।१९
तदभेदेन मन्त्राम्रेडनं ज्ञानसाधनं	द. मू. १६
तदभ्यद्रवत्तस्मात्तिरोदधे (यक्षं)	केनो. ३।११
तदभ्यद्रवत्तमभ्यवदत् कोऽसीति	केनो. ३।४,८
तदभ्यन्तरसंस्थाने शुद्धबोधानन्दलक्षणं विभाति	त्रि.म.ना. ५।९
तदभ्यन्तरे अमिततेजोराशिस्तदुपरि ज्वलति, परममङ्गलासनं विराजते	त्रि.म.ना. ५।५
तदभ्यासादखण्डमण्डलाकारज्योतिः	मं. ब्रा. २।२
तदभ्यासान्मनःस्थैर्यं, ततोवायुस्थैर्यस्	मं. ब्रा. २।३
तदमलमरजं तदात्मतत्त्वं	अ.पू. ४।७२
तदमृतमभयमशोकमनन्तं निर्बीजमेवाप्येति	सुबा..९।१-१३
तदमृतमभयमेतद्ब्रह्मेति	छान्दो. ८।८।३
तदरश्च ह वै ण्यश्चार्णवौ ब्रह्मलोके..	छान्दो. ८।५।३
तदर्थं कर्म कौन्तेय	भ.गी. ३।९
तदलक्षणमग्राह्यं यद्ग्राह्यवह्यार्यमचिन्त्यं.. प्रपञ्चोपशमं शिवं शांतमद्वैतं चतुर्थं मन्यन्ते स ब्रह्मप्रणवः	ना.प. ८।२३
तदवस्था जाग्रत्स्वप्नसुषुप्तितुरीयाः	वराहो. ४।१
तदविज्ञेयं तदव्यक्तम् (महातेजः)	अव्यक्तो. २

तदव्ययं तद्भूतयोनिं परि-
प्रश्यन्ति धीराः मुण्ड. १।१।६
तदव्ययीभूतमन्वर्थवाची शब्दो न
व्येति कदाचन २प्रणवो. १४
तदश्वत्थः सोमसवनः छान्दो. ८।५।३
तदस्ति (कर्तव्यं) चेन्न स
तत्त्वविद्भवति पैङ्गलो. ४।९
तदस्मै देवा अभिसन्नवन्तु चित्त्यु. ११।९
[अथर्व.१९।४१।१+तै.सं.५।४।७।३ तै.आ.३।११।९
तदस्य गर्भा अन्वायत्तास्तस्मात्ते
प्रतिहृता नावपद्यन्ते प्रतिहार-
भाजिनो ह्येतस्य साम्नः छान्दो. २।९।६
तदस्य देवा अन्वायत्तास्तस्मात्ते
सत्तमाः प्राजापत्यानामुद्गीथ-
भाजिनो ह्येतस्य साम्नः छान्दो. २।९।५
तदस्य पशवोऽन्वायत्तास्तस्मात्ते
हिंकुर्वन्ति हिंकारभाजिनो.. छान्दो. २।९।२
तदस्य पितरो अन्वायत्तास्तस्माता-
न्निदधाति निधनभाजिनो
ह्येतस्य साम्नः छान्दो.२।९।८
तदस्य प्रज्ञा स्रवति दृतेः पादा-
दिवोदकम्... ....
तदस्य प्रथमं जन्म (गर्भाधानम्) २ ऐत. ४।१
तदस्य मनुष्या अन्वायत्तास्तस्मात्ते
प्रस्तुतिकामाः प्रस्तावभाजिनो.. छांदो. २।९।३
तदस्य रुद्रा अन्वायत्ताः, प्राणा वाव
रुद्राः, एते हीद९ सर्व९ रोदयन्ति छांदो. ३।१६।३
तदस्य रूपं प्रतिचक्षणाय बृह. २।५।१९
तदस्य वयांस्यन्वायत्तानि तस्मात्ता-
न्यन्तरिक्षे ... आदिभाजीनि
ह्येतस्य साम्नः छान्दो. २।९।४
तदस्य वसवोऽन्वायत्ताः, प्राणा वाव
वसवः, एते हीद९ सर्वं ९
वासयन्ति छान्दो.३।१६।१
तदस्य हरति प्रज्ञां भ.गी. २।६७
तदस्यादित्या अन्वायत्ताः प्राणावाव
आदित्याः, एते हीद९सर्वमाददते छान्दो.३।१६।५
तदस्यामृतस्याशरीरस्यात्मनो-
ऽधिष्ठानम् छान्दो. ८।१२।१

तदस्यारण्या अन्वायत्तास्तस्मात्ते
पुरुषं दृष्ट्वा कक्ष९ श्वभ्रमित्यु-
पद्रवन्ति छान्दो. २।९।७
तदस्येदं वाचा तन्त्या नामभि-
र्दामभिः सर्वं सितम् १ऐत. १।६।१
तदहं भक्त्युपहृतं भ.गी. ९।२६
तदा गन्ताऽसि निर्वेदं भ.गी. २।५२
तदाचारवशात्तत्तल्लोकप्राप्तिः ना.प. ५।११
तदा जडान्यपि तानि चेतनवत्स्व-
कर्माणि चक्रिरे (हिरण्यगर्भः) पैङ्गलो. १।५
तदा (प्रलये) जीवाः सर्वे प्रकृतौ
प्रलीयन्ते त्रि. म.ना.३।४
तदाज्यभागावन्तरेणाहुतीः प्रति-
पादयेच्छ्रद्धया हुतम् मुण्ड. १।२।२
तदाज्ञया समष्टथण्डं व्याप्य
तान्यतिष्ठन् पैङ्गलो. १।५
तदाज्ञयाऽहङ्कारसमन्वितो विराट्
स्थूलान्यरक्षत् पैङ्गलो. १।५
तदाण्डं निरवर्तत, तत्संवत्सरस्य
मात्रामशयीत छान्दो. ३।१९।१
तदा(अमनस्केजाते) तत्परमं पदम् मैत्रा. ६।३४।७
तदाऽऽत्मनाऽऽत्मानं दृष्ट्वा
निरात्मा भवति मैत्रा.६।२०
तदात्मनि निरते य उपनिषत्सु
धर्मास्ते मयि सन्तु केनो.शांतिः
तदात्मानमेवावेदहं ब्रह्मास्मीति बृ. उ.१।४।१०
तदात्मानं सृजाम्यहम् भ.गी.४।७
तदात्मानं स्वयमसृजत तैत्ति. २।७
तदात्मान९ स्वयमकुरुत तस्मात्त-
त्सुकृतमुच्यते तैत्ति. २।७
तदा दृष्टिविशेषाश्च त्रिविधान्या-
सनानि च । अन्तःकरणभावश्च
योगिनो नोपयोगिनः अमन. २।३६
तदा देवमविज्ञाय दुःखस्यान्तो
भविष्यति (यदा चर्मवदाकाशं
वेष्टयिष्यन्ति मानवाः) श्वेता.६।२०
तदा न स्मरति जन्ममरणानि, नच
कर्म शुभाशुभं विन्दति गर्भो. १०

तदानीमात्मगोचरा वृत्तयः
समुत्थिता अज्ञाता भवन्ति पैङ्गलो. ३३
तदा पश्चिमाभिमुखप्रकाशः स्फटिक-
धूम्र.. प्रभा दृश्यन्ते मं ब्रा. २।४
तदाग्निर्नैव जायेत कामिन्यालिङ्गि-
तस्य च अमन. १।४२
तदा प्रभामनोबुद्धिशून्यं भवति पैङ्गलो. ४।९
तदा योगमवाप्स्यसि भ. गी. २।५३
तदा विद्वान्पुण्यपापे विहाय परे-
ऽव्यये सर्वमेकीकरोति मैत्रा. ६।१८
तदा सद्गुरुमाश्रित्य चिरकालसेवया
बन्धं मोक्षं कश्चित्प्रयाति पैङ्गलो. २।९
तदासां पाप्मनो विन्यदधात् बृह. १।३।१०
तदाऽसौ परमाकाशरूपो देहव-
तिष्ठति ।.. मरणं नास्ति तस्य वै यो. शि. १।५७
तदाऽस्य सन्मुखे तत्त्वममनस्कं
प्रकाशते । अमनस्के च सञ्जाते
चित्तादिविलयो भवेत् अमन. १।१९
तदाहुरुदक्रमीच्चित्तं, न शृणोति,
न पश्यति, न वाचा वदति कौ. उ. ३।३
तदाहुर्यदनेन रूपेणामुं लोकमभि-
सम्भवती ३ँ १ ऐत. ३।७।२
तदाहुर्यदयमेक इवैव पवतेऽथ
कथमध्यर्ध इति बृह. ३।९।
तदाहुर्निशोचति निपतति
वर्धिष्यति वा छान्दो.७।११।१
तदाहुर्यद्ब्रह्मविद्यया सर्वं भविष्यन्तो
मनुष्या मन्यन्ते बृह. १।४।९
(ॐ) तदाहुः किं तदासीत्तस्मैसहोवाच सुबालो. १।१
तदिच्छाधि यो असि सर्ववित्तगो न
त्वाभवद्ब्रह्मरिषा(रुषा)मयस्त्रि बा. मं. ३
तदितर इतरमभिवदति बृह. ४।५।१५
तदितर इतरं जानाति बृह. २।४।१४
तदितर इतरं जिघ्रति बृह.२।४।१४
तदितर इतरं पश्यति बृह.२।४।१४
तदितर इतरं मनुते [बृह.२।४।१४+ ४।५।१५
तदितर इतर ँ रसयते बृह. ४।५।१५
तदितर इतर ँ विजानाति बृह. ४।५।१५
तदितर इतर ँ शृणोति[बृ.उ.२।४।१४ +४।५।१५
तदितर इतर ँ स्पृशति बृह. ४।५।१५
तदिति तदसौ तेजोमयं तेजोऽग्निर्देवता गायत्रीर. २
तदिति परमात्मा सदाशिवोऽक्षरं
विमलं.. हकाराक्षरं शिवरूपं
निरक्षरमक्षरं व्यालिख्यतइति त्रि. ता. १।१०
†तदिति वा एतस्य महतो
भूतस्य नाम भवति ....
तदिति सोऽथर्ववेदः सन्ध्यो. २०
तदित्थं शिवशक्तिभ्यां नाव्याप्तमिह
किञ्चन बृ. जा. २।१०
तदित्यनभिसन्धाय भ.गी. १७।२५
तदिदमत्र मनः श्लेष्मरेतसः सम्भवति निरुक्तो. १।१
तदिदमन्तरिक्षं प्रजापतेर्द्वितीयाचितिः मैत्रा.६।३३
तदिदमन्तिके दवीयो नेदीय इव
दूरतोनवा अस्यमहिमानं कश्चित्.. आर्षे. ५।४
तदिदमन्नमन्नादमियमेव १ऐत. १।२।७
तदिदमप्येतर्हि नामरूपाभ्यामेव
व्याक्रियते बृह. १।४।७
तदिदमप्येतर्ँ तन्नामरूपाभ्यामेव
व्याक्रियते (पा.) बृ.उ. १।४।७
तदिदमप्येतर्हि य एवं वेदाहं ब्रह्मा-
स्मीति, स इदं सर्वं भवति बृह. १।४।१०
तदिदमस्य सकलनिष्कलं रूपम् शांडि. ३।१।२
तदिदमाप एवेदं वै मूलम् १ऐत. १।८।१
तदिदं ॐ सत्यम् सदानं. १६
तदिदं कर्मकृतमयं पुरुषो ब्रह्मलोकः १ऐत. १।३।१
तदिदं पुरं पुण्डरीकं विज्ञानघनं
तस्मात्तडिदाभमात्रम् नारा. ४
तदिदं लिङ्गं ब्रह्म, तदिदंॐ सत्यम् सदानं. १६
तदिदं योनौ रेतः सिक्तं पुरुषः
संभवति निरुक्तो. २
तदिदं सर्वमाप्नोति, य एवं वेद बृह. १।४।१७
तदिमे मूढा उपजीवन्त्यभिष्वङ्गिणः मैत्रा. ७।१०

† इयं श्रुतिः श्रीमद्भगवद्गीताया नैलकण्ठीयटीकायां ब्रह्मानन्दगिर्याख्याने व्याख्याने वाक्यमीयतत्त्वदीपिकायां च दृश्यते, न स्वसमस्तसंग्रहीतोपनिषत्स्वस्ति ।

तदीक्षणाय स्वाध्यायश्चक्षुर्योग-
स्तथाऽपरः। न मांसचक्षुषा
(द्रष्टुं) दृष्टं.. ब्रह्मभूतः स
शक्येत (?) भवसं. ३।७
तदुक्तमृषिणा—गर्भे नु सन्नन्वेषाम
वेदमहं देवानां जानिमानि विश्वा।..
शतं मा पुरआयतीः...[२ऐत.४।५ ऋ.अ.३।६।१६
[=मं.४।२७।१+ ऐ. आ. २।५।१।१४
तदु तथा न कुर्यादाग्नेयीमेव कुर्यात् जाबा. ४
तदुतापि यत्रैतद्वूलवदनुगृह्णन् सन्द-
ग्धद् अहोरात्रे वर्षति ३ऐत. १।२।१
तदुताप्याहुः साग्निनमुपागादित्यसा-
धुनैतमुपागादित्येव तदाहुः छान्दो. २।१।२
तदुनात्येतिकश्चन, एतद्वैतत् [कठो.४।९ +८५+६।१
तदुपप्रेयाय सर्वजवेन (अग्निः)
तन्न शशाक दग्धुम् (तृणम्) केनो. ३।६
तदुपप्रेयाय सर्वजवेन, तन्न शशाका-
दातुं(वायुः, तृणम्) केनो. ३।१०
तदुपरि कृष्णस्य स्थानं गोकुलाख्यं
माथुरमंडलं महत्पदम् राधोप. १।३
तदुपरि ज्वलति निरतिशयानन्दतेजो-
राशिः त्रि.म.ना. ५।६
तदुपरि सुदर्शनचक्रं त्रिकोटियोजन-
विस्तीर्णम् राधोप. १।३
तदुपायं (ब्रह्मदर्शने) लक्ष्यत्रयाव-
लोकनम् मं. ब्रा. १।२
तदुभयविलक्षणो नारायणः
(कार्यकारणभिन्नः) त्रि.म.ना.२।८
तदु सर्वस्य बाह्यतः—(मा. पा.) ईशा. ५
तदु सर्वस्यास्य बाह्यतः ईशा. ५
तदु ह जमदग्निर्नानुमेने आर्तमिव
वा एष तन्मेने आर्षे. २।१
तदु ह जानश्रुतिः पौत्रायणः षट्
शतानि गवां निष्कमश्वतरीरथं
तदादाय प्रतिचक्रमे छान्दो. ४।२।१
तदु ह न मेने गौतमो यदिदमार्तमिव आर्षे. ६।१
तदु ह पुनरेव जानश्रुतिः पौत्रायणः
सहस्रं गवां.. दुहितरं तदादाय
प्रतिचक्रमे छान्दो. ४।२।३

तदु ह बालाकिर्न विजज्ञौ कौ.उ. ४।१८
तदु ह भारद्वाजो नानुमेने यदि ह
सर्वेत्थेत्थेति आर्षे. ४।१
तदु ह वा एते ब्रह्मवादिनः पूर्वाभि-
मुखाः सन्ध्यायां गायत्रियाभि-
मंत्रिता आप ऊर्ध्वं क्षिपन्ति सहवै. २
तदु ह वसिष्ठो नानुमेने, यदिमा
विस्फूर्जयत एवाभिपद्यन्ते
वीवयन्ति मिथुनं चेति.. आर्षे. ७।१
तदूर्ध्वममन्त्रवदाचरन् क्षौराभ्यङ्ग-
स्नानोर्ध्वपुण्ड्रादिकं विहाय..
देहत्यागं करोति यः सोऽवधूतः तुरीया. ३
तदूर्ध्वमुदसर्पत् ता ऊरू अभवताम् १ऐत. १।४।१
तदेकमजरममृतमभयमोमित्यनुभूय
तस्मिन्निदं सर्वं त्रिशरीरमारोप्य
तन्मयं हि..तदेवेति संहरेदोमिति नृसिंहो. १।२
तदेकममृतमजरमनुभूय तथोमिति ना. प. ८।७
तदेकं वद निश्चित्य भ.गी. ३।२
तदेके प्राजापत्यामेवेष्टिं कुर्वन्ति याज्ञव. १
तदेजति तन्नेजति (मां. पा.) ईशा. ५
तदेजति तन्नैजति तद्दूरे तद्वन्तिके ईशा. ५
तदेतच्चतुष्पाद्ब्रह्म वाक्पादः, प्राणः
पादश्चक्षुः पादः, श्रोत्रं पाद इत्य-
ध्यात्मम् छान्दो.३।१८।२
तदेतच्छ्रीश्च यशश्चेत्युपासीत, श्रीमान्
यशस्वी भवति, य एवं वेद छांदो. ३।१३।२
तदेतच्छ्लोकेऽप्युक्तम् कौ. उ. १।६
तदेतज्जडं मोहात्मकमनन्तमिदं
रूपमस्यास्य व्यञ्जिका नित्य-
निवृत्ताऽपि मूढैरात्मेव दृष्टास्य
सत्त्वमसत्त्वं च दर्शयति नृसिंहो. ९।२
तदेतत्कथितं बीजमविद्याया मया
तव। क्लेशानां च क्षयकरं
योगादन्यत्र विद्यते भवसं. ३।११
तदेतत्कामरूपाख्यं पीठं... यो.शि. ५।८
तदेतत्कीर्तिश्च व्युष्टिश्चेत्युपासीत।
कीर्तिमान्व्युष्टिमान् भवति छांदो. ३।१३।४

तदेतत्कौरुण्डेर्वचनं वेदयन्ते... स गाथादर्शी भवति संहितो. ३।९
तदेतत्तेजोऽन्नाद्यमित्युपासीत, तेजस्व्यन्नादो भवति,य एवं वेद छांदो.३।१३।१
तदेतत्त्रय ँ शिक्षेद्दमं दानं दयामिति बृह. ५।२।३
तदेतत्त्रय ँ सदेकमयमात्मात्मैकः(मा.) बृह. १।६।३
तदेतत्त्रय ँ सदेकमयमात्मो एकः बृह. १।६।३
तदेतदक्षरं जैत्रमभित्वरम् शौनको. १।५
तदेतत्त्रिवृत्त्रिवृदिव वै चक्षुः शुक्लं कृष्णं कनीनिकेति १ ऐत.१।५।३
तदेतत् त्र्यक्षरं सत्यमिति, सइत्येकमक्षरं तीत्येकमक्षरं, यमित्येकमक्षरम् बृह. ५।५।१
 शिरः ॥ पञ्चमे स्रवते तालु षष्ठेऽमृतनि-
 षेवणम् । सप्तमे गूढविज्ञानं परावाचा
 तथाऽष्टमे ॥ अदृयं नवमे देहं दिव्यं
 चक्षुस्तथामलम् । दशमे परमं ब्रह्म
 भवेद्ब्रह्मात्मसन्निधौ (१०नादफलानि) हंसो.८-१०
प्रथमेन तु पिण्डेन कलानां तस्य सम्भवः पिण्डो. ४
प्रथमे दिवसे कार्यं कुम्भकानां चतुष्टयं योगकुं.१।५४
(ॐ) प्रथमे पश्चिमाम्नायाः
 शारदामठः कीटवारीसंप्रदायः मठाम्ना. ३
प्रथमोत्तमे अक्षरे सत्यं मध्यतोऽनृतं
 तदेतदमृतमुभयतः सत्येन परि-
 गृहीतं सत्यभूयमेव भवति बृह. ५।५।१
प्रथमो मूलबन्धस्तु द्वितीयोड्डीयनाभिधः
 (कुम्भकः) [योगकुं. १।४१+ यो.शि.१।१०३
प्रथमौ द्वावहङ्कारावङ्गीकृत्वा त्वलौ-
 किकौ । तृतीयाऽहङ्कृतिस्त्याज्या
 लौकिकी दुःखदायिनी महो. ५।९५
प्रथितः पुरुषोत्तमः भ.गी.१५।१८
प्रदक्षिणमावृत्त्यैतचैतद्यानवेक्षमाणाः
 प्रत्यायन्ति कठरु. २
प्रदक्षिणात्रयं कृत्वा शिवरूपमिति स्फुटम् १ बिल्वो. ८
प्रदद्याच्च गवां हितम् शिवो.७।९२
प्रदुष्यन्ति कुलस्त्रियः भ.गी. १।४१
प्रद्युम्नमग्नौ वाय्वंशे सङ्कर्षणमतः परम्।
 व्योमांशे परमात्मानं वासुदेवं सदा
 स्मरेत् त्रि.ब्रा.२।१४४
प्रद्विषन्तोऽभ्यसूयकाः भ.गी.१६।१८
प्रधानक्षेत्रज्ञपतिर्गुणेशः संसारमोक्ष-
 स्थितिबन्धहेतुः [श्वेता.६।१६+ भवसं.२।४६
प्रधानं प्रकृतिः शक्तिर्नित्या चाविकृति-
 स्तथा । एतानि तस्या नामानि
 विष्णुमाश्रित्य या स्थिता भवसं.२।१४

प्रधानाः प्राणवाहिन्यो भूयस्तासु
 दश स्मृताः यो. चू. १६
प्रनष्टस्ते धनञ्जय (मोहः) १८।७२
प्र नूनं ब्रह्मणस्पतिर्मन्त्रं वदत्युक्थ्यं नृ.पू. २।१३
प्रध्यायितव्यं सर्वमिदं अ.शिखो. ३
प्रपञ्चमखिलं यस्तु ज्ञानाग्नौ जुहुया-
 द्यतिः । आत्मन्यग्नीन्समारोप्य
 सोऽग्निहोत्री महायतिः १सं.सो.२।१००
प्रपञ्चमुक्तचित्तोऽस्मि प्रपञ्चरहितो-
 ऽस्म्यहम् मैत्रे. ३।२०
प्रपञ्चलयः सम्पद्यते प्रपञ्चस्य मनः-
 कल्पितत्वात् मं.ब्रा.२।६
प्रपञ्चवृत्तिपरित्यज्यजीवन्मुक्तोभवेत् सं.सो.२।७९
प्रपञ्चावाङ्मुखः स्वरूपानुसन्धानेन ना.प.५।५४
प्रपञ्चे यदि विद्येत (द्वैतं) निवर्तेत
 न संशयः म.वा.र. ४
प्रपञ्चोऽपि द्विविधः, विद्याप्रपञ्च-
 श्चाविद्याप्रपञ्चश्चेति त्रि.म.ना.३।२
प्रपञ्चोपशमं शिवम् ना.प.८।२३
प्रपञ्चो यदि वक्तव्यः सोऽपि शब्द-
 विवर्जितः ते.बिं.उ.१।२१
प्रपञ्चो यदि विद्येत निवर्तेत न संशयः आगम. १७
(अहो) प्रपञ्चोऽयमनादिसिद्धो भवति सामर.१७
प्रपदाश्च स्फिचश्चैव सर्वाङ्गानि प्रचक्षते गुह्यका.२२
प्रपद्यन्ते नराधमाः भ.गी.७।१५
प्रपद्यन्तेऽन्यदेवताः भ.गी.७।२०
प्रपद्ये शरणं देवीं दुंदुर्गे दुरितं हर देव्यु.२३
प्रपश्यद्भिर्जनार्दन भ.गी.१।३९
प्र पूर्व्ये मनसा वन्दमानः चित्यु.१५।३
प्र प्र यज्ञपतिं तिर चित्यु.११।१२
प्रबुद्धबुद्धेः प्रक्षीणभोगेच्छस्य निरा-
 शिषः । नास्त्यविद्यामलमिति
 प्राज्ञस्तूपदिशेद्गुरुः महो. ५।१०६
प्रबुद्धा यत्र ते, विद्वान्सुषुप्तिं याति
 योगिराट् याज्ञव. २५
प्रबुद्धा वह्नियोगेन मनसा मरुता सह।
 सूचीवद्गात्रमादाय व्रजत्यूर्ध्वं
 सुषुम्नया यो. चू. ३८

प्रबुद्धोऽपि सुषुप्तिस्थः सुषिप्तिस्थः प्रबुद्धवान्	अ-पू.३।१२
प्रबुद्धोऽस्मि प्रबुद्धोऽस्मि दुष्टश्चोरोऽयमात्मनः । मनोनाम निहन्म्येनं मनसाऽस्मि चिरं हृतः	महो. ६।२७
प्रब्रूहि त्वं श्रद्दधानाय मह्यं-(मा.पा.)	कठो. १।१३
प्रभञ्जनमेवाप्येतिय:प्रभञ्जनमेवास्तमेति	सुबालो. ९।८
प्रभवत्यहरागमे	भ. गी. ८।१९
प्रभवन्त्यहरागमे	भ.गी.१८।१८
प्रभवन्त्युग्रकर्माणः	भ.गी. १६।९
प्रभवं न महर्षयः	भ.गी.१०।२
प्रभवः प्रलयस्तथा	भ.गी. ७।६
प्रभवः प्रलयं स्थानं	भ.गी.९।१८
प्रभवः सर्वभावानां सतामिति विनिश्चयः	आगम. ६
प्रभवाप्ययौ हि भूतानां [नृ.पू.४।२+	नृसिंहो. १।४
[+रामो. २।४+	ग.शो. १।४
प्रभामध्यगतं पीतं नानारत्नप्रवेष्टितम्	ध्या. बिं. २७
प्रभाशून्यं मनश्शून्यं बुद्धिशून्यं चिदात्मकम् । अतद्व्यावृत्तिरूपोऽसौ समाधिर्मुनिभावितः	मुक्तिको.२।५५
प्रभाशून्यं मनश्शून्यं बुद्धिशून्यं निरामयम् । सर्वशून्यं निराभासं समाधिरभिधीयते	सौभाग्य. २१
प्रभाऽस्मि शशिसूर्ययोः	भ. गी. ७।८
प्रभीमकर्मा तपसोपविद्धात्	ब्रा. मं. ४
प्रभुरस्मि पुरातनः	ब्र.वि. १००
प्रभुविमितं हिरण्मयं	छांदो.८।५।३
प्रभुं वरेण्यं पितरं महेशं यो ब्रह्माणं विदधाति तस्मै	शरभो. ३
प्रभुः प्रभूणामपिविघ्नराजः सिन्दूरवर्णः पुरुषः पुराणः	हेरम्बो. ९
प्रमंहमाणो बहुला श्रियम्	चित्यु. ११।७
प्रमाणप्रमेयादस्मान्मार्गाद्व्यतिरिक्तोऽयं मार्गो रसात्मकः	सामर. ३
प्रमाथि बलवद्दृढम्	भ.गी. ६।३४
प्रमादमोहौ तमसः	भ.गी.१४।१७
प्रमादात्पतितो भवति	भस्मजा. १।६
प्रमादात्त्यक्त्वा भस्मधारणं न गायत्रीं जपेत्	भस्मजा. १।६
प्रमादालस्यनिद्राभिः	भ.गी. १४।८
प्रमादिनो बहिश्चित्ताः पिशुनाः कलहोत्सुकाः । सन्न्यासिनोऽपि दृश्यन्ते देवसन्दूषिताशयाः	याज्ञव. ५
प्रमादेनापि नान्तर्देवसदनेपुरीषंकुर्यात्	भस्मजा. २।८
प्रमादे सञ्जयत्युत	भ.गी. १४।९
प्रमादो ब्रह्मनिष्ठायां न कर्तव्यः कदाचन । प्रमादो मृत्युरित्याहुर्विद्यायां ब्रह्मवादिनः	अध्यात्मो.१४
प्रमादो मोह एव च	भ.गी.१४।१३
प्रमेयोऽपि प्रमाणतां पृथक्त्वादुपेत्यात्मसम्बोधनार्थं	मैत्रा. ६।१४
प्रमोद उत्तरः पक्षः	तैत्ति. २।५
प्रयतः प्रणवोङ्कारं प्रणवं पुरुषोत्तमम् । ओङ्कारं प्रणवात्मानं तन्मे मनः शिवसङ्कल्पमस्तु	२शिवसं. २१
प्रयताञ्जलिः कवातियङ्ङिमभिमंत्रयेत	सहवै. २२
प्रयत्नाद्यतमानस्तु	भ.गी. ६।४५
प्रयागं हृत्सरोरुहे	जा.द. ४।४९
प्रयाणकाले च कथं	भ. गी. ८।२
प्रयाणकालेऽपि च मां	भ.गी. ७।३०
प्रयाणकाले मनसाऽचलेन	भ.गी. ८।१०
प्रयाता यान्ति तं कालं	भ.गी. ८।२३
प्रयाति शुद्धं परमात्मरूपम्	कैव. २४
प्रयासाय स्वाहा	चित्यु. २०।१
प्रयोजनार्थं रुद्रेण मूर्तिरेका त्रिधा कृता	रुद्रहृ. १५
प्रलपन्विसृजन्गृह्णन्नुन्मिषन्निमिषन्नपि [१ सं. सो. २।४७+	भ. गी. ५।९
प्रलयं याति देहभृत्	भ.गी.१४।१४
प्रलयादिकं श्रूयमाणत्वादनित्यत्वं वदन्त्यन्ये (प्रपञ्चस्य)	त्रि.म.ना.३।२
प्रलयान्तामुपाश्रिताः	भ.गी.१६।११
प्रलयावस्थायां विश्रमणार्थं भगवतो दक्षिणवक्षःस्थले श्रीवत्साकृतिर्भूत्वा विश्राम्यतीति सा योगशक्तिः	सीतो. २६
प्रलये न व्यथन्ति च	भ.गी. १४।२
प्रलये सर्वशून्यं भवति	त्रि.म.ना.३।४

प्रवक्ष्याम्यनसूयवे भ. गी. ९।१
प्रवक्षणा अभिदं पर्वतानां यत्सीमिन्द्रो अकरोद्नीकैः बा. मं. १०
प्रवचत९ सन्धानम् तै.उ. १।३।५
प्रवचनेन प्रशंसया व्युत्थानेन, तमेतं ब्राह्मणाः शुश्रुवांसोऽनूचाना उपलभन्ते सुबालो.९।१४
प्रवदन्ति न पण्डिताः भ. गी. ५।४
प्रवदन्त्यविपश्चितः भ. गी. २।४२
प्रवर्तन्ते विधानोक्ताः भ.गी. १७।२४
प्रवर्तन्तेऽशुचिव्रताः भ.गी. १६।१०
प्रवालमौक्तिकस्फटिकशङ्खरजताष्टापद-चन्दनपुत्रजीविकाब्जे रुद्राक्षाः अ. मा. २
प्रवाहतो नित्यत्वं वदन्ति केचन (प्रपञ्चस्य) त्रि.म.ना.३।२
प्रविचार्य चिरं ज्ञानं मुक्तोऽहमिति मन्यते यो.शि.१।५४
प्रविचार्य चिरं साधु स्वात्मनिश्चय-मासवान् महो. २।२
प्रविभक्तमनेकधा भ.गी. ११।१३
प्रविविक्तभुक् तैजसः [ग.शो.५।६+ रामो.ता. १।२
प्रविविक्तं तु तैजसम् आगम. ४
प्रविवेश ह चक्षुः बृह. ६।१।९
प्रविवेश ह मनः बृह. ६।१।११
प्रविवेश ह रेतः बृह. ६।१।१२
प्रविवेश ह वाक् बृह.६।१।८
प्रविवेश ह श्रोत्रम् बृह. ६।१।१०
प्रविष्णुरस्तु तवसस्तवीयान् [ऋक्सं. ना.पू.ता. ४।५
प्रवृत्तोऽश्वतरीरथो दासीनिष्को-ऽस्यन्नं पश्यसि छांदो.५।१३।२
प्रवृत्तिर्द्विविधा प्रोक्ता मार्जारी चैव वानरी १सं.सो.२।१०२
प्रवृत्तिलक्षणं कर्म ज्ञानं सन्यास-लक्षणम् ना.प.३।६१
प्रवृत्तिं च निवृत्तिं च [भ.गी.१६।७+ १८।३०
प्रवृत्ते शस्त्रसम्पाते भ.गी. १।२०
प्रवृह्यधर्म्यमणुमेनमाप्य—(मा. पा.) कठो. २।१३
प्रबुद्धोऽस्मि प्रबुद्धोऽस्मि प्रसन्नोऽस्मि परोऽस्म्यहम् मैत्रे.उ. ३।१४
प्रवृह्य धर्म्यमणुमेतमाप्य कठो. २।१३
प्रवेपनाय मृत्यवे चित्यु. १५।१
प्रवेष्टुं च परंतप भ.गी.११।५४
प्रव्रजिष्यन्वा अरेऽयमस्मात्स्थानादस्मि बृह. ४।५।२
प्रव्रजेद्ब्रह्मचर्येण प्रव्रजेच्च गृहादपि। वनाद्वा प्रव्रजेद्विद्वानातुरे वाऽथ दुःखितः भवसं. १।२
प्रशस्तगोमयमाहरेत् बृ. जा.३।१
प्रशस्ते कर्मणि तथा भ.गी.१७।२६
प्रशान्तचापलं वीतशोकमस्तसमी-हितम्। मनो मम मुने शान्तं तेन जीवाम्यनामयः अ.पू. ५।६।२
प्रशान्तचित्ताय शमान्विताय मुण्ड.१।२।१३
प्रशान्तमनसं ह्येनं भ.गी. ६।२७
प्रशान्तवृत्तिकं चित्तं परमानन्ददाय-कम्। असम्प्रज्ञातनामाऽयं समाधि-र्योगिनां प्रियः मुक्तिको.२।५४
प्रशान्तसर्वसङ्कल्पं विगताखिल-कौतुकम्। विमताशेषसंरम्भं चिदात्मानं समाश्रय अ.पू. ५।२३
प्रशान्तात्मा विगतभीः भ.गी. ६।१४
प्रशान्तेन्द्रियसङ्घातः शुद्धबुद्धि-समन्वितः। प्राणापानौ ततो जित्वा मनःशत्रून् सुखी भवेत् अमन. २।८६
प्रशान्तोऽहमनन्तोऽहं परिपूर्णश्चिरन्तनः अध्यात्मो.६८
प्रशासितारं सर्वेषामणीयांसमणोरपि। रुक्माभं स्वप्नधीगम्यं विद्यात्तं पुरुषं परम् भवसं. २।४३
प्रश्न-मुण्डक-माण्डूक्याथर्वशिरो-ऽथर्व-शिखाबृहज्जाबालनृसिंहतापनीनारद-परिव्राजक-सीता-शरभ-महानारा-यण-रामरहस्यरामतापनीशांडिल्य-परमहंस-परिव्राजकान्नपूर्णा-सूर्यात्म-पाशुपत-परब्रह्म-त्रिपुरातपन-देवी-भावना-ब्रह्म-जाबाल-गणपतिमहा-वाक्य-गोपालतपन-कृष्ण-हयग्रीव-दत्तात्रेयगारुडानामथर्ववेदगतानां-मेकत्रिंशत्सङ्ख्याकानामुपनिषदां भद्रं कर्णेभिरिति शान्तिः मुक्तिको.१।५७

प्रसक्ताः कामभोगेषु भ.गी.१६।१६
प्रसङ्गेन फलाकाङ्क्षी भ.गी.१८।३४
प्रसन्नचेतसो ह्याशु भ.गी. २।६५
प्रसन्नवदनो जेता धृष्टयष्टकविभूषितः रा.पू.ता.४।८
प्रसन्नं सामवेदाख्यं नानाष्टकसमन्वितम् पं. ब्र. ६
प्रसन्नात्मात्मनि स्थित्वा सुखमक्षयमश्नुते मैत्रे. १।११
प्रसन्नात्माऽऽत्मनि स्थित्वा सुखम-
व्ययमश्नुते [मैत्रा. ६।२०+ ६।३४।४
प्रसन्नोऽस्मि परोऽस्म्यहम् मैत्रे. ३।१४
प्रसन्नोऽहं प्रसन्नोऽहं वरान्वरयेति ग.शो. ३।८
प्रसह्य सङ्कल्पपरम्पराणां सञ्छेदने
सन्ततसावधानः। आलम्बनाशाद-
पचीयमानं शनैः शनैः शान्ति-
मुपैति चेतः अमन. २।६६
प्रसादमधिगच्छति भ.गी. २।६४
प्रसादये त्वामहमीशमीड्यं भ.गी.११।४४
प्रसादाद्ब्रह्मणस्तस्य विष्णोरद्भुतकर्मणः ब्र. वि. २
प्रसादे सर्वदुःखानां भ.गी. २।६५
प्रसार्य भुवि पादौ तु दोर्भ्यामङ्गुष्ठ-
मादरात्। जानूपरि ललाटं तु
पश्चिमं तानमुच्यते त्रि.ब्रा.२।५०
प्रसासहिस्तपसा मा विचक्षे बा. मं. ४
प्रसीद देवेश जगन्निवास भ.गी.११।२५
प्रसीद परमानन्द प्रसीद परमेश्वर।
आधिव्याधिभुजङ्गेन दष्टं मा-
मुद्धर प्रभो गो. पू. ४।१३
प्रसूतेन वै यज्ञेन देवाः स्वर्गं लोकमायन् सहवै. १
प्रसूतो ह वै यज्ञोपवीतिनो यज्ञः सहवै. १
प्रस्तोतर्या देवता प्रस्तावमन्वायत्ता तां
चेदविद्वान् प्रस्तोष्यसि मूर्धा ते
विपतिष्यतीति [छांदो.१।१०।९+ ११।४
प्रस्थानं वृद्धाश्रमं वा गच्छेत् कठश्रु. २०
प्रस्वेदजनको यस्तु प्राणायामेषु
सोऽधमः। प्रस्वेदजननं यस्य प्राणा-
यामस्तु सोऽधमः [जा.द.६।१४+ त्रि.ब्रा.२।१०४
प्रस्वेदः प्रथमः पश्चात्कम्पनं मुनि-
पुङ्गव। उत्थानं च शरीरस्य चिह्न-
मेतज्जितेऽनिले जा.द. ६।४३
प्रस्वेदो जायते पूर्वं मर्दनं तेन कारयेत् १यो.त. ५१

प्र ह षोडशं वर्षं जीवति छांदो.३।१६।७
प्रहसन्निव भारत भ. गी. २।१०
प्रहितां वा अहमध्यात्मं सयोगं
निविष्टं वेद १ ऐत. १।५।२
प्रह्लादश्चास्मि दैत्यानां भ.गी.१०।३०
प्रह्लादिनी प्रज्ञा विश्वभद्रा विलासिनी गायत्रीर. ९
प्राकृतमन्नं त्रिगुणभेदपरिणामत्वान्मह-
दाद्यं विशेषान्तं लिङ्गम् मैत्रा.६।१०
प्राक्कर्मनिर्मितं सर्वमीश्वराधीनमेव वा अक्ष्युप. २५
प्राक्कर्मफलपाकेनावर्तान्तरकीटव-
द्विश्रान्तिं नैव गच्छति पैङ्गलो. २।९
प्राक्तनानि प्रयातानि गताः सर्ग-
परम्पराः। कोटयो ब्रह्मणां याता
भूपा नष्टाः परागवत् वराहो. ३।२२
प्राक्प्रत्यगात्मनो रूपं स्वाम्यं
दास्यमिति स्थितिः भवसं.२।५७
प्राक्शरीरविमोक्षणात् भ.गी. ५।२३
प्रागुत्पत्तेरजं सर्वं तेनासौ कृपणःस्मृतः अद्वैत. १
प्रागुदयान्निर्वर्त्यशौचादिकंततः स्नायात् भस्मजा.२।२
प्राग्दले पुण्यावृत्तिराग्नेय्यां निद्रालस्यौ ना.प. ६।५
प्राग्वोदग्वा ग्रामान्निष्क्रम्य सन्ध्यो. १
प्राङासीनः स्वाध्यायमधीयीत सहवै. १५
प्राङ्मुख उदङ्मुखो वा बद्धशिखो
यज्ञोपवीती...त्रिराचामेत् आचम. १
प्राङ्मुखाश्च सुरा हव्यं पितरश्चाप्युद-
ङ्मुखाः। प्रतिगृह्णन्ति सम्बाध-
मग्निना ब्राह्मणेन च इतिहा. ५१
प्राङ्मुखोऽध्यापयेद्गुरुः शिवो. ७।६३
प्राचीदिक्कला प्रतीची दिक्कला दक्षिणा
दिक्कलोदीची दिक्कलैष वै सोम्य
चतुष्कलः पादो ब्रह्मणः प्रकाश-
वान्नाम छांदो. ४।५।२
प्राचीनयोग्य कं त्वमात्मानमुपास्स इति छां. ५।१३।१
प्राचीनशाल औपमन्यवः सत्ययज्ञः छां. ५।११।१
प्राचीमुदीचीं वा निवर्तयंश्चरेत पात्री
दण्डी युगमात्रावलोकी शाट्याय.१८
प्राजापत्यं आप्रयाणाद्गुरोरपरित्यागी आश्रमो. १
प्राजापत्यमासहस्रसंवत्सरान्तक्रतुनेति
(यजति) मैत्रा. ६।३६

प्राजापत्यं गृहस्थानां वि. पु.
(ततः) प्राजापत्यं रायस्पोषं गौपत्यं
यश्च एतद्रहस्यं सायम्प्रातर्ध्यायेदहोरात्रकृतं पापं नाशयति गोपीचं. ८
प्राजापत्यो हारुणिः सुपर्णेयः प्रजापतिं
पितरमुपससार महाना.१७।१
प्राज्ञरूपा हि पश्यन्ती तुरीयस्य परा मता गान्धर्वो. १
प्राज्ञस्त्वस्वप्ननिद्रया आगम.१४
प्राज्ञः कारणबद्धस्तु द्वौ तौ तुर्ये न
सिद्ध्यतः आगम.११
प्राज्ञः किञ्चन संवेत्ति तुर्यं तत्सर्वदृक् सदा मां.आगम.१२
प्राज्ञः प्रसन्नमधुरो दैन्यादपगताशयः अ.पू.२।३१
प्राज्ञात्मकस्तु भरतो मकाराक्षरसम्भवः । अर्धमात्रात्मको
रामो ब्रह्मानन्दैकविग्रहः रामो.ता.१।४
प्राज्ञात्मकोऽनिरुद्धोऽसौ मकाराक्षरसम्भवः । अर्धमात्रात्मकः कृष्णो
यस्मिन्विश्वं प्रतिष्ठितम् गोपालो.२।६
प्राज्ञास्तु पुरुषार्थेन पदमुत्तममागताः भवसं. १।४४
प्राज्ञेनात्मनापोज्झितो..न चैत्यपि
न श्वस(सि)त्यपि...शिवा
जिघत्सन्निति छाग. ६।३
प्राज्ञो मकार इत्येवं परिपश्येत्क्रमेण तु अक्ष्युप. ४७
प्राज्ञो मकारसम्भूता तार्तीया च
तृतीयका श्रीवि.ता.१।४
प्राज्ञोऽविच्छिन्नः पारमार्थिकः सुषुप्त्यभिमानीति प्राज्ञस्य नाम भवति पैङ्गलो. २।६
प्राञ्चः प्रत्यञ्चोऽहम् अशिर. १
प्राण आकाशो द्यौर्विद्युदिति छां. ४।१३।१
प्राण आचार्यः प्राणो ब्राह्मणः छां. ७।१५।१
प्राण आद्यो हृदि स्थाने अपानस्तु
गुदे । समानो नाभिदेशे तु
उदानः कण्ठमाश्रितः । व्यानः
सर्वेषु चाङ्गेषु व्याप्य तिष्ठति सर्वदा अ.ना. ३५
प्राण इति होवाच। सर्वाणि ह वा इमानि
भूतानि प्राणमेवाभिसंविशन्ति छां.१।११।५
प्राण इति प्राणविदो भूतानीति च
तद्विदः वैतथ्यप्र.२०

प्राण उक्थमित्येव विद्यात् १ऐत.१।४।६
(अथ ह) प्राण उत्क्रमिष्यन् यथा
महासुहयः सैन्धवः पड्वीशशङ्कून्
संवृहेदेवᳪ हैवेमान्प्राणान्संववर्ह बृह. ६।१।१३
प्राण उदक्रामत्तत्प्राण उत्क्रान्तेऽपद्यत १ऐत. १।४।४
प्राण उद्गाता (यज्ञस्य) महाना.१८।१
प्राण ऋच इत्येव विद्यात् १ऐत.२।२।११
प्राण एवं तद्भूत्वाऽवति बृह.१।५।१०
(अथ खलु) प्राण एव प्रज्ञात्मेदं
शरीरं परिगृह्योत्थापयति कौ. त. ३।३
प्राण एव ब्रह्मणश्चतुर्थः पादः छां. ३।१८।४
प्राण एव सम्राडिति होवाच बृह.४।१।२४
प्राण एवामृतम् ...
प्राण एवायतनमाकाशः प्रतिष्ठा बृह. ४।१।२
प्राणकर्माणि चापरे भ.गी.४।२७
प्राणक्षयसमीपस्थमपानोदयकोटिगम् । अपानप्राणयोरैक्यं
चिदात्मानं समाश्रय अ.पू.५।३०
प्राणदेवताश्चत्वारः परब्र. १
प्राणदेवतास्ताः सर्वा नाड्यः ब्रह्मो. १
प्राणन्तः प्राणेन [छांदो.५।१।८, ९,१०,११
[+बृ.उ.६।१।८,९,१०,११,१२
प्राणबन्धनᳪ हि सोम्य मनः छांदो.६।८।२
प्राणभृत्सु त्वेवाविस्तरामात्मा, तेषु हि
रसो दृश्यते १ऐत.३।२।२
प्राणमनूत्क्रामन्तᳪ सर्वे प्राणा
अनूत्क्रामन्ति बृह.४।४।२
प्राणमन्नेनाप्यायस्व । श्रद्धायामपाने
निविश्यामृतᳪ हुतम् महाना.१६।४
प्राणमभ्युज्जिहते सैषा देवता प्रस्तावमन्वायत्ता छांदो.१।११।५
प्राणमय इन्द्रियात्मा मनोमयः
सङ्कल्पात्मा सुबालो.५।१९
प्राणमयश्चक्षुर्मयः (आत्मा) बृह. ४।४।५
प्राणमुख्यत्वेन पञ्चविधोऽस्ति भावनो. ६
प्राणमेवाप्येति यः प्राणमेवास्तमेति सुबालो.९।२
प्राणमेवैतया करोति याज्ञव. १

प्राणयात्रानिमित्तं च व्यङ्गारे भुक्त-
बज्जने । काले प्रशस्ते वर्णानां
भिक्षार्थं पर्यटेद्गृहान् ना.प.५।२०
प्राणयात्रिकमात्रः स्यान्मात्रासङ्गा-
द्विनिर्गतः ना.प.५।१८
प्राणलिङ्गिनां शुद्धसिद्धिर्न भवति रुद्रोप. २
प्राणलिङ्गी शिवरूपः रुद्रोप. २
प्राणवत्वान्महेश्वरत्वाच्च शिवस्तदेव गुरुः रुद्रोप. ३
प्राणवायोस्तु संरोधात्प्राणायामस्तु
पठ्यते योगो.३०
प्राणश्च देहगो वायुरायामः कुम्भकःस्मृतः योगकुं.१।१९
प्राणश्च निवारयितव्यं च प्रश्नो.४।८
प्राणश्च मे भूयात् चित्यु.७।२
प्राणश्चित्तेन संयुक्तः परमात्मनि तिष्ठति जा.द.६।१७
प्राणसन्धारणार्थं यथोक्तकाले विमुक्तो
भैक्षमाचरन्नुदरमात्रसंग्रहः याज्ञव. ३
प्राणसन्धारणार्थं यथोक्तकाले विमुक्तो
भैक्षमाचरन् ... सन्न्यासेन
देहत्यागं करोति स परमहंसः जावा. ६
प्राणसन्धारणार्थं यथोक्तकाले करपात्रे-
णान्येन याचिताहारमाहरन्...
देहत्यागं करोति स कृतकृत्यः ना. प.३।८७
प्राणसंज्ञस्तथाऽपानः पूज्यः प्राण-
स्तयोर्मुने जा.द.४।२५
प्राणसंज्ञो मुनिश्रेष्ठ मूर्धानं प्राविशद्यदा ।
तदन्त्यं विषुवं प्रोक्तं जा.द.४।४४
प्राणसंयमनं चैव प्रत्याहारश्च धारणा ।
आत्मध्यानं समाधिश्च प्रोक्तान्य-
ङ्गानि वै क्रमात् ते.बिं. १।१६
प्राणसंयमनेनैव ज्ञानान्मुक्तो भविष्यति जा.द.६।१२
प्राणसंशितमसीति तत्रैते द्वे ऋचौ भवतः छांदो.३।१७।६
प्राणस्त उदक्रमिष्यद्यन्मां नागमिष्य इति छांदो.५।१४।२
प्राणस्तेजसा युक्त सहात्मना यथा-
संकल्पितं लोकं नयति प्रश्नो. ३।१०
प्राणस्तेजोमयोऽमृतमयः पुरुषोऽयमेव बृह.२।५।४
प्राणस्त्वं प्राप्य सर्वाणि भूतानि १ऐत.२।३।४
प्राणस्त्वा वशो ह्यस्यतीत्येनं ब्रूयात् २ऐत. १।४।१
प्राणस्त्वैष आत्मन इति होवाच छां. ५।१४।२
प्राणस्पन्दजये यत्नः कर्तव्यो
धीमतोत्तकैः अ.पू.४।८९
प्राणस्य प्राणमुत चक्षुषश्चक्षुरुत श्रोत्रस्य
श्रोत्रं मनसो ये मनो विदुः बृह.४।४।१८
प्राणस्य का गतिरित्यन्नमिति होवाच छांदो.१।८।४
प्राणस्य च मे प्राणो भूयात् चित्यु.७।३
प्राणस्य रूपं स्पर्शाः, अपानस्योष्माणः,
व्यानस्य स्वराः ३ऐत.२।५।१
प्राणस्य वै सम्राट्, कामाय याज्यं
याजयति बृह.४।१।३,३
प्राणस्य शोधयेन्मार्गं रेचपूरककुम्भकैः यो.शि.५।३७
प्राणस्य ह्यन्नपानमेता अपियन्ति १ऐत. ३।३।३
प्राणस्येदं वशेसर्वं त्रिदिवे यत्प्रतिष्ठितम् प्रश्नो.२।१३
प्राणस्यैतद्वशे सर्वं–(मा. पा.) प्रश्नो. २।१३
प्राणस्यैव सम्राट् कामाय बृह.४।१।३
प्राणस्योत्क्रमणासन्नकालस्त्वातुरसंज्ञकः ना.प.३।५
प्राणं गच्छ स्वाहेत्येवमेवैतदाह जावा. ४
प्राणं च हास्मै तदाकाशं चोचुः छां.४।१०।५
प्राणं चेदिडया पिबेन्नियमितं भूयो-
ऽन्यथा रेचयेत् ।...शुद्धा नाडिगणा
भवन्ति यमिनो मासद्वयादूर्ध्वतः यो.चू. ९८
प्राणं तदा वाचि जुहोति यावद्वै
पुरुषः प्राणिति कौ. त. २।५
प्राणं ते मयि जुहोम्यसौ स्वाहा कौ.त. २।४
प्राणं ते मयि दध इति पुत्रः कौ.त.२।१५
प्राणं देवा अनुप्राणन्ति । मनुष्याः
पशवश्च ये तैत्ति. २।३
प्राणं प्रपद्येऽमुनाऽमुनाऽमुना छांदो.३।१५।३
प्राणं प्रयन्त्यभिसंविशन्ति तैत्ति. ३।३
प्राणं प्रागिडया पिबेन्नियमितं भूयोन्य-
था रेचयेत्पीत्वा पिङ्गलया समीरण-
मथो बद्ध्वा त्यजेद्वामया । सूर्या-
चन्द्रमसोरनेन विधिनाऽभ्यासं
सदा तन्वतां शुद्धा नाडिगणा
भवन्ति यमिनां मासत्रयादूर्ध्वतः शांडि.१।७।१
प्राणं प्राणान्तं सर्वे प्राणा अनुप्राणन्ति कौ. त. ३।२
प्राणं प्राणः (गच्छति) कौ. त.२।१३
प्राणं मे त्वयि दधानीति पिता कौ.त.२।१५

प्राणं वा एते प्रस्कन्दन्ति ये दिवा रत्या संयुज्यन्ते	प्रश्नो.१।१३
प्राण१ सितमसीति तत्रैते ऋचौ भवतः–(मा. पा.)	छां. ३।१७।६
प्राणः क्षुधितोः प्रक्षत्रमत्रमाप्नोति	बृ.उ.५।१३।४
प्राणः पवमानेन, पवमानो विश्वैर्देवैः, विश्वेदेवाः स्वर्गेण लोकेन, स्वर्गो लोको ब्रह्मणा, सैषावरपरा संहिता	३ऐत. १।६।३
प्राणः प्रज्ञा	बृह. १।५।७
प्राणः प्रजानामुदयत्येष सूर्यः	प्रश्नो.१।८
प्राणः प्रसूतिर्भुवनस्य योनिर्व्याप्तं त्वया एकपदेन विश्वम्	एका. उ. ३
प्राणः प्राणेन याति प्राणः प्राणं ददाति प्राणाय ददाति प्राणोऽहं पिता प्राणो माता प्राणो भ्राता प्राणः स्वसा प्राण आचार्यः प्राणो ब्राह्मणः	छां.७।१५।१
प्राणः प्राविशत्तत्प्राणे प्रपन्न उदतिष्ठत्	१ऐत.१।४।६
प्राणः शरीरमन्नं न परिचक्षीत	तै.उ.३।११।१
प्राणः शरीरं परिरक्षति	सुबालो. ४।३
प्राणः शरीरादधिको द्वादशाङ्गुलमानतः	त्रि.ब्रा.२।५१
प्राणः सर्वाणि भूतानि	१ऐत. २।३।४
प्राणः साम	छांदो.१।७।१
प्राणः सामवेदः	बृह.१।५।५
प्राणः सूर्योऽग्निरथ वा पचत्यन्तरिदं वपुः	अ.पू.२।५९
प्राणः स्वरोऽन्नं या वाग्विराट्	छां. १।१३।२
प्राणा अह१ श्रेयसि व्यूदिरेऽह१ श्रेयानस्म्यह१ श्रेयानस्मीति	छांदो.५।१।६
प्राणा आदित्या इदं मे तृतीयसवनं	छां. ३।१६।६
प्राणा इत्येवाचक्षते	छां. ५।१।१५
प्राणा गुहाशयानिहिताः सप्त सप्त	महाना.८।२
प्राणाग्नय एवैतस्मिन् पुरे जाग्रति	प्रश्नो. ४।३
प्राणाङ्गनामा संस्पर्शो यः स पूरक उच्यते	अ. पू.५।२८
प्राणाच्छ्रद्धां खं वायुर्ज्योतिरापः पृथिवीन्द्रियम्	प्रश्नो. ६।४
प्राणात्प्राणो ब्रह्मेत्येव आहुः	बृ.उ.५।१२।१
प्राणादयस्तु पञ्चैव पञ्च शब्दादयस्तथा	वराहो.१।३
प्राणादयो वै पुनरेव तस्माद्भ्युच्चरन्तीह यथाक्रमेण [मैत्र्यु.६।२६+	६।३१
प्राणादि चतुर्दशवायुभेदा अन्नमयकोशे यदा वर्तन्ते तदा प्राणमयः कोश इत्युच्यते	सर्वसारो. ४
प्राणादिपञ्चकं तेषु प्रधानं तत्र च द्वयम्	त्रि.ब्रा.२।७८
प्राणादिपञ्चवायुश्च बीजं वर्णं च स्थानकम्	ध्या.बिं.९५
प्राणादिभिरनन्तैस्तु भावैरेतैर्विकल्पितः	वैतथ्य. १९
प्राणादिलिङ्गस्वरूपं गुरोर्लिङ्गम्	लिङ्गोप. २
प्राणादिस्पन्दनं वरम्	अ. पू. ४।४३
प्राणाद्यनिलसंशान्तौ युक्त्या ये पदमागताः । अनामयमनाद्यन्तं ते स्मृता योगयोगिनः	अ. पू. ५।५०
प्राणाद्याः पञ्च विख्याता नागाद्याः पञ्च वायवः	ध्या. बिं. ५७
प्राणाद्वा एष उदेति प्राणेऽस्तमेति तं देवाश्चक्रिरे धर्म१...	बृह.१।५।२३
प्राणाद्ध्येव खल्विमानि भूतानि जायन्ते	तैत्ति. ३।३
प्राणाद्वायुः, अक्षिणी निरभिद्येताम्	२ऐत.१।४
प्राणाद्वायुरजायत [ऋ.अ.८।४।१९=	चित्त्यु.१२।६ मं.१०।९०।१३
प्राणाद्वायुः (अजायत)	ग.शो.३।११
प्राणाधिपः सञ्चरति स्वकर्मभिः	श्वेताश्व.५।७
प्राणानवकीर्य याति कैवल्यम्	पैङ्गलो.४।५
प्राणानायम्य देशकालौ सङ्कीर्त्य	सूर्यता.१।८
प्राणानां ग्रन्थिरसि रुद्रो मा विशान्तकः । तेनान्नेनाप्यायस्व	महाना.१६।८
प्राणाना१ सङ्कॢप्त्यै मन्त्राः सङ्कल्पन्ते	छांदो. ७।४।२
प्राणानेतदाह तस्यासत ऋषयः सप्त तीर इति प्राणा वा ऋषयः	बृह.२।२।३
प्राणानेतदाह वागष्टमी ब्रह्मणा संविदानेति	बृह.२।२।३
प्राणान् प्रपीड्येह स युक्तचेष्टः क्षीणे प्राणे नासिकयोच्छ्वसीत । दुष्टाश्वयुक्तमिव वाहमेनं विद्वान्मनो धारयेताप्रमत्तः [श्वेताश्व. २।९+	भवसं.३।२६
प्राणान् प्राणेषु जुह्वति	भ.गी.४।३०
प्राणान्सर्वान्परमात्मनि प्रणामयतीत्येतस्मात्प्रणवः	अ.शिखो. १
प्राणान्सर्वान्प्रलीयत इति प्रलयः	अ.शिखो. १

प्राणान्सन्धारयेत्तस्मिन्नासाभ्यन्तर-चारिणः । भूत्वा तत्रायतप्राणः शनैरेव समभ्यसेत् योे.शि.६।७
प्राणान् सन्धारयेत्तस्मिन्नासाभ्यन्तर-चारिणः । भूत्वा तत्र गतप्राणः शनैरथ समुत्सृजेत् क्षुरिको. ५
प्राणापानगती रुद्ध्वा भ.गी.४।२९
प्राणापानयोरैक्यं कृत्वा धृतकुम्भको नासाग्रदर्शनदृढभावनया द्विकराङ्गुलिभिः षण्मुखीकरणेन प्रणवध्वनिं निशम्य मनस्तत्र लीनं भवति मं. ब्रा.२।४
प्राणायामव्यानोदानसमाननाग-कूर्मकृकरदेवदत्तधनञ्जया इति दश वायवः भावनो. ४
प्राणापानसमानोदानव्यानानाग-कूर्मकृकरदेवदत्तधनञ्जया एते दश वायवः सर्वासु नाडीषु चरन्ति शांडि. १।४।७
प्राणापानवशो जीवो ह्यधश्चोर्ध्वं च (प्र-) धावति [ध्या.बिं. ५८+ यो. चू. २८
प्राणापानव्यानोदानसमाना मे शुद्ध्यन्तां ज्योतिरहं विरजा विपाप्मा भूयासꣳ स्वाहा महाना.१४।७
प्राणापानव्यानोदानसमानाः प्राणवृत्तयः पैङ्गलो.२।३
प्राणापानसमाक्षिप्तस्तथा जीवो न विश्रमेत् यो.शि.६।५२
प्राणापानसमाक्षिप्तस्तद्वज्जीवो न विश्रमेत् ध्या. बिं.६०
प्राणापानसमाक्षिप्तस्तथा जीवोन तिष्ठति यो.चू.२७
प्राणापानसमानाख्या व्यानोदानौ च वायवः यो.चू. २२
प्राणापानसमायुक्तः भ.गी.१५।१४
प्राणापानसमायोगो ज्ञेयं योगचतुष्टयं यो.शि.१।१२८
प्राणापानसमायोगः प्राणायामो भवति शांडि.१।६।१
प्राणापानसमायोगाचंद्रसूर्यैकता भवेत् यो.शि.१।५६
प्राणापानादिचेष्टादि क्रियते व्यान-वायुना त्रि.ब्रा.२।८५
प्राणापानाभ्यां प्रतिलोमानुलोमाभ्यां... सच्चिदानन्दः परमात्माऽऽविर्भवति महावा. २
प्राणापानावजिरꣳ सञ्चरन्तौ चित्सु.१४।३
प्राणापानौ नादबिन्दू मूलबन्धेन चैकताम् । गत्वा योगस्य संसिद्धिं यच्छतो नात्र संशयः यो.त. १२१
प्राणापानौ व्रीहियवौ तपश्च मुंड.२।१।७
प्राणापानौ समानश्च उदानो व्यान एव च । नागः कूर्मश्च कृकरो देवदत्तो धनञ्जयः (१० प्राणाः) त्रि.ब्रा.२।७७
प्राणापानौ समौ कृत्वा भ.गी.५।२७
प्राणापानौ संविदानौ जहि तम् चित्सु. १४।३
प्राणा भूत्वा एकैकमेतानि सर्वाण्येवैतानि प्रज्ञापयन्ति कौ.त. ३।२
प्राणाय स्वाहा, अपानाय स्वाहाव्यानाय स्वाहाउदानाय स्वाहा प्रा.हो. १।११
प्राणाय स्वाहाऽपानाय स्वाहा व्यानाय स्वाहा समानाय स्वाहोदानाय स्वाहेति पञ्चभिरभिजुहोति मैत्रा. ६।९
प्राणाय स्वाहा वसिष्ठायै स्वाहेत्यग्नौ हुत्वा मन्थे सꣳस्रवमवनयति बृह.६।३।२
प्राणायाम इति प्रोक्तो रेचपूरककुम्भकैः जा.द. ६।१
प्राणायामदृढाभ्यासैर्युक्त्या च गुरुदत्तया । आसनाशनयोगेन प्राणस्पन्दो निरुध्यते अ.पू.४।८७
प्राणायामद्विषट्केन प्रत्याहारः प्रकीर्तितः यो.चू.१११
प्राणायामनिरोधैश्च मन्त्रैर्द्वादशभिस्तथा । न तद्दादशमात्रास्तु ध्रुद्रातः प्रथमः स्मृतः योगो. ५
प्राणायामपरस्यास्य पुरुषस्य महात्मनः । देहश्चोत्तिष्ठते तेन किञ्चिज्ज्ञानाद्विमुक्तता जा.द.६।१७
प्राणायामसुतीक्ष्णेन मात्राधारेण योगवित् । वैराग्योपलघृष्टेन छित्वा तं तु न बध्यते क्षुरिको.२४
प्राणायामस्ततः कार्यो नित्यं सत्त्वस्थया धिया योगकुं.१।६२
प्राणायामस्तथाप्राणःप्राणस्यायामउच्यते योगो. ४
प्राणायामस्तथा ब्रह्मन्प्रत्याहारस्ततः परम् जा.द.१।५
प्राणायामं ततः कुर्यात्पद्मासनगतः स्वयम् १यो.त.३२
प्राणायामेन चित्तं तु शुद्धं भवति सुव्रत जा.द. ६।१६

प्राणायामेन युक्तस्य विप्रस्य नियता-
त्मनः । ...सत्यस्थं चैव जायते योगो. १३
प्राणायामेन युक्तेन सर्वरोगक्षयो भवेत्।
प्राणायामवियुक्तेभ्यः सर्वरोग-
समुद्भवः यो.चू.११६
प्राणायामैकनिष्ठस्य न किञ्चिदपि
दुर्लभम् जा.द. ६।२०
प्राणायामैर्दहेद्दोषान् धारणाभिश्च
किल्बिषम् । प्रत्याहारेण विषया-
न्ध्यानेनानीश्वरान्गुणान्[अ.ना.८+ योगो. १५
प्राणायामैर्वशीकृत्वा सर्वामिन्द्रिय-
वाहिनीम् । ततो युञ्जीत मेधावी
प्राणं च मनसा मुनिः दुर्वासो. २।१५
प्राणायामो भवेदेवंपातकेन्धनपावकः यो. चू.१०८
प्राणा रुद्रा इदं मे माध्यन्दिनं सवनं छांदो.३।१६।४
प्राणा वसव इदं मे प्रातस्सवनं छांदो.३।१६।२
प्राणा वा ऋषयः बृह. २।२।३
प्राणा वाव रुद्रा एते हीद९ सर्व९
रोदयन्ति छांदो.३।१६।३
प्राणा वाव वसव एते हीद९ सर्वं
वासयन्ति छांदो.३।१६।१
प्राणा वावादित्या एते हीदंसर्वमाददते छांदो.३।१६।५
प्राणाविरुद्धश्चरतिजीवस्तेन विना नहि त्रि.ब्रा.२।६२
प्राणा वै गयास्तत्प्राणा९स्तत्रे तद्य-
द्गया९स्तत्रे बृह.५।१४।४
प्राणा वै यशो विश्वरूपं बृह.२।२।३
प्राणा वै यशो वीर्यं तत्प्राणेषूत्क्रान्तेषु
शरीर९ श्वयितुमध्रियत तस्य शरीर
एव मन आसीत् बृह.१।२।६
प्राणा वै सत्यं तेषामेव सत्यम् बृह.२।१।२०
प्राणाश्चलन्तु तद्धर्मैः कामैर्वा हन्यतां
मनः । आनन्दबुद्धिपूर्णस्य मम
दुःखं कथं भवेत् आ.प्र.२१
प्राणास्तु रुद्रा विज्ञेया ह्यविमुक्तं
परं स्मृतम् दुर्वासो.२।११
प्राणा९स्त्वं भूमानमभिगायताद्बहवो
मे भविष्यन्तीति छांदो.१।५।४
प्राणांस्त्यक्त्वा धनानि च भ.गी.१।३३

प्राणिकर्मवशादेव पटो यद्वत्प्रसारितः
प्राणिकर्मक्षयात् पुनस्तिरोभावयति ।
तस्मिन्नेवाखिलं विश्वं सङ्कोचित-
पटवद्वर्तते पैङ्गलो.१।२
प्राणिनां देहमध्ये तु स्थितो हंसः
सदाच्युतः ब्र. वि. ६९
प्राणिनां देहमाश्रितः भ.गी.१५।१४
प्राणी भवति सर्वमायुरेति, ज्यो-
ग्जीवति,महान्प्रजया पशुभिर्भवति छांदो.२।११।२
प्राणेगते यथादेहःसुखंदुःखंनविन्दति ।
तथा चेत्प्राणयुक्तोऽपि स कैवल्या-
श्रमे वसेत् ना. प. ३।२७
प्राणे गलितसंवित्तौ तालूर्ध्वं
द्वादशान्तगे । अभ्यासादूर्ध्व-
रन्ध्रेण प्राणस्पन्दो निरुध्यते शांडि.१।७।३१
प्राणे तृप्यति चक्षुस्तृप्यति छांदो.५।१९।२
प्राणे त्वमसि सन्धाता ब्रह्मन् महाना.१७।१९
प्राणेन च स्वराख्येन प्रथिता
वैखरी पुनः यो.शि. ३।५
प्राणेन जातानि जीवन्ति तैत्ति. ३।३
प्राणेन रक्षन्नवरं कुलायं बहिष्कुलाया-
दमृतश्चरित्वा । स ईयतेऽमृतो
यत्र काम९ हिरण्मयः पुरुष
एक ह९सः बृह. ४।३।१२
प्राणेन सर्वान्गन्धानाप्नोति कौ. उ. ३।४
प्राणेन ह्येवामुष्मिँल्लोकेऽमृतत्वमाप्नोति कौ. उ. ३।२
(परमं पदमिति च) प्राणेन्द्रियाद्यन्तः-
करणगुणादेः परतरं सच्चिदानन्द-
मयं नित्यमुक्तब्रह्मस्थानं परमं पदम् निरा.उ. २९
प्राणेऽपानं तथाऽपरे भ.गी. ४।२९
प्राणेभ्यो देवा देवेभ्यो लोकाः
(विप्रतिष्ठन्ते)[कौ.उ.३।३, ३+४।१९
प्राणे शरीरं प्रतिष्ठितम् तैत्ति. ३।७
प्राणेषुपञ्चविधंपरोवरीयः सामोपासीत छांदो. २।७।१
प्राणे सर्व९ समर्पितं प्राणः प्राणेन
याति प्राणः प्राणं ददाति प्राणो
ह पिता प्राणो माता प्राणो
भ्राता प्राणः स्वसा प्राण आचार्यः
प्राणो ब्राह्मणः छांदो.७।१५।१

प्राणे हीमानि सर्वाणि भूतानि युज्यन्ते बृह. ५।१३।२
प्राणे हीमानि सर्वाणि भूतानि रमन्ते बृह. ५।१२।१
प्राणे हीमानि सर्वाणि भूतानि सम्यञ्चि बृह. ५।१३।३
प्राणैरयमस्मिन् स यदोत्क्रमिष्यन् भवति बृह. ६।५।२
प्राणैर्बलं बलेन तपस्तपसा श्रद्धा... स्मारेण विज्ञानं विज्ञानेनात्मानं वेदयति म.ना. १७।१३
प्राणैर्मनः, मनसश्च विज्ञानं, विज्ञानादानन्दो ब्रह्मयोनिः म.ना. १७।१३
प्राणैश्चित्तं सर्वमोतं प्रजानां यस्मिन्विशुद्धे विभवत्येष आत्मा मुण्ड. ३।१।९
प्राणो अग्निः परमात्मा पञ्चवायुभिरावृतः प्रा.हो. १।१२
प्राणोऽग्निस्तस्येमा इष्टकाः मैत्रा. ६।३३
प्राणोऽग्निः परमात्मा वै पञ्चवायुः समाश्रितः। स प्रीतः प्रीणातु विश्वं विश्वभुक् मैत्रा. ६।९
प्राणोऽग्निः सूर्य इति प्रतापवत्येषा(तनूः) मैत्रा. ६।९
प्राणो देहस्थितो यावदपानं तु निरोधयेत् यो. चू. १००
(तस्य)प्राणोधूमोवागर्चिश्चक्षुरङ्गाराः श्रोत्रं विस्फुलिंगास्तस्मिन्नेतस्मिन्नग्नौ देवा अन्नं जुह्वति तस्या आहुत्यै रेतः सम्भवति बृह. ६।२।१२
प्राणो नाम देवताऽवरोधिनी सा... तस्यै स्वाहा कौ. त. २।३
प्राणोन्मेषनिमेषाभ्यां संसृतेः प्रलयोदयौ अ.पू. ५।४१
प्राणोऽपानस्तथा व्यानः समानोदान एव च। नागः कूर्मश्च कृकरो देवदत्तो धनञ्जयः। एते नाडीषु सर्वासु चरंति दश वायवः जा.द. ४।२३
प्राणोऽपानो व्यान इत्यष्टावक्षराणि बृह. ५।१४।३
प्राणोऽपानो व्यान इति प्राणवत्येषा(तनूः) मैत्रा. ६।५
प्राणोऽपानः समानश्चोदानो व्यानस्तथैव च। नागः कूर्मः कृकरको देवदत्तो धनञ्जयः। प्राणाद्याःपञ्च विख्याता नागाद्याः पञ्च वायवः ध्या. बिं. ९६
प्राणोऽपानः समानश्चोदानव्यानौ च वायवः। पञ्च कर्मेन्द्रियैर्युक्ताज्ञानशक्तिबलोद्यताः ब्र. वि. ६६
प्राणो ब्रह्म, कं ब्रह्म, खं ब्रह्म छांदो. ४।१०।५
प्राणो ब्रह्मेति व्यजानात् तैत्ति. ३।३
प्राणो ब्रह्मेति ह स्मा ह कौषीतकिस्तस्य ह वा एतस्य प्राणस्य ब्रह्मणो मनो दूतं चक्षुर्गोप्तृ श्रोत्रं संश्रावयितृ कौ. त. २।१
प्राणो ब्रह्मेति ह स्माह पैङ्ग्यस्तस्य हवा एतस्य प्राणस्य ब्रह्मणो वाक्परस्ताच्चक्षुरारुन्धे चक्षुः परस्ताच्छ्रोत्रमारुन्धे श्रोत्रं परस्तान्मन आरुन्धे मनः परस्तात्प्राण आरुंधे कौ. त. २।२
प्राणो ब्रह्मेत्येक आहु स्तन्न, तथा शुष्यति वै प्राण ऋतेऽन्नात् बृह. ५।१२।१
प्राणो भ्राताप्राणः स्वसा प्राण आचार्यः छां. ७।१५।१
प्राणो मनुष्याः बृह. १।५।६
प्राणोऽयमनिशं ब्रह्मन्स्पन्दशक्तिः सदागतिः अ. पू. ५।२५
प्राणो वंश इति विद्यात् ३ऐत. १।४।१
प्राणो वंश इति स्थविरः शाकल्यः ३ऐत. २।१।१
प्राणो वा अन्नम् तैत्ति. ३।७
प्राणो वा अन्नस्य रसः, मनःप्राणस्य, विज्ञानं मनसः मैत्रा. ६।१३
प्राणो वा अमृतं नामरूपे सत्यं ताभ्यामयं प्राणश्छन्नः बृह. १।६।३
प्राणो वा आयुः कौ. त. ३।२
प्राणो वा अहमस्म्यृषे, प्राणः सर्वाणि भूतानि प्राणो ह्येष य एष तपति १ऐत. २।३।४
प्राणो वा इद९ सर्वं भूतं यदिदं किञ्च छां. ३।१५।४
(उक्थं)प्राणो वा उक्थं प्राणो हीद९ सर्वमुत्थापयत्युद्धास्मादुक्थविद्वीरस्तिष्ठत्युक्थस्य सायुज्य९सलोकतां जयति बृह. ५।१३।१
प्राणो वा आशाया भूयान् यथा वा अरा नाभौ समर्पिता एवमस्मिन्प्राणे सर्व९ समर्पितम् छांदो. ७।१५।१
प्राणो वा उत्प्राणेन हीद९ सर्वमुत्तब्धम् बृ.उ. १।३।२३
प्राणो वाव ज्येष्ठश्च श्रेष्ठश्च छांदो. ५।१।१

प्राणो वाव तदस्यार्चेत् १ऐत. २।१।१
प्राणो वाव संवर्गः, स यदा स्वपिति, प्राणमेव वागप्येति, प्राणं चक्षुः, प्राणꣳ श्रोत्रं, प्राणं मनः, प्राणो ह्येवैतान्सर्वान्संवृङ्क्ते छांदो. ४।३।३
(क्षत्रं-)प्राणो वै क्षत्रं, प्राणो हि त्रायते.. बृह. ५।१३।४
प्राणो वै गृत्सोऽपानो मदः १ऐत. २।१।३
प्राणो वै ग्रहः, सोऽपानेन नातिग्रहेण गृहीतोऽपानेन हि गन्धाञ्जिघ्रति बृह. ३।२।२
प्राणो वै ज्येष्ठश्च श्रेष्ठश्च, ज्येष्ठश्च श्रेष्ठश्च स्वानां भवति बृह. ६।१।१
प्राणो वै बलं, तत्प्राणे प्रतिष्ठितम् बृह. ५।१४।४
प्राणो वै ब्रह्मेत्यप्राणतो हि किꣳस्यात् बृह. ४।१।३
प्राणो वै यज्ञस्योद्गाता बृह. ३।१।५
प्राणो वै रं प्राणे हीमानि सर्वाणि भूतानि रमन्ते बृह. ५।१२।१
प्राणो वै वायुः मैत्रा. ६।३३
प्राणो वै सम्राट् परमं ब्रह्म, नैनं प्राणो जहाति बृह. ४।१।३
प्राणो व्यानोऽपान उदानः समानः तैत्ति. १।७।१
प्राणोऽसौ लोकः बृ.उ. १।५।४
प्राणो हीदꣳ सर्वमुत्थापयति बृह. ५।१३।१
प्राणो(घ्राणो)ऽस्मात्सर्वान् गन्धानभिविसृजते कौ. त. ३।४
प्राणोऽस्मि प्रज्ञात्मा तं मामायुरमृतमित्युपास्व कौ. त. ३।२
प्राणो ह पिता, प्राणो माता, प्राणो भ्राता, प्राणःस्वसा, प्राणआचार्यः, प्राणो ब्राह्मणः छांदो.७।१५।१
प्राणो हविः चित्त्यु.१।१
प्राणो हिङ्कारो वाक्प्रस्तावश्चक्षुरुद्गीथः श्रोत्रं प्रतिहारो मनो निधनं परोवरीयाꣳसि वैतानि छांदो. २।७।१
प्राणो हि भूतानामायुः तैत्ति. २।३
प्राणो हि वा अङ्गानाꣳ रसः बृह. १।३।१९
प्राणो हि वै क्षत्रं त्रायते हैनं प्राणः बृह. ५।१३।४
प्राणो ह्यविज्ञातः प्राणघनं तद्भूत्वाऽवति बृह. १।५।१०
प्राणो ह्येवैतानि सर्वाणि भवति छां.७।१५।१४
प्राणो ह्येवैतानि सर्वाणि भवन्ति छां. ५।१।१५
प्राणो ह्येवैतान्सर्वान्संवृङ्क्त इति छांदो. ४।३।३
प्राणो ह्येष आत्मा प्रश्नो. १
प्राणो ह्येष यएषतपति [१ऐत.२।१।१+ ३।४
प्राणो ह्येष यः सर्वभूतैर्विभाति विजानन्विद्वान्भवतेनातिवादी। आत्मक्रीड आत्मरतिः क्रियावानेष ब्रह्मविदां वरिष्ठः मुण्डो. ३।१।४
प्राणो ह्येष सर्वभूतैर्विभाति (मा.पा.) मुण्डो.३।१।४
प्रातरधीयानो रात्रिकृतं पापं नाशयति [अ. मा. ७+नारा.५+ देव्यु. २६
प्रातरादित्यमुपतिष्ठते-दिशामेकपुण्डरीकमस्यहं मनुष्याणामेकपुण्डरीकं भूयासमिति बृह. ६।३।६
प्रातर्मध्यन्दिने सायमर्धरात्रे च (तु) कुम्भकान्। शनैरशीतिपर्यन्तं चतुर्वारं समभ्यसेत् [त्रि.ब्रा.२।१०१+ [शाण्डिल्यो. १।७।२ यो. त. ४३
प्रातर्मध्याह्नयोः षण्मासकृतानि पापानि नाशयति गायत्रीर.११
प्रातश्चित्रादिवर्णाखण्डसूर्यचक्रवद्वह्निज्वालावलीवत्तद्विहीनान्तरिक्षंवत्पश्यति अद्वयता. ४
प्रातःकाले च पूर्वैर्गुर्वैद्धक्तैः प्रार्थितं मुहुः। तद्वैक्षं प्राक्प्रणीतंस्यात्स्थितिं कुर्यात्तथापि वा १सं.सो.२।६७
प्रातः प्रसाधनं दत्त्वा कार्यं सम्मार्जनाञ्जनम्। शिवो. ७।२४
प्रातः स्नात्वा विधानेन सन्ध्याकर्म समाप्य च। भूतिरुद्राक्षभरण उदीचीं दिशमाश्रयेत् २ बिल्वो.७
प्रातःस्नानोपवासादिकायक्लेशांश्च वर्जयेत् १यो.त. ४८
प्रादक्षिण्याद्दारिद्र्यनाशिनीं घ्राणतर्पणादन्तर्मलनाशिनीं च एवं वेद स वैष्णवो भवति तुलस्यु. २
प्रादुर्भावश्च भूतानां देहत्यागस्तथैव च। प्राप्तिर्व्यायामयोगश्च विधानमनुवर्तते भवसं. १।११
प्रादुर्भूतोसुराष्ट्रेऽस्मिन् [श्रीसू.७+क. खि.५।८।७७
प्राधान्यतः कुरुश्रेष्ठ भ.गी.१०।१९

प्राधान्येनात्र भेद एव, स भेदः
वस्तुतस्त्वभेद एव त्रि.मं.ना.२।२

प्राप्तकर्मकरो नित्यं शत्रुमित्रसमान-
दृक् । ईहितानीहितैर्मुक्तो न
शोचति न काङ्क्षति महो. ६।६४

प्राप्तं प्राप्तव्यमखिलं भवता पूर्णचेतसा ।
स्वरूपे तपसि ब्रह्मन्मुक्तस्त्वं
भ्रान्तिमुत्सृज महो. २।७२

(एवं) प्राप्तानन्दः परमयोगी भवति मं. ब्रा. २।९

प्राप्तानुत्तमविश्रान्तिर्न किञ्चिदिह
वाञ्छति महो. २।४७

प्राप्तुं तत्सहजस्वभावमनिशं सेवध्व-
मेकं गुरुम् अमन. २।४१

प्राप्ते ज्ञानेन विज्ञाने ज्ञेये च परमात्मनि
...हृदि संस्थिते ...

प्राप्नुयात् पुण्यकर्मणाम् भ.गी.१८।७१

प्राप्य चान्ते ततश्चैव ज्ञानयोगमनुत्त-
मम् । अविरोधेन धर्मस्य सञ्चरेत्
पृथिवीमिमाम् ना.प. ६।३३

प्राप्य ज्ञानदशामेतां पशुम्लेच्छादयो-
ऽपि ये । सदेहा वाऽप्यदेहा वा ते
मुक्ता नात्र संशयः महो. ५।३९

प्राप्यन्ते मां न पुनरावर्तन्ते भस्मजा. २।७

प्राप्य पुण्यकृतां लोकान् भ.गी. ६।४१

प्राप्य सर्वज्ञतां कृत्स्नां ब्राह्मण्यं पद-
मद्वयम् । अनापन्नादिमध्यान्तं
किमतः परमीहते अ.शां. ८५

प्राप्यं सम्प्राप्यते येन भूयो येन न
शोच्यते । पराया निर्वृतेः स्थानं
यत्तज्जीवितमुच्यते महो. ३।१२

प्राप्यान्तं कर्मणस्तस्य यत्किञ्चेह
करोत्ययम् । तस्माल्लोकात्पुनरैति.. बृह. ४.४।६

प्रायश्चित्तीयस्त्वधस्तात्तिर्यक्त्विमो
हिमांशुप्रभाभिः प्रजननकर्मा(अग्निः) प्रा.हो. २।४

प्रायेण श्रीमतां लोके भोक्तुं शक्तिर्न
विद्यते भवसं. १।१३

प्रारब्धकर्मपर्यन्तमहिनिर्मोकव-
द्व्यवहरति पैङ्गलो. ४।४

प्रारब्धकल्पनाप्यस्य देहस्य
भ्रान्तिरेव हि अध्यात्मो. ५७

प्रारब्धनाशात्प्रतिभाननाशः.. वराहो. २।६९

प्रारब्धप्रतिभासनाशपर्यन्तं चतुर्विधं
स्वरूपं ज्ञात्वा देहपतनपर्यन्तं
स्वरूपानुसन्धानेन वसेत् ना. प. ७।३

प्रारब्धमसतः कुतः अध्यात्मो. ५८

प्रारब्धं सिद्ध्यति तदा यदा देहात्मना
स्थितिः । देहात्मभावो नैवेष्टः
प्रारब्धं त्यजतामतः अध्यात्मो.५६

प्रारब्धागाम्यर्जितानिकर्मत्रयमितीरितम् वराहो. १।१२

प्रारब्धान्ते देहहानिर्माययेति
क्षीयतेऽखिला वराहो. ३।७१

प्रावृट्कालप्रारम्भे यथा मण्डूकादीनां
प्रादुर्भावस्तद्वत्सर्वात्मना नष्टाया
अविद्याया उन्मेषकाले पुनरुदयो
भवति त्रि.म.ना.५।१

प्राश्याचम्यायं निधिरथवा परिव्राड्वि-
वर्णवासामुण्डोपरिग्रहःशुचिरद्रोही
भैक्षमाणो ब्रह्मभूयाय भवति याज्ञव. २

प्रास्मा आशा अशृण्वन् चित्यु. १५।२

प्राहुस्त्यागं विचक्षणाः भ. गी. १८।२

प्रियमित्येनदुपासीत बृह. ४।१।३०

प्रियं भवत्यस्य ब्रह्मवर्चसं कुले य
एतमेवमात्मानं वैश्वानरमुपास्ते छां. ५।१२।२
५।१३।२+१४।२।+१५।२+१६।२+ १७।२

प्रियं ब्रुवाणं ब्रूयात्प्रियꣳरोत्स्यतीतीश्वरो
ह तथैव स्यात् बृह. १।४।८

प्रियः प्रियायार्हसि देव सोढुम् भ.गी.११।४४

प्रिया च मानसी, प्रतिरूपा च चाक्षुषी कौ.त. १।३

प्रियात्मजनन-वर्धन-परिणाम-क्षय-
नाशाः षड्भावाः मुद्गलो. ४।२

प्रियाप्रिये न स्पृशतस्तथैव च शुभा-
शुभे । तमसा ग्रस्तवद्भानादग्रतो-
ऽपि रविर्जनैः आत्मो. १५

प्रिया बतारे नः सती प्रियं भाषसे बृह.२।४।५

प्रिया वै खलु नो भवति सती
प्रियमवृधत् बृह. ४।५।१

प्रियां वाचमभिवदन्त्योऽर्चयन्त्य एष वः पुण्यः सुकृतो ब्रह्मलोकः मुण्ड. १।२।६
प्रियेषु स्वेषु सुकृतमप्रियेषु च दुष्कृतम्। विसृज्य ध्यानयोगेन ब्रह्माप्येति सनातनम् ना.प. ३।५१
प्रियो हि ज्ञानिनोऽत्यर्थं भ.गी. ७।१७
प्रियो हैव भवति स्मरन्ति हैवास्य कौ.त. २.४
प्रीतिः प्रीत्या भवति सामर. ९९
प्रेतान् भूतगणांश्चान्ये भ.गी. १७।४
प्रेत्यास्माल्लोकादमृता भवन्ति केनो. २।५
प्रेत्येन्द्रो भूत्वैषु लोकेषु राजति १ऐत. ३।७।२
प्रेमानन्द एव सृष्टिस्त्वाधिदैविकी सामर. ३९
प्रेमानन्दमनुभवन्तो भक्तास्तल्लीलोपयोग्या भवन्ति सामर. ९२
प्रेयो मन्दो योगक्षेमौ वृणीते कठो. २।२
प्रेरयेद्वा तथा भिक्षुः स्वप्नेऽपि न कदाचन ना.प. ४।९
प्रेक्षामृतस्य यच्छतामेतद्बुद्धकमोचनम् सद्वै. ९
प्रेहि तु तत्र प्रतीत्य ब्रह्मचर्यं वत्स्याव इति भवानेव गच्छत्विति बृह. ६।२।४
प्रैहि तु तत्र प्रतीत्य ब्रह्मचर्यं वत्स्यावः (मा. पा.) बृ.उ. ६।२।४
प्रोक्तमादित्यमाहात्म्यं यन्मां त्वमनुपृच्छसि सूर्यता. १।१०
प्रोक्तवानहमव्ययम् भ.गी. ४।१
प्रोक्तं कश्चिदविद्येति कश्चिदिच्छेति सम्मतम् महो. ५।१३२
प्रोक्ता च सात्त्विकी रुद्रे भक्ते ब्रह्माणि राजसी कृष्णो. ४
प्रोच्यते गुणसङ्ख्याने भ.गी. १८।१९
प्रोच्यमानमशेषेण भ.गी. १८।२९
प्रोता त्वमेता विचितिः क्रमाणां प्रजापतिश्छन्दमयो विगर्भः एका. ७. ९
प्रोवाच तां तत्त्वतो ब्रह्मविद्याम् मुंड. १।२।१३
(अथ) प्रोष्याऽऽयन् पुत्रस्य मूर्धानमभिमृशति कौ.त. २।११
प्लवदाचरणम् निर्वाणो. ८
प्लवा ह्येते अदृढा यज्ञरूपा अष्टादशोक्तमवरं येषु कर्म मुण्ड. १।२।७
प्लावयेद्योगमार्गेण सोऽमृतत्वाय कल्पते बृ.जा. २।१७
प्लुतप्रणवप्रयोगेण समस्तमोमिति प्रयुक्त आत्मज्योतिः सकृदावर्तते अ.शिखो. १
प्लुतप्लुत्युपसंहारः तुरीयो. १

फ

फट्फट्ब्रूहि महाकृत्ये विधूमाग्निसमप्रभे। हन शत्रूंस्त्रिशूलेन कुद्धास्ये पिब शोणितम् वनदु. १४
फलपत्रोदकाहारः पर्वतवनवनदेवतालयेषु सञ्चरेत् ना.प. ४।४८
फलमुद्दिश्य वा पुनः भ.गी. १७।२१
(पुरुषः) फलमूलोदकान्वितं तपोवनं प्राप्य... फलमूलपुष्पवारिभिः... वेदान्तश्रवणं कुर्वन्योगं समारभेत् शांडि. १।५।१
फलविशुद्धाङ्गी सन्न्यासं लभतेऽर्चिवान् २सन्न्यासो. ६
फलं कतकवृक्षस्य यद्यप्यम्बुप्रसादकृत्। न नामग्रहणादेव तस्य वारि प्रसीदति भवसं. १।५०
फलं त्यक्त्वा मनीषिणः भ.गी. २।५१
फलं यज्ञतपःक्रियाः भ.गी. १७।२५
फलादुत्पद्यमानःसन्नतेहेतुःप्रसिद्ध्यति अ.सां. १७
फलानां पुरुषः, पुरुषस्य रेतः बृह. ६।४।१
फले सक्तो निबध्यते भ.गी. ५।१२
फलोदयः क्रियापूर्वो निष्क्रियो नहि कुत्रचित् अध्यात्मो. ११
फलो वा एष लोकानामजरो महात्मा विश्वं यः पाति पारमा. ८।२
फालोर्ध्वगललाटविशेषमण्डले निरन्तरं तेजस्कारकयोगविस्फुरणेन पश्यति चेत् सिद्धो भवति अद्वयता. २
फेनपा उन्मादकाः शीर्षपर्णफलभोजिनो यत्र तत्र वसन्तोऽपरिचरणं कृत्वा...आत्मानं प्रार्थयन्ते आश्रमो. ३
फेनादण्डं भवत्यण्डाद्ब्रह्मा भवति [अ. शिरः. ३।१५+ बह्वृचो. २७
फेनाद्बुद्बुदमभवत्। अण्डाद्ब्रह्माऽभवत् गायत्री. १

ब

बटरकाणि सम्पतन्तीव दृश्यन्ते तानि
तदा न पश्येत्तदप्येवमेव विद्यात् ३ऐत. २।४।६
बटुको हि शाश्वतेन पुराणेन वेषमूर्जेण
तपसा नियन्ता बटुको. २३
बदरीफलमात्रं तु (रुद्राक्षस्य)
मध्यमं प्रोच्यते बुधैः । अधमं
चणमात्रं स्यात् ... रु.जा. ७
बद्धपद्मासनस्तिष्ठन्नर्धोन्मीलितलोचनः।
..स्पर्शान् परिहरञ्छनैः अ. पू. ३।४
बद्धपद्मासनं कृत्वा सरस्वत्यास्तु
चालनम् । दक्षनाड्या समाकृष्य
बहिष्ठं पवनं शनैः । यथेष्टं पूरयेद्वायुं.. योगकुं. १।२३
बद्धपद्मासनो योगी प्राणं चन्द्रेण
पूरयेत् ..भूयः सूर्येण रेचयेत् यो. चू. ९५
बद्धपद्मासनो योगी नमस्कृत्य गुरुं
शिवम् । नासाग्रदृष्टिरेकाकी
प्राणायामं समभ्यसेत् यो. चू. १०६
बद्धमुक्तो महीपालो ग्रासमात्रेण
तुष्यति । परैरबद्धो नाक्रान्तो
न राष्ट्रं बहु मन्यते महो. ५।७४
बद्धः खेचरतां (रसः) धत्ते ब्रह्मत्वं
स्वचेतसि वराहो. २।७९
बद्धः सुनादगन्धेन सद्यः सन्त्यक्तचा-
पलः । नादग्रहणतश्चित्तमन्तरङ्ग-
भुजङ्गमः ना. बिं. ४३
बद्धो मुच्येत बन्धनात् सूर्यता. १।१३
बद्धो मुक्तोऽहमद्भुतात्माऽहम् आ. प्र. १०
बद्धो हि वासनाबद्धो मोक्षः स्याद्वा-
सनाक्षयः मुक्ति. २।६८
बध्नन्कराभ्यां श्रोत्रादि करणानि
यथातथम् । युञ्जानस्य यथोक्तेन
वर्त्मना स्ववशं मनः त्रि.ब्रा. २।११६
बध्नाति हि शिरोजातमधोगामि
नभोजलम् । ततो जालन्धरो
बन्धः कष्टदुःखौघनाशनः यो. चू. ५०
बध्वा प्रागासनं विप्रो ऋजुकायः समा-
हितः । नासाग्रन्यस्तनयनः त्रि.ब्रा. २।९२
बध्वा योगासनं पूर्वं हृद्देशे हृदयाञ्जलिः त्रि.ब्रा. २।१४५
बन्धत्वमपिचेन्मोक्षो बन्धाभावे क
मोक्षता ते.बिं. ५।२४
बन्धनस्थस्येवास्वातंत्र्यं, यमविषयस्थ-
स्यैव बहुभयावस्थम् मैत्रा. ४।२
बन्धमुक्तिविहीनोऽहंशाश्वतानन्दविग्रहः ते. बिं. ३।३७
बन्धमुद्रा कृता येन नासाग्रे तु
स्वलोचने ब्र. वि. ६९
बन्धमोक्षस्वरूपात्मा बन्धमोक्षविवर्जितः ते.बिं. ४।६६
बन्धमोक्षादिकं नास्ति सद्वाऽसद्वा
सुखादि वा ते. बिं. ५।३८
बन्धमोक्षादिहीनोऽस्मि शुद्धब्रह्मास्मि
सोऽस्म्यहम् मैत्रे. ३।९
बन्धमोक्षौ न चात्मनि २आत्मो. २९
बन्धं कुर्वन्ति धातवः अमन. १।३७
बन्धं मोक्षं च या वेत्ति भ.गी. १८।३०
बन्धाय विषयासक्तं मुक्तं (मुक्त्यै,
मुक्ता) निर्विषयं स्मृतम् (मनः)
[ब्र. बिं. २+ मैत्रा. ४।१७+ अमन. २।७५
बन्धास्थामथ मोक्षास्थां सुखदुःख-
दशामपि । त्यक्त्वा सदसदास्थां
त्वं तिष्ठाक्षुब्धमहाब्धिवत् महो. ६।५३
बन्धुपुत्रमनुमोदयित्वाऽनवेक्ष्यमाणो
द्वन्द्वसहः प्रशान्तः । प्राचीमुदीचीं
वा निवर्तयंश्चरेत शाट्याय. १८
बन्धुरात्माऽऽत्मनस्तस्य भ. गी. ६।६
बन्धो जालन्धराख्योऽयममृता-
प्यायकारकः यो.त. १।१११
बन्धोजालंधराख्योऽयंमृत्युमातङ्गकेसरी १यो.त. ११९
बन्धो मोक्षः सुखं दुःखं ध्यानं चित्तं
सुरासुराः । गौणं मुख्यं परं
चान्यत् सर्वं मिथ्या न संशयः ते.बिं. ५।४४
बभ्रुश्च बभ्रुकर्णश्च नीलग्रीवश्चयःशिवः नीलरु. ३।२
बभ्रम्यमाणमिव चाकश्यमानमिव
जाज्वल्यमानमिव देदीप्यमानमिव
लेलिहानं सदैव मे ब्रह्म आर्षे. ५।३

बर्हापीडाभिरामाय रामायाकुण्ठमेधसे ।
रमामानसहंसाय गोविन्दाय
नमो नमः गो. पू. ४।७
बलमिति विद्युति तैत्ति.३।१०।२
बल्लवीवदनाम्भोजमालिने नृत्तशालिने ।
नमः प्रणतपालाय श्रीकृष्णाय
नमोनमः गो.पू. ४।१०
बलं ज्ञानं सुराणां वै तेषां
ज्ञानं हृतं क्षणात् कृष्णो. १२
बलं देवानाममृतस्य विष्णोः सुदर्श. ६
बलं बलवतां चाहं भ.गी. ७।११
बलं वाव विज्ञानाद्भूयोऽपि ह
शतं विज्ञानवतामेको बलवा-
नाकम्पयते छान्दो.७।८।१
बलं भीमाभिरक्षितम् भ.गी. १।१०
बलं भीष्माभिरक्षितम् भ.गी. १।१०
बलंवावविज्ञानाद्भूयोऽपीहशतं (मा.पा.) छां.उ. ७।८।१
बलात्कामपिशाचेन विवशः परिभूयते महो. ३।३४
बलादिव नियोजितः भ.गी. ३।३६
बलाद्वाव भूयोऽस्तीति तन्मे भगवान्
ब्रवीतु छांदो. ७।८।२
बलेचित्तसंयमाद्धनुमदादिबलम् शांडि.१।७।५२
बलेन तपः, तपसा श्रद्धा (भवति) महाना.१७।१३
बलेन पर्वताः (तिष्ठन्ति) छांदो.७।८।१
बलेन लोकस्तिष्ठति, बलमुपास्व छांदो. ७।८।१
बलेनापःपर्वताबलेनदेवमनुष्याः(मा.पा.) छां.उ. ७।८।१
बलेन वै पृथिवी तिष्ठति, बलेनान्तरिक्षं
बलेन द्यौर्बलेन पर्वता बलेन देव-
मनुष्या बलेन पशवश्च वयांसि च
तृणवनस्पतयः श्वापदान्याकीटपिपी-
लकंबलेनलोकस्तिष्ठतिबलमुपास्वेति छांदो.७।८।१
बलेन वै लोकास्तिष्ठन्ति (मा. पा.) छां.उ. ७।८।१
बस्तिस्त्वेव्यमत्स्ययन्मां नागमिष्य इति छांदो.५।१६।२
बस्तिस्त्वेव आत्मन इति होवाच छांदो.५।१६।२
बहव इमेऽस्मिन्पुरुषे कामा नाना-
त्यया व्याधिभिः परिपूर्णोऽस्मि
नाशिष्यामीति छांदो.४।१०।३
बहवो ज्ञानतपसा भ.गी. ४।१०
बहवो नैकमार्गेण प्राप्ता नित्यत्वमागताः ब्र. वि.२५
बहवो मर्या ब्राह्मणायना निरिन्द्रिया
विमुक्तोऽस्माल्लोकात्प्रयन्ति बृह.६।४।४
बहिरङ्गा जगत्कारणभूता सैवाविद्या-
रूपेण जीवबन्धभूता क्रिया शक्तिश्च
लीलाशक्तिश्चेति राधिको. ९
बहिरन्तश्च भूतानां भ.गी.१३।१६
बहिरन्तश्चोपवीती विप्रः सन्न्यस्तुमर्हति ।
एकयज्ञोपवीती तु नैव सन्न्यस्तुमर्हति परब्र. २०
बहिरस्तङ्गते प्राणे यावन्नापान उद्गतः ।
तावत्पूर्णां समावस्थां बहिष्ठं
कुम्भकं विदुः मुक्तिको.२।५२
बहिरुपशमिते चराचरात्मा स्वयमनु-
भूयत एव देवदेवः अ.पू.१।५५
बहिर्मायया वेष्टितं भवति चक्रं नृ. पू. ५।१
बहिर्लक्ष्यं तु नासाग्रे चतुष्षडष्टदश-
द्वादशाङ्गुलीभिः... व्योमत्वं
पश्यति स तु योगी मं. ब्रा. १।३
बहिर्विरेचनं वायोरुदराद्रेचकः स्मृतः जा.द.६।१३
बहिश्चेतो गृहीतं सद्दृष्टं वैतथ्यमेतयोः वैतथ्य. ९
बहिश्चेतो गृहीतं सद्युक्तं वैतथ्यमेतयोः वैतथ्य. १०
बहिस्तीर्थात्परं तीर्थमन्तस्तीर्थं
महामुने । आत्मतीर्थं महा-
तीर्थमन्यत्तीर्थं निरर्थकम् जा.द. ४।५३
बहिः कुर्वन्नकुर्वन्वा कर्ता भोक्ता
नहि कश्चित् अ. पू. १।५७
(अथ) बहिःकृतेन्द्रियार्थान्स्वशरीरा-
दुपलभते मैत्रा. ६।८
बहिः कृत्रिमसंरम्भो हृदि संरम्भ-
वर्जितः । कर्ता बहिरकर्तान्तर्लोके
विहर शुद्धधीः महो. ६।६८
बहिः प्रज्ञो विभुर्विश्वो ह्यन्तः-
प्रज्ञस्तु तैजसः आगम. १
बहिः प्रपञ्चशिखोपवीतित्वमनादृत्य
प्रणवहंसशिखोपवीतित्वमवलम्ब्य
मोक्षसाधनं कुर्यात् परब्र. २२
बहिःसर्वसमाचारो लोकेविहर विज्वरः महो. ६।६७

बहिःसूत्रं त्यजेद्विद्वान्योगमुत्तम-
मास्थितः । ब्रह्मभावमिदं सूत्रं
धारयेद्यः स चेतनः [ब्रह्मो. ९+ ना. प. ३।८०

बहिःसूत्रं त्यजेद्विप्रो योगविज्ञान-
तत्परः । ब्रह्मभावमिदं सूत्रं
धारयेद्यः स मुक्तिभाक् परब्र. ११

बहुधा विश्वतोमुखम् भ.गी. ९।१५

बहुनाऽत्र किमुक्तेन गोपीचन्दन-
मण्डनम् । न तत्तुल्यं भवेल्लोके
नात्र कार्या विचारणा गोपीचं. २१

बहु वा इव ५ सुप्तस्य वा जाग्रतो
वा रेतः स्कन्दति बृह. ६।४।४

बहुशाखा ह्यनन्ताश्च भ.गी. २।४१

बहुशास्त्रकथाकन्थारोमन्थेन वृथैव
किम् । अन्वेष्टव्यं प्रयत्नेन मारुते
ज्योतिरान्तरम् मुक्ति. २।६३

बहुशोभमानामुमां हैमवतीं ता ५ होवाच
किमेतद्यक्षमिति केनो. ३।१२

बहु स्यां प्रजायेय [छां.उ.६।२।३+
[तैत्ति. २।६+ शांडि.३।१।३

बहूदकस्य स्वर्गलोकः [ना.प.५।९+ १सं.सो.२।५९

बहूदकस्याऽसंक्लृप्तं माधुकरम् ना. प. ५।७

बहूदकः शिखादिकन्थाधरस्त्रिपुण्ड्र-
धारी कुटीचकवत्सर्वसमो मधुकर-
वृत्त्याऽष्टकवलाशी [ना.प.५।५+ १सं.सो.२।१४

(अथ) बहूदका नाम त्रिदण्ड-कम-
ण्डलु-शिखा-यज्ञोपवीत-काषाय-
वस्त्रधारिणो ब्रह्मर्षिगृहे मधुमांसं
वर्जयित्वाऽष्टौ ग्रासान्भैक्षाचरणं
कृत्वा योगमार्गे मोक्षमेव प्रार्थयन्ते भिक्षुको. २

बहूदकास्त्रिदण्डकमण्डलुशिक्यपक्ष-
जलपवित्रपात्रपादुकासनशिखा-
यज्ञोपवीत-कौपीन-काषायवेष-
धारिणः साधुवृत्तेषु ब्राह्मणकुलेषु
भैक्षाचर्यं चरन्त आत्मानं प्रार्थयन्ते आश्रमो. ४

बहूदको हंसत्वमवलम्ब्य...तुरीयातीत-
तावधूतवेषेणाद्वैतनिष्ठापरः प्रण-
वात्मकत्वेन देहत्यागं करोति यः
सोऽवधूतः तुरीया. ३

बहूदरं बहुदंष्ट्राकरालं भ.गी.११।२३

बहूनामेमि प्रथमो बहूनामेमि मध्यमः ।
कि ५ स्विद्यमस्य कर्तव्यं यन्मयाऽद्य
करिष्यति कठो. १।५

बहूनि पुण्यानि कृतानि येन तेनैव
लभ्यः परमेश्वरोऽसौ शरभो. २

बहूनि मे व्यतीतानि भ.गी.४।५

बहून्यदृष्टपूर्वाणि भ.गी.११।६

बह्वश्वामिन्द्रगोमतीम् चित्र्यु.१।१।६,

बह्वहं चरन्ती परिचरन्ती परिचारिणी
यौवने त्वामलभे साऽहमेतन्न वेद
यद्गोत्रस्त्वमसि जबाला तु नामाऽह-
मस्मि सत्यकामो नाम त्वमसि छांदो.४।४।२

बह्वीं प्रजां जनयन्तीं ५ सरूपाम् ।
अजो ह्येको जुषमाणोऽनुशेते महाना.८।४५

बह्वीः प्रजा असृजत मैत्रा. २।६

बह्वीः प्रजा पुरुषात्सम्प्रसूताः मुण्ड. २।१।५

बह्वीः सन्धा अतिक्रम्य दिवि प्रह्लादीन-
तृणवहमन्तरिक्षे पौलोमान्पृथिव्यां
कालकाश्यांस्तस्य मे तत्र न लोम
च नामीयते कौ. त. ३।१

बह्वृचाख्यब्रह्मविद्यामहाखण्डार्थ-
वैभवम् । अखण्डानन्दसाम्राज्यं
रामचन्द्रपदं भजे बह्वृच.शीर्षकं

बह्वयः स्याम प्रजायेमहि छांदो.६।२।४

बाधियं महानुपचय इवेदं नावहेलनया
भवितव्यमेवं दृढवैराग्याद्बोधो भवति महो. ४।२६

बालस्वभावोऽसङ्गो निरवद्यो मौनेन
पाण्डित्येन निरवधिकारतयो-
पलभ्येत कैवल्यमुक्तं निगमनं सुबालो.१३।१

बालं प्रमाद्यन्तं वित्तमोहेन मूढं कठो.२।६

बालाग्रमात्रं हृदयस्य मध्ये विश्वं देवं
जातरूपं वरेण्यम् । तमात्मस्थं येऽनु-
पश्यन्ति धीरास्तेषां शान्तिर्भवति
नेतरेषाम् बटुको. १

बालाश्च कुलवृद्धाश्च निर्दहन्त्यवमानिताः इतिहा. २१

बालैर्बद्धस्तु लोकोऽयं मुसलेनाभिहन्यते शिवो.७।१०४

बालोन्मत्तपिशाचवदनुन्मत्तोन्मत्तवदाचरंस्त्रिदण्डं शिक्यं पात्रं कमण्डलुं कटिसूत्रं कौपीनं च परित्यज्य...जातरूपधरश्चरेदात्मानमन्विच्छेत् — ना. प. ३।८७
बालोन्मत्तपिशाचवन्मरणं जीवितं वा न काङ्क्षेत कालमेव प्रतीक्षेत निर्देशमृतकन्यायेन परिव्राडिति — ना.प. ५।१५
बालो बालेषु वृद्धेषु वृद्धो धीरेषु धैर्यवान्। युवा यौवनवृत्तेषु दुःखितेषु सुदुःखधीः — अ.पू.२।३०
बाल्यमल्पदिनैरेव यौवनश्रीस्ततो जरा। देहेऽपि नैकरूपत्वं काऽऽस्था बाह्येषु वस्तुषु — भवसं. १।२१
बाल्यं च पाण्डित्यं च निर्विद्याथ-मुनिरमौनं मौनं च निर्विद्य... — बृह. ३।५।१
बाल्येन तिष्ठासेत् — सुबालो.१३।१
बाल्येनैव हि तिष्ठासेन्निर्विद्य ब्रह्मवेदनम्। ब्रह्मविद्यां च बाल्यं च निर्विद्य... मुनिरात्मवान् [अ. पू. ४।३८+ — शाट्याय. २४
बाहू राजन्यः कृतः [ऋक्सं. — मं.१०।९०।१२
[वा.सं. ३१।११+सुबा.१।४+ — चित्सु. १२।५
बाह्यचिन्ता न कर्तव्या तथैवान्तरचिन्तिका। सर्वचिन्तां परित्यज्य चिन्मात्रपरमो भव।(सर्वचिन्तां समुत्सृज्य स्वस्थो भव सदा ऋभो) [शांडि. १।७।२०+ — वराहो.२।४४
बाह्यज्ञाने विनष्टे च ततः सर्वसमो भवेत् — अमन. १।२१
बाह्यप्रणव आर्षप्रणवः, उभयात्मको विराट्प्रणवः — ना. प. ८।१
बाह्यवदान्तरेऽप्यात्मनश्चक्षुःसंयोगेनैव रूपग्रहणकार्योदयात् — अद्वयता. ६
बाह्यस्थविषयं सर्वं रेचकः समुदाहृतः। पूरकं शास्त्रविज्ञानं कुम्भकं स्वगतं स्मृतम् — वराहो. ५।५८
बाह्यस्पर्शेष्वसक्तात्मा — भ. गी. ५।२१
बाह्यस्याभ्यन्तरे कालानलसदृशं पराकाशम् — मं.ब्रा. ४।१

बाह्यं प्राणं समाकृष्य पूरयित्वोदरेण च। नासाग्रे नाभिमध्ये च पादाङ्गुष्ठे च धारयेत् — जा.द. ६।२२
बाह्यात्प्राणं समाकृष्य पूरयित्वोदरे स्थितम्। नाभिमध्ये च नासाग्रे पादाङ्गुष्ठे च यत्नतः। धारयेन्मनसा प्राणं सन्ध्याकालेषु वा सदा। सर्वरोगविनिर्मुक्तो भवेद्योगी. — शां. १।७।४३
बाह्यात्माऽन्तरात्मा परमात्मा च — १ आत्मो. १
बाह्यादापूरणं वायोरुदरे पूरको हि सः — जा.द. ६।१२
बाह्यान्ततारकाकारं व्योमपञ्चकविग्रहम्। राजयोगैकसंसिद्धं रामचन्द्रमुपास्महे — मं.ब्रा. शीर्षकं
बाह्याभ्यन्तरमन्धकारमयमाकाशम् — मं. ब्रा. ४।१
बाह्याभ्यन्तरवीक्षणाद्विस्फुटतमः स परस्ताद्भूतैष दृष्टोऽदृष्टोऽव्यवहार्योऽप्यल्पोनाल्पःसाक्ष्यविशेषोऽनन्यो सुखदुःखोऽद्वयः परमात्मा — नृसिंहो. ९।७
(एवं) बाह्याभ्यन्तरस्थव्योमपञ्चकं तारकलक्ष्यम् — अद्वयता. ४
बाह्याभ्यन्तःकरणानां रूपग्रहणयोग्यतास्त्वित्यावाहनम् — भावनो. ८
बाह्यार्चनं परिहरेदपुनर्भवाय — मैत्रे. २।२६
बाह्यार्थवासनोद्भूता तृष्णा बद्धेति कथ्यते। सर्वार्थवासनोन्मुक्ता तृष्णा मुक्तेति भण्यते — महो. ६।५०
बाह्वोः क्षत्रं (अजायत) — ग. शो. ३।११
बिन्दुनादकलाज्योतीरवीन्दुध्रुवतारकम्। शान्तं च तदतीतं च परं ब्रह्म तदुच्यते — यो.शि. ६।८६
बिन्दुनादसमायुक्तमग्निबीजं विचिन्तयेत्। पश्चाद्विरेचयेत्सम्यक्प्राणं.. — जा. द. ५।८
बिन्दुनादमहालिङ्गविष्णुलक्ष्मीनिकेतनम्। देहं विष्ण्वालयं प्रोक्तं सिद्धिदं सर्वदेहिनाम् — यो.शि. ५।४
बिन्दुनादात्मकं बीजं वह्निसोमकलात्मकम् — रामर. ५।९
बिन्दुमूलशरीराणिशिरास्तत्रप्रतिष्ठिताः — यो. चू. ५६
बिन्दुरीशानः — ना.पू.ता.१।३

बुद्धियुक्तो जहातीह भ.गी.२।५०
बुद्धियोगमुपाश्रित्य भ.गी.१८।५७
बुद्धियोगाद्धनञ्जय भ.गी.२।४९
बुद्धिरध्यात्मं, बोद्धव्यमधिभूतं, ब्रह्मा तत्राधिदैवतम्... सुबालो. ५।७
बुद्धिरव्यक्तमेव च भ.गी.१३।६
बुद्धिरुदानयोगेन चक्षुर्द्वारा रूपगुणः पादाधिष्ठितोऽग्नौ तिष्ठति.. त्रि. ब्रा.१।६
बुद्धिर्ज्ञानमसम्मोहः भ.गी.१०।४
बुद्धिर्धृतिः स्मृतिः प्रज्ञानमित्येके मैत्रा.६।३१
बुद्धिर्बुद्धिमतामस्मि भ.गी.७।१०
बुद्धिर्मनोऽहङ्कार इति चेतनवत्येषा मैत्रा. ६।५
बुद्धिर्यस्य न लिप्यते भ.गी.१८।१७
बुद्धिर्योगे त्विमां शृणु भ.गी.२।३९
बुद्धिर्वाऽन्नमव्यक्तमन्नादं सुबालो.१४।१
बुद्धिर्व्यतितरिष्यति भ.गी.२।५२
बुद्धिश्च बोद्धव्यं च नारायणः सुबलो. ६।१
बुद्धिं तु सारथिं विद्धि मनः प्रग्रहमेव च [कठो. ३।३+ पैङ्गलो. ४।१
बुद्धिं मोहयसीव मे भ.गी.३।२
बुद्धिः पत्नी (शारीरयज्ञस्य) प्रा.हो.४।१
बुद्धिः पर्यवतिष्ठते भ.गी. २।६५
बुद्धिः सा पार्थ तामसी भ.गी.१८।३२
बुद्धिः सा पार्थ राजसी भ.गी.१८।३१
बुद्धिः सा पार्थ सात्त्विकी भ.गी.१८।३०
बुद्धीन्द्रियाणि यज्ञपात्राणि [गर्भो.११+ प्रा. हो.४।३
बुद्धीन्द्रियाणि यानीमान्येतान्यस्य रश्मयः मैत्रा. २।९
बुद्धेरात्मा महान्परः कठो. ३।१०
बुद्धेर्गुणेनात्मगुणेन चैव आराग्रमात्रो-ऽप्यपरोऽपि दृष्टः श्वेताश्व. ५।८
बुद्धेर्भेदं धृतेश्चैव भ.गी.१८।२९
बुद्धेःपूर्णविकासोऽयंजागरःपरिकीर्त्यते वराहो. २।६०
बुद्धौ शरणमन्विच्छ भ.गी. २।४९
बुद्ध्या धृतिगृहीतया भ.गी. ६।२५
बुद्ध्या बुद्ध्यति, मनसा सङ्कल्पयति, वाचा वदति गर्भो. १
बुद्ध्या युक्तो यया पार्थ भ.गी. २।३९
बुद्ध्या बुध्यति, चित्तेन चेतयत्य-हङ्कारेणाहङ्करोति ना. प. ६।४
बुद्ध्या विशुद्धया युक्तः भ.गी.१८।५१
बुद्ध्या सञ्चितं स्थापयित्वा तु रुद्रे अ.शिरः. ३।९
बुद्ध्याऽनिमित्ततां सत्यां हेतुं पृथगनाप्नुवन् । वीतशोकं तथा काममभयं पदमश्नुते अ. शां. ७८
बुद्ध्वा पदमनानात्वं नमस्कुर्मोयथाबलम् अ.शां. १००
बुद्बुदादिविकारान्तस्तरङ्गः सागरेयथा आ. प्र. १५
बुद्बुदादण्डमभवत् गायत्रीर. १
बुधा भावसमन्विताः भ.गी.१०।८
बुधो बालकवत्क्रीडेत्कुशलो जडवच्चरेत् । वदेदुन्मत्तवद्विद्वान्गोचर्यां नैगमश्चरेत् ना.प.५।२८
बृहच्च तद्दिव्यमचिन्त्यरूपं सूक्ष्माच्च तत्सूक्ष्मतरंविभाति [मुण्ड.३।१।७+ गुह्यका. ३७
बृहज्जाबालाभिधां मुक्तिश्रुतिं ममोपदेशं कुरुष्व बृ. जा. १।४
बृहज्ज्योतिःकरिष्यतः सविता प्रसुवातितान् श्वेताश्व.२।३
बृहज्ज्योतिषं त्वासादयामि चित्यु.१९।१
बृहतीमभिसम्पादयेदेष वै कृत्स्न आत्मा यद्बृहती १ऐत.३।५।३
(एवमेव) बृहती सर्वतः छन्दोभिः शरीरैः परिवृता १ऐत. ३।५।४
बृहत्तिथिर्देश पञ्चच नित्यासषोडशीकं पुरमध्यं बिभर्ति त्रिपुरो. १०
बृहत्पाण्डरवासः सोमराजन्निति कौ.त. ४।१८
बृहत्पाण्डरवासा अतिष्ठाः सर्वेषां भूतानां मूर्धेति कौ. त. ४।२
बृहत्पाण्डरवासाः सोमो राजेति वा बृह. २।१।३
बृहत्पाण्डुरवासाः सोमो राजेति (मा. पा.) बृ.उ. २।१।३
बृहत्साम तथा साम्नां भ.गी.१०।३५
बृहद्बृहद्वनं मधोर्मधुवनं तालस्तालवनं काम्यं काम्यवनं बहुला बहुलवनं कुमुदः कुमुदवनं खदिरः खदिरवनं भद्रो भद्रवनं भाण्डीर इति भाण्डीरवनं श्रीवनं लोहवनं वृन्दावनमेतैरावृता पुरी भवति (मथुरा) गोपालो.१।१६

बृहद्रथन्तरयो रूपेण संहिता सन्धीयते
इति तार्क्ष्यः ३ऐत.१।६।१
बृहद्रथन्तरे अनूच्ये भद्रयज्ञायज्ञीये कौ.त. १।५
बृहद्रथन्तरे सामनी पूर्वौ पादौ भ्यैत कौ. त. १।५
(ॐ) बृहद्रथो (ह) वै नाम राजा
राज्ये ज्येष्ठं पुत्रं निधापयित्वेदम-
शाश्वतं मन्यमानः शरीरं वैराग्य-
मुपेतोऽरण्यं निर्जगाम [मैत्रा.१।१ +मैत्रे. १।१
बृहन् पाण्डरवासः सोमराजन्निति बृह.२।१।१५
बृहस्पतिरुपवक्ता चित्त्युप.२।१
बृहस्पतिर्वै शुक्रो भूत्वेन्द्रस्याभयाया-
सुरेभ्यः क्षयायेमामविद्यामसृजत् मैत्रा. ७।९
बृहस्पतिः पुरोधया चित्त्यु. ८।२
बृहस्पते अति यदर्यो अर्हाद्युमद्विभाति
क्रतुमज्जनेषु। यद्दीदयच्छवस ऋत
प्रजात तदस्मासु द्रविणं धेहि चित्रम् वनदु. ३१
[ऋ.मं.२।२३।१५+वा.सं.२६।३
[+तै. सं. १।८।२२।२
बृहस्पते न परः साम्नो विदुः ३ऐत.१।५।४
बोद्धव्यमेवाप्येति यो बोद्धव्यमेवास्तमेति सुबालो. ९।१
बोद्धव्यं च विकर्मणा भ.गी. ४।१७
बोद्धा भवति कर्ता भवति विज्ञाता
भवत्यन्नमुपास्स्वेति छांदो.७।९।१
बोधचन्द्रमसि पूर्णविग्रहे मोहराहुमु-
षितात्मतेजसि। स्नानदानयजना-
दिकाः क्रिया मोचनावधि वृथैव
तिष्ठते वराहो.२।७४
बोधयन्तः परस्परम् भ.गी.१०।९
बोधयन्तीं त्वासादयामि चित्त्यु.१९।१
बोधस्योपरतिः फलम् अध्यात्मो.२८
बोधानन्दमयानन्तधूपदीपावलिभिरति-
शोभितं...निरतिशयाद्वैतपरमा-
नन्दलक्षणमादिनारायणं ध्यायेत् त्रि.म.ना.७।१२
बोधानन्दमयानन्तपरमविलासविभूति-
विशेषसमष्टिमण्डल..चिद्रूपादित्य-
मण्डलं द्वात्रिंशद्व्यूहभेदैरधिष्ठितम् त्रि.म.ना.७।८
बोधानन्दमयै-रनन्तनित्यपरिजनैः
परिसेविता श्रीसखीमेवं लक्ष्मीं
ध्यात्वा...बोधानन्दवनं प्राप्य...
यदेव ब्रह्मविद्यापादवैकुण्ठं सह-
स्रानन्दप्राकारैः समुज्ज्वलति त्रि.म.ना.६।८
बोधानन्दमयैरनन्तनित्यमुक्तैःपरिसेवितं शि. सा. ६
बोधानन्दमहोज्ज्वलम् शि.सा. ६
ब्रह्मकर्मसमाधिना भ.गी. ४।२४
ब्रह्मकर्म स्वभावजम् भ.गी.१८।४२
ब्रह्मकल्पवनामृतपुष्पवृष्टिभिः सन्तत-
मानन्दं ब्रह्मानन्दरसनिर्भरैरसंख्यै-
रतिमङ्गलं... निरतिशयाद्वैतपरमा-
नन्दलक्षणमादिनारायणं... त्रि.म.ना.७।१२
ब्रह्मकार्यमिति ज्ञात्वा ईशानं
प्रतिपद्यते पञ्चब्र. २२
ब्रह्म-कैवल्य-जाबाल-श्वेताश्वौ हंस
आरुणिः मुक्ति. १।३१
ब्रह्मक्षत्रादिकं सर्वं यस्य स्यादोदनंसदा पा. ब्र. ४४
वृणोति स नो दधातु ब्रह्माव्ययम् श्वेता. ६।१०

यस्तेजसि तिष्ठंस्तेजसोऽन्तरो यं
तेजो न वेद..स त आत्मा.. बृह. ३।७।१४
यस्तेजोऽन्तरे सञ्चरन्यं तेजो न वेद अध्यात्मो. १
यस्तेजो ब्रह्मेत्युपास्ते तेजस्वी वै स
तेजस्वतो लोकान्भास्वतोऽप-
हततमस्कानभिसिद्ध्यति छांदो.७।११।२
यस्ते मन्योऽविधद्वज्र सायक सह
ओजः पुष्यति विश्वमानुषक् वनदु. १००
[ऋ. मं. १०।८३।१+ अथ. ४।३२।१
यस्ते स्तनः शशयो यो मयो भूर्येन
विश्वा पुष्यसि वार्याणि । यो
रत्नधा वसुविद्यः सुदत्रः सर-
स्वति तमिह धातवे करिति बृह. ६।४।२७
[ऋ. मं.१।१६४।४९+ अथर्व. ७।१०।१
[+वा. सं. ३८।५+ तै. आ. ४।८।२
यस्ते स्व इतरो देवयानात् चित्स्यु. १५।२
यस्त्वचमन्तरो यमयत्येष त
आत्माऽन्तर्याम्यमृतः बृह. ३।७।२१
यस्त्वचि तिष्ठंस्त्वचोन्तरो यं
त्वङ्न वेद यस्य त्वक् शरीरं.. बृह. ३।७।२१
यस्त्वचि यः स्पर्शयितव्ये यो वायौ
यो नाड्यां सोऽयमात्मा सुबालो. ५।५
यस्त्वधीते वा स सर्वपातकेभ्यः
पूतो भवति वासुदे. १७
यस्त्वमसि सोऽहमस्मि कौ. उ. १।६
यस्त्वविज्ञानवान्भवत्यमनस्कः सदा-
ऽशुचिः । न स तत्पदमाप्नोति
संसारं चाधिगच्छति कठो. ३।७
यस्त्वविज्ञानवान् भवत्ययुक्तेन
मनसा सदा । तस्येन्द्रियाण्य-
वश्यानि दुष्टाश्वा इव सारथेः कठो. ३।५
यस्त्वं भूत्वा पर्जन्यो विसेति पारमा. ३।१
यस्त्वात्मरतिरेव स्यात् भ. गी. ३।१७
यस्त्विन्द्रियाणि मनसा भ. गी. ३।७
यस्त्विमा अव्यतीरेवोपास्ते न परां.. आर्षे. ८।३
यस्त्वेवंविद्वाऽधीते सोऽप्येवमेव भवति का.रुद्रो. ५
यस्त्वेतमेवं प्रादेशमात्रमभिविमान-
मात्मानं वैश्वानरमुपास्ते स सर्वेषु

लोकेषु सर्वेषु भूतेषु सर्वेष्वात्म-
स्वन्नमत्ति छांदो. ५।१८।१
यस्त्वेतर्हि ब्रूयान्मूर्धाते विपतिष्यतीति छांदो. १।८।६
यस्त्वेनं परमतीवोद्यन्तं पश्य-
न्नुपास्ते पापीयान्भवति आर्षे. ६।३
यस्त्वेनं परमनूद्यन्तं वेदाथ ह्यथोपास्ते
परं ज्योतिरुपसम्पद्यते सर्वमायु-
रेति वसीयान्भवति आर्षे. ६।३
यस्त्वेवं विजानीयात्स नारायण-
सायुज्यमवाप्नोति ऊर्ध्वपुं. ६
यस्त्वेवं ब्राह्मणो विद्यात् चित्यु. १३।२
यस्त्वेवोभयमंतरेणाहतस्य वात्स्युपवादः ३ ऐत. १।३।१
यस्मा एवमुपतिष्ठतेऽहमदःप्रापमिति गायत्र्यु. ५
[बृ. उ. ५।१४।७+
यस्माक्षरमतीतोऽहं भ.गी. १५।१८
यस्माच्च बृहति बृंहयति च सर्वं
तस्मादुच्यते परं ब्रह्म शांडि. ३।२।१
यस्माच्छन्दोभिश्छन्नस्तस्माच्छंदांसी-
त्याचक्षते १ ऐत. १।६।१
यस्माच्छिवः सुसम्पूर्णः सर्वज्ञः
सर्वगः प्रभुः । तस्मात्स पाश-
रहितः स विशुद्धः स्वभावतः शिवो. १।१५
यस्माच्छ्रोत्रत्वगक्ष्यादि खादिकर्मे-
न्द्रियाणि च । व्यावृत्तानि परं
प्राप्तुं न समर्थानि तानि तु कठरु. ३३
यस्माज्जातमिदं विश्वं यस्मिन्नेव
विलीयते । स एव भगवान्
विष्णुः शास्ता सर्वेश्वरेश्वरः भवसं. ५।१५
यस्माज्जातो भगात्पूर्वं तस्मिन्नेव
भगे रमन्.. यो. त. १३२
यस्माज्ज्ञानोपदेशार्थं गुरुरास्ते
सदाशिवः शिवो. ७।४५
यस्मात्तदुपदेष्टाऽसौ तस्माद्गुरुतरो
गुरुः [द्वयो. ७+ अद्वयता. १२
यस्मात्तेज आत्मीयं कृत्वा सर्वा-
नस्मान् पालयिष्यसि स्वाहा पारमा. २।९
यस्मात्परमपरं परायणं च बृहद्बृहत्या
बृंहयति तस्मादुच्यते परं ब्रह्म अ. शिरः. ३।५

यस्मात्परं नापरमस्ति किञ्चित्
यस्मान्नाणीयो न ज्यायोऽस्ति
कश्चित् । वृक्ष इव स्तब्धो दिवि
तिष्ठत्येकस्तेनेदं पूर्णं पुरुषेण
सर्वम् [श्वेता. ३।९+ महाना. ८।१३
यस्मात्प्रपञ्चः परिवर्ततेऽयम् श्वेता. ६।६
यस्मात्सर्वमाप्नोति सर्वमादत्ते सर्व-
मत्ति च तस्मादुच्यते आत्मा शांडि. ३।२।१
यस्मात्सर्वस्मात्पुरतः सुविभातो-
ऽतश्चिद्घन एव नृसिंहो. ८।५
यस्मात् सर्वेषां भूतानां वा वीर्यतमः
श्रेष्ठतमश्च सिंहो वीर्यतमः
श्रेष्ठतमश्च तस्मान्नृसिंहः... नृ. पू. २।९
यस्मात्सुदुश्चरं तपस्तप्यमानायात्रये
पुत्रकामायातितरां तुष्टेन
भगवता ज्योतिर्मयेनात्मैव दत्तो
यस्माच्चानसूयायामत्रेस्तनयो-
ऽभवत्तस्मादुच्यते दत्तात्रेय इति शांडि. ३।२।१
यस्मात्स्वमहिम्ना सर्वांल्लोकान्सर्वा-
न्देवान्सर्वानात्मनः सर्वाणि
(भूतानि) स्वतेजसा ज्वलति
ज्वालयति ज्वाल्यते ज्वालयते...
तस्मादुच्यते ज्वलन्तम् नृ. पू. २।७
यस्मात्स्वमहिम्ना..सर्वानात्मनः
सर्वाणि भूतान्युद्गृह्यात्यजस्रं
सृजति तस्मादुच्यत उग्रम् नृ. पू. २।४
यस्मात्स्वमहिम्ना सर्वांल्लोकान्स-
र्वान्...विरमति विरामयत्यजस्रं
सृजति विसृजति वासयति
यतो वीरः कर्मण्यः सुदक्षो
युक्तग्रावा जायते नृ. पू. २।५
यस्मात्स्वमहिम्ना सर्वांल्लोकान्...
व्याप्नोति व्यापयति..तस्मादुच्यते
महाविष्णुम् नृ. पू. २।६
यस्मात्स्वमहिम्ना स्वभक्तानां स्मृत
एव मृत्युमपमृत्युं च मारयति.. नृ. पू. २।१२
यस्मात्स्वमहिम्ना...स्वयमनिन्द्रि-
योऽपि सर्वतः पश्यति..तस्मा-
दुच्यते सर्वतोमुखम् नृ. पू. २।८

यस्मात्स्वयं भद्रो भूत्वा सर्वदा भद्रं ददाति..तस्मादुच्यते भद्रम् — नृ. पू. २।११

यस्मादर्वाक्संवत्सरोऽहोभिः परिवर्तते । तद्देवा ज्योतिषां ज्योतिरायुर्होपासतेऽमृतम् — बृह. ४।४।१६

यस्मादुक्तो दर्शनाग्निर्नाम चतुराकृतिराहवनीयो भूत्वा मुखे तिष्ठति — प्रा. हो. २।४

यस्मादुच्चारितमात्र एव सर्वं शरीरं विद्योतयति तस्मादोमित्यनेनैतदुपासीतापरिमितं तेजः — मैत्रा. ७।११

यस्मादुच्चार्यमाण एव ऋग्यजुस्सामाथर्वाङ्गिरसं ब्रह्म ब्राह्मणेभ्यः प्रणामयति नामयति च तस्मादुच्यते प्रणवः — अ. शिरः. ३।५

यस्मादुच्चार्यमाण एव क्रन्दते क्लामयति च तस्मादुच्यते शुक्लम् — अ.शिरः. ३।५

यस्मादुच्चार्यमाण एव गर्भजन्मव्याधिजरामरणसंसारमहाभयात्तारयति त्रायते च तस्मादुच्यते तारम् — अ. शिरः. ३।५

यस्मादुच्चार्यमाण एवं तिर्यगूर्ध्वमधस्ताच्चास्यान्तो नोपलभ्यते तस्मादुच्यतेऽनन्तः — अ. शिरः. ३।५

यस्मादुच्चार्यमाण एव प्राणानूर्ध्वमुत्क्रामयति तस्मादुच्यते ॐकारः — अ. शिरः. ३।५

यस्मादुच्चार्यमाण एव व्यक्ते महति तमसि द्योतयति तस्मादुच्यते वैद्युतम् — अ.शिरः. ३।५

यस्मादुच्चार्यमाण एव सर्वांल्लोकान्व्याप्नोति स्नेहो यथा पललपिण्डमिव शान्तरूपमोतप्रोतमनुप्राप्तो व्यतिषक्तश्च तस्मादुच्यते सर्वव्यापी — अ. शिरः. ३।५

यस्मादुच्चार्यमाण एव सूक्ष्मो भूत्वा शरीराण्यधितिष्ठति सर्वाणि चाङ्गान्यभिमृशति तस्मादुच्यते सूक्ष्मं — अ. शिरः.३।५

यस्मादुत्पद्यते वायुर्यस्माद्वह्निः प्रवर्तते । यस्मादुत्पद्यते बिन्दुर्यस्मान्नादः प्रवर्तते । यस्मादुत्पद्यते हंसो यस्मादुत्पद्यते मनः ॥ तदेतत्कामरूपाख्यं पीठं कामफलप्रदम् [यो. शि. १।१७०+ — ९।६

यस्मादुत्पद्यते वायुर्यस्माद्वह्निः प्रवर्धते । यस्मादुत्पद्यते बिन्दुर्यस्मान्नादः प्रवर्धते ...मूलाधारादिषट्चक्रं शक्तिस्थानमुदीरितम् — वराहो. ५।५१।५२

यस्मादुत्पद्यते सर्वं यस्मिन्सर्वं प्रतिष्ठितम् । यस्मिन्विलीयते सर्वं परं तत्त्वं तदुच्यते — अमन. १।१०

यस्मादृषिभिर्नान्यैर्भक्तैर्द्रुतमस्य रूपमुपलभ्यते तस्मादुच्यते रुद्रः — अ. शिरः. ३।५

यस्माद्बीजसम्भवो हि पशवस्तस्माद्बीजं भोज्यमनेनैव प्रधानस्य भोज्यत्वं व्याख्यातम् — मैत्रा. ६।१०

यस्माद्भक्ता ज्ञानेन भजन्त्यनुगृह्णाति च वाचं संसृजति विसृजति च सर्वान्भावान्परित्यज्यात्मज्ञानेन योगैश्वर्येण महति महीयते तस्मादुच्यते भगवान्महेश्वरः — अ. शिरः. ३।७

यस्माद्भिक्षुर्हिरण्यं रसेन ग्राह्यं चेत्स आत्महा भवेत् — प. हं. ९

यस्माद्भिक्षुर्हिरण्यं रसेन दृष्टं चेत्स ब्रह्महा भवेत् — प. हं. ९

यस्माद्भिक्षुर्हिरण्यं रसेन स्पृष्टं चेत्स पौल्कसो भवेत् — प. हं. ९

यस्माद्भीषणं यस्य रूपं दृष्ट्वा सर्वे लोकाः सर्वे देवाः सर्वाणि भूतानि भीत्या पलायन्ते.. — नृ. पू. २।१०

यस्माद्यं सर्वे देवा नमन्ति मुमुक्षवो ब्रह्मवादिनश्च.. — नृ. पू. २।१३

यस्माद्वाचो निवर्तन्ते अप्राप्य मनसा सह । यन्मौनं योगिभिर्गम्यं तद्भजेत्सर्वदा बुधः — ते. बिं. १।२०

यस्माद्व्रतमिदं पाशुपतं यद्भस्मनाऽङ्गानि संस्पृशेत्तस्माद्ब्रह्म [अ. शिरः. ३।१२+ — वटुको. २४

यस्मान्न ऋते किञ्चन कर्म क्रियते तन्मे मनः...[१शिवसं.१+ — २शि. सं.४

यस्मान्न जातः परो अन्योऽस्ति नृ. पू. २।६
यस्मान्नोद्विजते लोकः भ.गी. १२।१५
यस्मान्नोद्विजते..हर्षामर्षभयोन्मुक्तः
स जीवन्मुक्त उच्यते वराहो. ४।२६
यस्मिञ्छान्तिः शमः शौचं सत्यं
सन्तोष आर्जवम् । अकिञ्चन-
मदम्भश्च स कैवल्याश्रमे वसेत् ना. प.३।२१
यस्मिन्काले स्वमात्मानं योगी जानाति
केवलम् । तस्मात्कालात्समारभ्य
जीवन्मुक्तो भवेदसौ वराहो. २।४२
यस्मिन्क्रोधं यां च तृष्णां क्षमां च
[अ. शिरः. ३।११+ वटुको. २३
यस्मिन् गता न निवर्तन्ति भूयः भ.गी.१४।१५
यस्मिन्गृहे विशेषेण लभेद्भिक्षां च
वासनात् । तत्र नो याति यो भूयः
स यतिर्नेतरः स्मृतः ना. प. ६।१४
यस्मिन्देवा अधिविश्वे निषेदुः
[श्वेता.४।८+महाना.१।२+ बह्वृ. ४
[ऋ. मं. १।१६४।३९
यस्मिन्द्यौः पृथिवी चान्तरिक्षमोतं
मनः सह प्राणैश्च सर्वैः । तमेवैकं
जानथ आत्मानमन्या वाचो
विमुञ्चथामृतस्यैष सेतुः मुण्ड. २।२।५
यस्मिन्नयमात्माऽधिक्षियन्ति भुवनानि
विश्वा सुबालो. २।१
यस्मिन्नयमात्मा स्वपिति शब्दानां
च करोति सुबालो. ४।३
यस्मिन्नहमुत्क्रान्ते उत्क्रान्तो भवि-
ष्यामि कस्मिन्वा प्रतिष्ठिते प्रति-
ष्ठास्यामीति प्रश्नो. ६।३
यस्मिन्नात्मा समतृप्यच्छ्रुतेषि...
सर्वयुजो भवन्ति १ ऐत. ३।८।४
यस्मिन्नासेऽन्वेव मा भगवः शाधीति छांदो. ४।२।४
यस्मिन्निदमोतं प्रोतं च शांडि. २।१।२
यस्मिन्निदं विचिकित्सन्ति मृत्यो
यत्साम्पराये महति ब्रूहि नस्तत् कठो. १।२९
यस्मिन्निदꣳसर्वमव्याप्नोतेनाव्यर्धइति बृ. उ. ३।९।९
यस्मिन्निदं सर्वमव्यप्नोत् (मा.पा.) बृ. उ. ३।९।९
यस्मिन्निदं सर्वमोतप्रोतं तस्माद्-
न्यन्नपरं किञ्चनास्ति [वटुको.२९+ अ.शिरः.३।१४
यस्मिन्निदं सं च विचैति सर्वं यस्मिन्
विज्ञाते सर्वमिदं विज्ञातं भवति शांडि. २।१।२
यस्मिन्निदं सं च विचैति सर्वम् ।
तमीशानं वरदं देवमीड्यं
निचाय्येमां शान्तिमत्यन्तमेति श्वेता. ४।११
यस्मिन्निदꣳ सं च विचैति सर्वं
यस्मिन्देवा अधिविश्वे निषेदुः ।
तदेव भूतं तदु भव्यमा इदं महाना. १।१
यस्मिन्निदꣳ सं च विचैति सर्वꣳ
ओतः प्रोतश्च विभुः प्रजासु महाना. २।३
यस्मिन्निन्द्रो वरुणो मित्रो अर्यमा
देवा ओकांसि चक्रिरे नृ. पू. २।१३
यस्मिन्नृचः साम यजूंषि यस्मिन्प्र-
तिष्ठिता रथनाभाविवाराः ।
यस्मिंश्चित्तं सर्वमोतं प्रजानां
तन्मे मनः.. [१ शिवसं. ५+ २ शि. सं. ६
यस्मिन्नेव पुरुषशरीरे विनाऽप्य-
ग्निहोत्रेण विनापि साङ्ख्य-
योगेन संसारविमुक्तिर्भवतीति प्रा. हो. १।१
यस्मिन् पञ्च पञ्चजना आकाशश्च
प्रतिष्ठितः । तमेव मन्य आत्मानं बृह. ४।४।१७
यस्मिन् प्राणः पञ्चधा संविवेश ।
प्राणैश्चित्तं सर्वमोतं प्रजानाम् मुण्ड. ३।१।९
यस्मिन् भावाः प्रलीयन्ते लीना-
श्चाव्यक्ततां ययुः मंत्रिको. १८
यस्मिन्युक्ता ब्रह्मर्षयो देवताश्च
तमेवं ज्ञात्वा मृत्युपाशांश्छिनत्ति श्वेताश्व. ४।१५
यस्मिँल्लयं याति पुरत्रयं च कैव.१४
यस्मिँल्लोका ओताश्च प्रोताश्च तस्य
हृत्पद्माज्जातोऽब्जयोनिः गोपालो. १।१४
यस्मिँल्लोका निहिता लोकिनश्च ।
तदेतदक्षरं ब्रह्म स प्राणस्तदु वाङ्मनः मुण्ड. २।२।२
यस्मिन्व उत्क्रान्त इदꣳ शरीरं
पापीयो मन्यते, स वसिष्ठ इति बृह. ६।१।७
यस्मिन्व उत्क्रान्ते शरीरं पापिष्ठ-
तरमिव दृश्येत स वः श्रेष्ठः छांदो. ५।१।७
यस्मिन्विज्ञाते सर्वमिदंविज्ञातंभवति शांडि. २।२

यस्मिन्विलीयते शब्दस्तत्परं ब्रह्म गीयते। धियं हि लीयते ब्रह्म सोऽमृतत्वाय कल्पते ब्र. वि. १३
यस्मिन् विशुद्धे विभवत्येष आत्मा मुण्ड. ३।१।९
यस्मिंश्च सर्वभूतानि प्रलयं यान्ति संक्षयम्। स मनः सर्वभूतानां प्रद्युम्नः परिपठ्यते ना. महो. २६
यस्मिंश्चित्तं सर्वमोतं प्रजानां तन्मे मनः ...[१ शिवसं.५ २शि. सं. ६
यस्मिन्सर्वमिदं प्रोतं ब्रह्म स्थावरजङ्गमम्। तस्मिन्नेव लयं यान्ति स्रवन्त्यः सागरे यथा मंत्रिको. १७
यस्मिन्सर्वाणि भूतान्यात्मैवाभूद्विजानतः। तत्र को मोहः कः शोक एकत्वमनुपश्यतः ईशा. ७
यस्मिन्सलीयतेशब्दस्तत्परंब्रह्मगीयते १प्रणवो. १३
यस्मिन्स्थितो न दुःखेन गुरुणाऽपि विचाल्यते [यो. शि. ३।१३+ भ. गी. ६।२२
यस्मिंस्तदहरं पुण्डरीकं कुमुदमिवानेकधा विकसितं [सुबालो.४।१+ १।१।१
यस्मिंस्तु पच्यते कालो यस्तं वेद स वेदवित् मैत्रा. ६।१५
यस्मै वा एतदन्नं तस्मा एतन्न दत्तम् छांदो. ४।३।६
यस्मै वासि तस्मै वासीत् यद्वाः स आर्तयत्सर्वमीशमाशिषे स्वाहा पारमा. १०।८
यस्य कटाक्षात्समुत्पन्नाः (ब्रह्मादयः) लोकानां ब्रह्माण्डानामुत्पत्तिस्थितिलयान् कुर्वन्ति सामर. ५५
यस्य कस्य च धर्मस्यग्रहेण भगवानसौ अ. शां. ८२
यस्य किञ्चिदहं नास्ति...सर्वत्रपरिपूर्णात्मा...आनंदरतिरव्यक्तः ...शुद्धचैतन्यरूपात्मा स जीवन्मुक्त उच्यते ते.बिं.४।४–७
यस्य किञ्चिद्बहिर्नास्ति किञ्चिदन्तः कियन्न च। अजीवात्मा न संशयः ते. बिं. ५।९
यस्य चक्षुः शरीरं यश्चक्षुरन्तरो यमयत्येषतआत्माऽन्तर्याम्यमृतः बृह. ३।७।१८
यस्य चन्द्रतारकं शरीरं यश्चन्द्रतारकमन्तरो यमयत्येष तआत्मा बृह. ३।७।१२
यस्य चात्मादिकाः संज्ञाः कल्पिता न स्वभावतः (परमात्मनः) महो. ४।५७
यस्य चाद्यपदाद्भूमिर्द्वितीयात्सलिलोद्भवः।...पञ्चमादम्बरोत्पत्तिस्तमेवैकं समभ्यसेत् गो. पू. ४।१
यस्य चित्तं न चित्ताख्यं चित्तं चित्तत्वमेव हि। तदेव तुर्यावस्थायां तुर्यातीतं भवत्यतः अ. पू. ५।४६
यस्य चित्तं शरीरं, यश्चित्तमन्तरे सञ्चरन्यं चित्तं न वेद [सुबालो. ७।१+ अध्यात्मो. १
यस्य चित्तं स्वपवनं सुषुम्नां प्रविशेदिह १ यो. त. ८३
यस्य चेच्छा तथाऽनिच्छा ज्ञस्य कर्मणि तिष्ठतः। न तस्य लिप्यते प्रज्ञा पद्मपत्रमिवाम्बुभिः महो. ५।१७३
यस्य छायामृतं यो मृत्युमृत्युः नृ. पू. २।१२
(अथ) यस्य जायायै जारः स्यात्तं चेद्विष्यात्...शरभृष्टीः प्रतिलोमाः सर्पिषाक्ता जुहुयात् बृह. ६।४।१२
यस्य ज्ञानमयी शिखा। स शिखीत्युच्यते विद्वान्नेतरे केशधारिणः [ब्रह्मो. १२+ ना. प. ३।८३
यस्य ज्ञानेन सर्वरहस्यं विदितं भवति त्रि .म. ना. ३।२
यस्य तमः शरीरं यस्तमोन्तरो यमयत्येष त आत्मा बृह. ३।७।१३
यस्य तेजः शरीरं, यस्तेजोऽन्तरे सञ्चरन्यंतेजोनवेद [सुबालो.७।१ +अध्यात्मो. १
यस्य तेजः शरीरं यस्तेजोन्तरो यमयत्येष त आत्माऽन्तर्याम्यमृत इत्यधिदैवतम् बृह. ३।७।१४
यस्य त्वक् शरीरं यः.. एषतआत्मा बृह. ३।७।२१
यस्य दिशः शरीरं यो...एषतआत्मा बृह. ३।७।१०
यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ। तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः [सुबालो. १६।२+ श्वेता. ६।२३ यो.शि. २।२२

यस्य देवे परा... स ब्रह्मवित्परं
प्रेयादिति वेदानुशासनम् शाट्या. ३७
यस्य देव्यां परा भक्तिर्यथादेव्यां
तथा गुरौ। तस्यैते कथिता ह्यर्थाः गुह्यका. ७६
यस्य देशं न जानाति नामगोत्रे
त्रिपूरुषम्। कन्यादानं पितृ-
श्राद्धं नमस्कारं च वर्जयेत् इतिहा. ६४
यस्य देहादिकं नास्ति यस्य ब्रह्मेति
निश्चयः। परमानन्दपूर्णो यः
स जीन्मुक्त उच्यते ते. बिं. ४।३
यस्य द्यौः शरीरं, यो...एष
त आत्माऽन्तर्याम्यमृतः बृह. ३।७।८
यस्य नाहंकृतो भावः भ. गी. १८।१७
यस्य नाहंकृतो भावो बुद्धिर्यस्य
न लिप्यते। कुर्वतोऽकुर्वतो
वापि स जीवन्मुक्त उच्यते वराहो. ४।२५
यस्य नाहंकृतो भावो बुद्धिर्यस्य न
लिप्यते। यः समः सर्वभूतेषु
जीवितं तस्य शोभते १ सं. सो. २।३९
यस्य पृथिवी शरीरं, यः पृथिवी-
मन्तरे सञ्चरन्यं पृथिवीनवेद.. सुबालो. ७।१
यस्य पृथिवी शरीरं यः पृथिवी-
मन्तरो यमयत्येष त आत्मा बृह. ३।७।३
यस्य प्रतापकल्पा उत्पन्ना ब्रह्म-
विष्णुरुद्रादयो देवाश्च
दिक्पालाः कोटिश उत्पद्य-
माना लीयमानाश्च भवन्ति सामर. ५
यस्य प्रथमपदाद्भूमिर्द्वितीयपदाज्जलं
तृतीयपदात्तेजश्चतुर्थपदाद्वायु-
श्चरमपदाद्व्योमेति गो. पू. ३।१२
यस्य प्रपञ्चमानं न ब्रह्माकारमपीह
न। अतीतातीतभावो यो
वैदेही मुक्त एव सः म. र. २०
यस्य प्राणः शरीरं यः प्राणमन्तरो
यमयत्येष त आत्माऽन्तर्याम्यमृतः बृह. ३।७।१६
यस्य प्राणो विलीनोऽन्तःसाधके
जीविते सति। पिण्डो न पतित-
स्तस्य चित्तं दोषैः प्रबाधते यो. शि. १।६४

यस्य बुद्धिः शरीरं, यो बुद्धिमन्तरे
सञ्चरन्यं बुद्धिर्न वेद
[सुबालो. ७।१+ अध्यात्मो. १
यस्य ब्रह्म च क्षत्रं चोभे भवत
ओदनः। मृत्युर्यस्योपसेचनं
क इत्था वेद यत्र सः कठो. २।२५
यस्य मनः शरीरं यो मनोऽन्तरो
यमयत्येष त आत्मा बृह. ३।७।२०
यस्य मनः शरीरं यो मनोऽन्तरे
सञ्चरन् यं मनो न वेद
[सुबालो. ७।१+ अध्यात्मो. १
यस्य मृत्युः शरीरं, यो मृत्युमन्तरे
सञ्चरन्यं मृत्युर्न वेद
[सुबालो. ७।१+ अध्यात्मो. १
यस्ययोनिंपरिपश्यन्तिधीरास्तस्मे.. २ शिवसं. १५
यस्य रेतः शरीरं यो रेतोऽन्तरो
यमयत्येष त आत्मा बृह. ३।७।२३
यस्य लिङ्गं प्रपञ्चं वा ब्रह्मैवात्मा
न संशयः ते. बिं. ५।१०
यस्य वर्णाश्रमाचारो गलितः
स्वात्मदर्शनात्। स वर्णाना-
श्रमान्सर्वानतीत्यस्वात्मनि स्थितः ना. प. ६।१८
यस्य वाक् शरीरं, यो वाचमन्तरो
यमत्येष त आत्मा बृह. ३।७।१७
यस्य वाङ्मनसी शुद्धे सम्यग्गुप्ते च
सर्वदा। स वै सर्वमवाप्नोति
वेदान्तोपगतं फलम् ना. प. ३।४०
यस्य वायुः शरीरं यो वायुमन्तरो
यमयत्येष त आत्मा बृह. ३।७।७
यस्य वायुः शरीरं, यो वायुमन्तरे
सञ्चरन् यं वायुर्न वेद
[सुबालो. ७।१+ अध्यात्मो. १
यस्य वाऽस्तं गतं चित्तं षड्विंशति
दिनानि वै। लभते जगदीशत्वं
येन विश्वगुरुर्भवेत् अमन. १।७०
यस्य विज्ञानं शरीरं यो विज्ञान-
मन्तरो यमयत्येष त आत्मा बृह. ३।७।२२

यस्य वेदश्च वेदी च विच्छिद्येते त्रिपूरुषम् । स वै दुर्ब्राह्मणो नाम सर्वकर्मबहिष्कृतः	इतिहा. ६५
यस्य वैकङ्कत्यग्निहोत्रहवणी भवति	महाना. १०।१३
यस्य वैतत्कर्म, स वेदितव्य इति	कौ. त. ४।१८
यस्य श्रवणेन सर्वबन्धाः प्रविनश्यन्ति	त्रि. म. ना. १।२
यस्य श्रोत्रं शरीरं यः श्रोत्रमन्तरो यमयत्येष त आत्मा	बृह. ३।७।१९
यस्य सङ्कल्पनाशः स्यात्तस्यमुक्तिः करे स्थिता	मं. ब्रा. २।६
यस्य सर्वाणि भूतानि शरीरं, यः सर्वाणि भूतान्यन्तरो यमयत्येष त आत्मा	बृह. ३।७।१५
यस्य सर्वे समारम्भाः	भ. गी. ४।१९
यस्य स्त्री तस्य भोगेच्छा निःस्त्रीकस्य क्व भोगभूः । स्त्रियं त्यक्त्वा जगत्त्यक्तं जगत्त्यक्त्वा सुखी भवेत् [महो.३।४८+	याज्ञव. १७
यस्य स्मरणमात्रेण सर्वपापैः प्रमुच्यते	विश्रामो. ११
यस्य स्यादद्धा न विचिकित्साऽस्तीति ह स्माह शाण्डिल्यः	छांदो. ३।१४।४
यस्य स्वं भवति, भवति हास्य स्वं	बृह. १।३।२५
यस्य हि सोमः प्राणा वाप्ययङ्कुरा एतद्ब्रह्म...	मैत्रा. ६।३५
यस्या अन्तो न विद्यते तस्मादुच्यतेऽनन्ता	देव्यु. २०
यस्याकाशः शरीरं, य आकाशमन्तरे सञ्चरन् यमाकाशो न वेद [सुबालो. ७।१+	अध्यात्मो. १
यस्याकाशः शरीरं, य आकाशमन्तरो यमयत्येष त आत्मा	बृह. ३।७।१२
यस्याक्षरं शरीरं, योऽक्षरमन्तरे सञ्चरन्यमक्षरं न वेद [सुबालो. ७।१+	अध्यात्मो. १
यस्या गाथा ब्रह्ममार्गं वदन्ति	राधिको. ५
यस्या ग्रहणं नोपलभ्यते तस्मादुच्यतेऽलक्ष्या	देव्यु. २०
यस्याग्निहोत्रमदर्शमपौर्णमासमचातुर्मास्यमनाग्रयणमतिथिवर्जितं च	मुण्ड. १।२।३
यस्याग्निहोत्रमदर्शमनाग्रयणम्(मा.पा.)	मुण्डको.१।२।३
यस्याग्निः शरीरं योऽग्निमन्तरो यमयत्येष त आत्मा	बृह. ३।७।५
यस्या जननं नोपलभ्यते तस्मादुच्यतेऽजा	देव्यु. २०
यस्याण्डकोशं शुष्ममाहुःप्राणमुल्बम्	चित्यु. ११।४
यस्यात्मरतिरेवान्तः कुर्वन् कर्मेन्द्रियैः क्रियाः । न वशो हर्षशोकाभ्यां स समाहित उच्यते	अ. पू. १।३७
यस्यादित्यः शरीरं य आदित्यमन्तरो यमयत्येष त आत्मा	बृह. ३।७।९
यस्यादौ भयाद्भगवानुक्तस्ते स्वयं...	पारमा. २।९
यस्यानाणीयोनज्यायोऽस्ति किञ्चित्	गुह्यका. ४६
यस्यानुभवपर्यन्ता बुद्धिस्तत्त्वे प्रवर्तते । तद्दृष्टिगोचराः सर्वे मुच्यन्ते सर्वपातकैः	वराहो. ४।४३
यस्यानुवित्तः..ऽस्मिन्सन्देहे गहने(मा.)	बृह.४।४।१३
यस्यानुवित्तः प्रति बुद्धआत्माऽस्मिन्सन्देहे गहने प्रविष्टः । स विश्वकृत्स हि सर्वस्य कर्ता	बृह. ४।४।१३
यस्यानृचस्तु भुङ्क्ते तस्य विद्धि ब्रह्मैव वित्तं पुरुषस्य केवलम्	इतिहा. ४४
यस्यान्तरिक्षं शरीरं योऽन्तरिक्षमन्तरोयमयत्येष त आत्मा	बृह. ३।७।६
यस्यान्तस्थानि भूतानि	भ. गी. ८।२२
यस्यान्नमिदं सर्वं नच योऽन्नं भवति	सुबालो.९।१५
यस्यापः शरीरं योऽपोऽन्तरे सञ्चरन्यमापो न विदुः [सुबा.७।१+	अध्यात्मो. १
यस्यापः शरीरं, योऽपोऽन्तरो यमयति, एष त आत्मा	बृह. ३।७।४
यस्यामतं तस्य मतं मतं यस्य न वेद सः । अविज्ञातं विजानतां...	केनो. २।३
यस्याव्यक्तं शरीरं, योऽव्यक्तमन्तरे सञ्चरन्यमव्यक्तं न वेद [सुबालो. ७।१+	अध्यात्मो. १

यस्यास्त्यद्वैतमात्मज्ञानं तदेव
यज्ञोपवीतम् प. हं. प. ११
यस्याहङ्कारः शरीरं, योऽहङ्कार-
मन्तरे सञ्चरन्यमहङ्कारो
न वेद [सुबालो.७।१+ अध्यात्मो. १
यस्यां जाग्रति भूतानि भ. गी. २।६९
यस्यां देवा अधिरुद्रा निषेदुः।
यस्तां न वेद किमृचा करिष्यति गुह्यका. ५३
यस्यां मज्जन्ति बहवो मनुष्याः कठो. २।३
यस्यां हिरण्यं विन्देयं गामश्वं
पुरुषानहम् [श्री. सू.२+ ऋ.खि. ५।८७।२
यस्यां हिरण्यं प्रभूतिं गावो
दास्योऽश्वान्...[श्री.सू.१५+ ऋ.खि.५।८७।१५
यस्याः परतरं नास्ति सैषा दुर्गा
प्रकीर्तिता। दुर्गात्संत्रायते
यस्माद्देवी दुर्गेति कथ्यते देव्यु. २२
यस्याः परं नापरमस्ति किञ्चित् गुह्यका. ४६
यस्याः स्वरूपं ब्रह्मादयो न
जानन्ति तस्मादुच्यतेऽज्ञेया देव्यु. २०
यस्येच्छा लोके वा प्रजायतिर्लोके
यस्मै वासितस्मैवासीत् यद्वाः
संज्ञातंयत्सर्वमीशमाशिषेस्वाहा पारमा. १०।८
यस्येच्छा विद्यते काचित् सा सिद्धिं
साधयत्यहो। निरिच्छोः परि-
पूर्णस्यनेच्छासम्भवति कचित् अ. पू. ४।७
यस्येदं जन्म पाश्चात्यं तमाश्वेव
महामते। विशन्ति विद्या
विमला मुक्ता वेणुमिवोत्तमम् महो. ६।१५
यस्येदं धीराः पुनन्ति कवयो
ब्रह्माणमेतं त्वा वृणुत इन्दुम्..
तन्मे मनः शिवसङ्कल्पमस्तु २ शिवसं. १६
यस्येदं मण्डलं भित्वा मारुतो
याति मूर्धनि। यत्र यत्र म्रिये-
द्वाऽपि न स भूयोऽभिजायते अ. ना. ३९
यस्यैता ब्रह्ममूर्तयो बृहद्ब्रह्माणं
ब्रह्म आदधान...स्वाहा पारमा. ३।१०
यस्यैतानि सुगुप्तानि जिह्वोपस्थोदरं
करः। सन्न्यसेदकृतोद्वाहो
ब्राह्मणो ब्रह्मचर्यवान् ना. प. २।१५

यस्यैव निश्चितो भावस्तस्य
मुक्तिर्न दूरतः शिवो. ७।३८
यस्यैवं परमात्माऽयं प्रत्यग्भूतः
प्रकाशितः। स तु याति च
पुम्भावं स्वयं साक्षात्परामृतम् जा. द. १०।८
यस्यैवं भवति क्षान्तिः सोऽमृत-
त्वाय कल्पते अ. शां. ९२
यस्यै वा एषां वै तेषामेवैतस्मिन्
पर्वण्यग्निमुपसमाधायैतयैवा-
वृता आज्याहुतीर्जुहोति कौ. त. २।४
यस्यैष आत्मा वृणुते तनूं स्वां तस्य
प्रसादेन हि तस्य लाभः २ देव्यु. २०
यस्योदावोऽयनुथमुचमुचैरुरुगाय
स्वाहा पारमा. १०।७
यस्योपरि त्वं मुनयो न पश्यन्ति
तस्मै मुख्याय विष्णवे स्वाहा पारमा. २।१
यस्योपरिष्टादधितिष्ठदात्मा सर्वोप-
रिष्टात्परमात्मा मुक्तं तं विरजं
नित्यमनु सम्पराय स्वाहा पारमा. १०।३
यस्योरुषु त्रिषु विक्रमणेष्वधिक्षि-
यन्ति भुवनानि विश्वा नृ. पू. २।९+
[ऋ. मं.१।१५४।२ ना. पू.ता. ४।७
यस्त्वेवोभयमन्तरेणाहतस्यनास्त्युपवादः श्वेतरे. १।४।१
यं कामं कामयते सोऽस्य सङ्कल्पा-
देवसमुत्तिष्ठतितेनसंपन्नो महीयते छांदो.८।२।१०
यं कामं कामयेत तं स एष एवं-
विदुद्गातात्मने वा यजमानाय वा.. बृह. १।३।२८
यं कामं कामयेत तमागायति
तद्धैतल्लोकजिदेव न हैवालो-
क्यताया आशाऽस्ति य एवमेत-
त्साम वेद बृह. १।३।२८
यं गत्वा चतुर्धा मुक्तयो द्वारे तिष्ठन्ति रामर. ५४
यं चिन्तयन्तो निगमान्तरूपं...तं
देवमुख्यं सुरतं भवाय स्वाहा पारमा. ९।७
यं जनपदं यं क्षेत्रभागं तं तमेवो-
पजीवन्ति छांदो. ८।१।५
यं ज्ञात्वा मुच्यते जन्तुरमृतत्वं च गच्छति कठो. ६।८
यं तदेतयावाचा व्याह्रियतेसत्यमिति कौ. त. १।६

यं त्वमात्मानमुपास्से तस्मात्त्वं बहु-
लोऽसि प्रजया च धनेन च छांदो.५।१५।१
यं त्वमात्मानमुपास्से तस्मात्तव बहु
विश्वरूपं कुले दृश्यते छांदो.५।१३।१
यं त्वमात्मानमुपास्से तस्मात्तव सुतं
प्रसुतमासुतं कुले दृश्यते छांदो.५।१२।१
यं त्वमात्मानमुपास्से तस्मात्त्वं
रयिमान्पुष्टिमानसि छांदो.५।१६।१
यं त्वमात्मानमुपास्से तस्मात्त्वां
पृथग्बलय आयन्ति पृथग्रथ-
श्रेणयोऽनुयन्ति छांदो.५।१४।१
यं त्वं पालनयाभिभूतं देवाः सर्वे
विचरन्ति ते देवास्त्वमेव सर्वे माया
मायैशते स्वाहा पारमा. २।१०
यं त्वं मनुष्याय हिततमं मन्यसे इति कौ. त. ३।१
यं देवाः परमं पवित्रं भविष्यन्त्या-
त्रिषु प्रणताः प्रधानाः पारमा. १।१०
यं द्विष्यात्, असावस्मै कामो मा
समृद्धीति वा बृह. ५।१४।७
यं नत्वा मुनयः सर्वे निर्विघ्नं यान्ति
तत्पदम् । गणेशोपनिषद्वेद्यं
तद्ब्रह्मैवास्मि सर्वगम् गणप.शीर्षकं
यं प्रविश्य भवन्तीह मुक्ता वै द्विज-
सत्तमाः । स वासुदेवो विज्ञेयः
परमात्मा सनातनः ना. महो. १४
यं प्राप्य न निवर्तन्ते भ. गी. ८।२१
यं भावं दर्शयेद्यस्य तं भावं स तु
पश्यति वैतथ्य. २९
यं मां स्मृत्वाऽगाधतः स्पर्शरहितापि
सर्वा सरिद्गाधा भवति गोपालो. १।२
यं मां स्मृत्वाऽगाधा गाधा भवति...
अपूतः पूतो भवति.. अव्रती
व्रती भवति.. अश्रोत्रियः
श्रोत्रियो भवति..सकामो
निष्कामो भवति गोपालो. १।२
यं यज्ञैर्मुनयो जुषन्ति पारमा. १।१०
यं यमन्तमभिकामो भवति यं कामं
कामयते सोऽस्य सङ्कल्पादेव
समुत्तिष्ठति छांदो.८।२।१०

यं यं क्रतुमधीते तेन तेनास्येष्टं भवति,
अग्नेर्वायोरादित्यस्य सायुज्यं
गच्छति सहवै. १९
यं यं जजान स उ गोपो अस्य चित्स्यु. १४।४
यं यं वापि स्मरन् भावं [ना.प.५।१० +भ.गी. ८।६
यं लब्ध्वा चापरं लाभं मन्यते
नाधिकं ततः [यो.शि.३।१३+ भ. गी. ६।२२
यं लोकं मनसा संविभाति विशुद्ध-
सत्त्वः कामयते यांश्च कामान् ।
तं तं लोकं जयते तांश्च कामां-
स्तस्मादात्मज्ञं ह्यर्चयेद्भूतिकामः मुण्ड. ३।१।१०
यं(यत्) लोहितं श्लेष्मा रेतस्ता आपः १ ऐत. ३।३।२
यं वाव सा यदिदमस्मिन्पुरुषे शरीर-
मस्मिन्हीमे प्राणाः प्रतिष्ठिताः छांदो. ३।१२।३
यं वाव सा येयं पृथिव्यस्यां ह्वीदं
सर्वं भूतं प्रतिष्ठितम् छांदो. ३।१२।२
यं विश्वरूपं परमात्मपुण्यं पारमा. ९।७
यं विष्णुर्नावपश्यति भस्मजा. २।१६
यं वै सोम्यैतमणिमानं न निभा-
लयस एतस्य वै सोम्यैषोऽणिम्न
एवं महान्यग्रोधस्तिष्ठति छांदो.६।१२।२
यं सन्न्यासमिति प्राहुः भ. गी. ६।२
यं सूरयो जपन्तो योगिनः सूक्ष्मैः
सुप्रदर्शनैः पश्यन्तीश्वराय स्वाहा पारमा. १।१०
यं स्मृत्वा मुक्ता अस्मात्संसाराद्भवंति गोपालो.१।१४
यं हि न व्यथयन्त्येते भ. गी. २।१५
यः कर्ता सोऽयं वै भूतात्मा करणैः
कारयिताऽन्तःपुरुषः मैत्रा. ३।३
यः कवित्वं निरातङ्कं भुक्तिमुक्ती च
वाञ्छति । सोऽभ्यर्च्यैनां दश-
श्लोक्या नित्यं स्तौति सरस्वतीम् सरस्व. ३१
यः कश्च शब्दो वागेव सा बृह. १।५।३
यः कश्चिदात्मानमद्वितीयं जातिगुण-
क्रियाहीनं...करतलामलकवत्सा-
क्षादपरोक्षीकृत्य...दम्भाहङ्का-
रादिभिरसंस्पृष्टचेता वर्तत एव-
मुक्तलक्षणः स एव ब्राह्मण इति व. सू. उ. ९
(अथ) यः कश्चिद्विद्वानपहतपाप्मा-
ध्यक्षोऽवदातमनास्तन्निष्ठ आवृत्त-

चक्षुः सोऽन्तरात्मा गत्या बहिरात्मनोऽनुमीयते — मैत्रा. ६।१
यः काममोहितः शूद्र्यां पुत्रमुत्पादयेद्द्विजः । यावदुत्पाद्यते भूमौ तावत्तिष्ठेत्सुदारुणे — इतिहा. २४
यः कारणानि निखिलानि तानि कालात्मयुक्तान्यधितिष्ठत्येकः — ना. प. ९।२
[श्वेताश्व. १।३+
यः कालं ब्रह्मेत्युपासीत कालस्तस्यातिदूरमपसरति — मैत्रा. ६।१४
यः कुं धरमाणः कुं धरतां कुं धरतामित्यवोचत् तां सानुमन्तो विदधत्स्वतेजसा तस्मै..स्वाहा — पारमा. ६।५
यः क्रौद्धव्येन क्रुद्धस्तिष्ठति सोऽतिवाचं च दीक्षयति — इतिहा. १०
यः परः स महेश्वरः [महाना.८।१७
[ना. उ. ता. १।२+ — शु. र.उ. ३।१८
यः पश्यति तथाऽऽत्मानं — भ.गी. १३।३०
यः पश्यति स पश्यति [भ.गी.५।५+ — १३।२८
यः पश्यतीन्द्रियबिलेऽविवशः प्रणवाख्यं प्रणेतारं...सोऽपि प्रणवाख्यः प्रणेता — मैत्रा. ६।२५
यः पश्यतीमां हिरण्मयवस्थात् — मैत्रा. ६।१
यः पाति सोममृतस्य नाभिं कालातिगः पाति विश्वं सदैव — २ देव्यु. २९
यः पादे, यो गन्तव्ये, यो विष्णौ, यो नाड्यां...सोऽयमात्मा — सुबालो. ५।१०
यः पादौ प्रोक्षति, यश्चक्षुषी, यश्चन्द्रमादित्यौ, यन्नाभिं तेन पृथिवी — आचम. १।५
यः पायौ, यो विसर्जयितव्ये, यो मृत्यौ, यो नाड्यां...सोऽयमात्मा — सुबालो. ५।१३
यः पार्थिवानि विममे रजांसि — ना.पू. ता. ४।४
[ऋ.मं.१।१५४।१+वा.सं.५।१८+
[तै. सं. १।२।१३।३+ — अथर्व.७।२६।१
यः पिता स पुनः पुत्रो यः पुत्रः स पुनः पिता — यो. त. १३३
यः पिबेदमृतं विद्वान् सकलं भद्रमश्नुते — शांडि. १।७।४७
यः पुण्डरीकः परमान्तरात्मा कर्माङ्गरूपं कमलं दधार । सासिष्वसन्तं सरसे रसाय स्वाहा — पारमा. ७।८
यः पुनरेतत् त्रिमात्रेणोमित्येतेनैवाक्षरेण परं पुरुषमभिध्यायीत — प्रश्नो. ५।५
यः पुनरेतं त्रिमात्रेण [मा.पा.] — प्रश्नो. ५।५
(अथ) यः पुरुषः सोऽग्निः — मैत्रा. २।८
यः पूजयति मां भक्त्या सोऽहमेव न संशयः — १ बिल्वो. ३०
यः पूर्वं तपसो जातमद्भ्यः पूर्वमजायत । गुहां प्रविश्य तिष्ठन्तं यो भूतेभिर्व्यपश्यत, एतद्वैतत् — कठो. ४।६
यःपृथिवीमन्तरेसञ्चरन्यंपृथिवी नवेद — अध्यात्मो. १
यः पृथिव्यां तिष्ठन् पृथिव्या अन्तरो यं पृथिवी नवेद..एष त आत्मा — बृह. ३।७।३
यः प्रजानामेकराण्मानुषीणां मृत्युं यजे प्रथमजामृतस्य[चित्सु.१५।३+ — तै.आ.३।१५।२
यः प्रणवमधीते स सर्वमधीते — नृ. पू. ५।१९
यःप्रणवः स सर्वव्यापी[अ.शिरः.३,४+ — बटुको. १९
यःप्रणवः स उद्गीथः [छांदो.१।५।१+ — मैत्रा. ६।४
यः प्रदद्याद्गवां सम्यक् फलानि च विशेषतः..यावत्तत्पत्रकुसुमकन्दमूलफलानि च । तावद्वर्षसहस्राणि शिवलोके महीयते — शिवो. ७।९३
यः प्रयाति त्यजन् देहं — भ. गी. ८।१३
यः प्रयाति स मद्भावं — भ. गी. ८।५
यः प्रागादित्यात्सोऽकालोऽकलोऽथ य आदित्याद्यः सकालःसकलः — मैत्रा. ६।१५
यः प्राज्ञो विधरणः सर्वान्तरोऽक्षरःशुद्धः — मैत्रा. ७।६
यः प्राणतो निमिषतो महित्वैक इद्राजा जगतो बभूव । य ईशे अस्यद्विपदश्चतुष्पदः..तन्मे मनः.. — २ शिवसं. ३३
यः प्राणपवनस्पन्दश्चित्तस्पन्दः स एव हि । प्राणस्पन्दजये यत्नः कर्तव्यो धीमतोच्चकैः — अ. पू. ४।८९
यः प्राणभोगस्तं देवेभ्य आगायत् — बृह. १।३।३
यः प्राणः स वायुः — १ पैंग. ३।३।२
(अथ) यः प्राणापानयोः सन्धिः स व्यानः — छांदो. १।३।३

यः प्राणे तिष्ठन् प्राणादन्तरो यं प्राणो न वेद.. बृह. ३।७।१६
यः प्राणेन प्राणिति स त आत्मा सर्वान्तरः बृह. ३।४।१
यः प्राणैः प्रतितिष्ठसि प्रश्नो. २।७
यः प्राणो व्यानोऽपानः समान उदानः स शिरःपक्षसी पृष्ठ-पुच्छवानेषोऽग्निः मैत्रा. ६।३३
यः शङ्खः स स्वयं विष्णुर्लक्ष्मीरूपो व्यवस्थितः कृष्णोप. १६
यः शतरुद्रियमधीते सोऽग्निपूतो भवति कैव. २।५
यः शतं च सहस्राणां सहस्रं श्राद्ध आचरेत् । एकस्मान्मन्त्रवित्पूतः सर्वमर्हति ब्राह्मणः इतिहा. ४६
यः शब्दस्तदोमित्येतदक्षरं मैत्रा. ६।२३
यः शरीरेन्द्रियादिभ्यो विहीनं सर्व-साक्षिणम् । पारमार्थिक-(परमार्थक-)विज्ञानं सुखात्मानं स्वय-म्प्रभम् । [ना. प. ६।१६+ वराहो. २।२९
यः शास्त्रविधिमुत्सृज्य भ.गी. १६।२३
यः शिवं शिवमित्येवं द्व्यक्षरं मन्त्र-मभ्यसेत् । एकाक्षरं वा सततं स याति परमं पदम् शिवो. १।२१
यः शिवः स परं ब्रह्म तत्साम्नो-ऽन्त्यं पादं जानीयात् यो जानीते सोऽमृतत्वं च गच्छति परं ब्रह्मैव भवति ग. पू. २।१
यः शुचिः प्रयतो भूत्वा[श्रीसू.१६+ ऋ.खि.५।८७।१६
यः शृणोति सकृद्वाऽपि ब्रह्मैव भवति स्वयम् (ध्रुवम्) मैत्रे. ३।२५
यः श्राद्धानि कुरुतेऽसङ्गतानि न देवयानेन पथा स याति इतिहा. १९
यः श्रीकामः शान्तिकामः..भास्करं भगवन्तमुपासीत सूर्यता. १।८
यः श्रोत्रे संश्रावयितृ (वेद) संश्रावयितृमान्भवति कौ. त. २।१
यः श्रोत्रे तिष्ठञ्छ्रोत्रादन्तरो यꣳ श्रोत्रं न वेद बृह. ३।७।१९
यः श्रोत्रे भोगस्तं देवेभ्य आगायत् बृ. उ. १।३।५
यः श्रोत्रे यः श्रोतव्ये यो दिक्षु ...सोऽयमात्मा सुबालो. ५।२
यः स ईश्वर इत्युक्तः सर्वज्ञत्वादि-भिर्गुणैः सरस्व. ४१
यः सकृदुच्चारयति तस्य संसार-मोचनं भवति अद्वयता. १३
यः सकृदुच्चारणःसंसारविमोचनोभवति द्वयोप. ८
यः सङ्कल्पं ब्रह्मेत्युपास्ते छांदो. ७।४।३
यः सच्चिदानन्दाद्वैतैकचिदात्मा भूर्भुवः सुवस्तस्मै वै नमोनमः रामो.ता.५।४८
यः सञ्चरꣳश्चासञ्चरꣳश्च न व्यथतेऽथो न रिष्यति बृह. १।५।२०
यः सत्येनातिवदति छांदो.७।१६।१
यः सदा मुक्त एव सः भ. गी. ५।२
यः सदाऽहरहर्जपति स वै ब्राह्मणो भवति (सूर्यमन्त्रं) सूर्यो. ९
यः समः सर्वभूतेषु जीवितं तस्य शोभते १सं.सो.२।३९
यः समस्तार्थजालेषु व्यवहार्यपि निःस्पृहः (शीतलः)। परार्थेष्विव पूर्णात्मा स जीवन्मुक्त उच्यते [महो. २।६२+ वराहो. ४।२७
यः स मामेति पाण्डव भ.गी. ११।५५
यः सर्वज्ञः सर्वविद्यस्य ज्ञानमयं तपः । तस्मादेतद्ब्रह्म नाम रूपमन्नं च जायते मुंड. १।१।९
यः सर्वज्ञः सर्वविद्यस्यैष महिमा भुवि । दिव्ये ब्रह्मपुरे ह्येष व्योम्न्यात्मा प्रतिष्ठितः मुण्ड. २।२।७
यः सर्वत्रानभिस्नेहः भ. गी. २।५७
यः सर्वज्ञः सर्वविद्यो यस्य..तस्माद-न्नान्नरूपेण जायते जगदावलिः रुद्रहृ. ३३
यः स सर्वेषु भूतेषु भ. गी. ८।२०
यःसर्वव्यापीसोऽनन्तः [अ.शिरः.३।४ बटुको.१९
यः सर्वाणिभूतान्यन्तरोयमयत्येष त आत्माऽन्तर्याम्यमृतः बृह. ३।७।१५
यः सर्वान्देवानीशते ईशनीभिः अ.शिरः. ३।५
यः सर्वान्देवानीशते...तस्मादुच्यते ईशानः बटुको. २०

यः सर्वान् प्राणान्सम्भक्ष्य सम्भक्षणेनाजः संसृजति । विसृजति तीर्थमेके व्रजन्ति   अ. शिरः. ३।५
यः सर्वेषु भूतेषु तिष्ठन् सर्वेभ्यो भूतेभ्योऽन्तरो यं सर्वाणि भूतानि न विदुः   बृह. ३।७।१५
यः सर्वोपरमे काले सर्वानात्मन्युपसंहृत्य स्वात्मानन्दसुखे मोदते प्रकाशते वा स देवः   द.मू. २
यः सव्यं पाणिं पादौ प्रोक्षति... तेनाथर्वाङ्गिरसो...प्रीणाति   सह्वै. १५
यः साज्यसमिद्भिर्यजति स सर्वंलभते   गणप. १३
यः सावित्रं वेद, अहोनाह्याश्वध्यः   सूर्यता. ३।१
यः सुयुक्तोऽजस्रं चिन्तयति तस्माद्विद्यया...चोपलभ्यते ब्रह्म   मैत्रा. ४।४
यः सूक्ष्मान् सञ्चरमाणान्भावाभावान्भव्याभव्यान्कुर्वन्नात्मीयममितो धुनोति धुरंवहिष्यसेस्वाहा   पारमा. २।८
यः सूर्यः सोऽहमेव च   सूर्यो. ६
यः सेतुरीजानानामक्षरं ब्रह्म यत्परम्   कठो. ३।२
यः स्तनः पूर्वपीतस्तं निपीड्य मुदमश्नुते   १ यो. त.१३१
यः स्तन्यं पूर्वं पीत्वाऽपि निष्पीड्य च पयोधरान्   २ योगत. ३
यः स्मरं ब्रह्मेत्युपास्ते यावत्स्मरस्य गतं तत्रास्य यथा कामचारो भवति   छांदो. ७।१३।२
यः स्वजनान्नीलग्रीवो यः स्वजनान्हरिः   नीलरु. ३।१
यः स्वयं लोकमवधारमवधारयन्स्वाहा   पारमा. ६।१
यः स्वयं सृष्टमात्मना गुप्तमनुसन्धितानमचरंचरन्संस्वयंक्रीडं क्रीडयन्क्रीडान्तरमनुप्राविशत्स्वाहा   पारमा. ६।२
यः स्वरूपपरिभ्रंशश्चेस्यार्थे चितिमज्जनम् । एतस्मादपरो मोहो न भूतो न भविष्यति   महो. ५।४
(अथ) या अक्षन्नापस्ताभिः पर्जन्यः   बृह. २।२।२
(अथ) या अन्या आहुतयोऽनन्तवत्यस्ताः कर्ममयग्रो भवन्ति   कौ. उ. २।५
या इषवो यातुधानानां ये वा वनस्पतीनाम् । ये वाऽवेदेषु शेरते तेभ्यः सर्वेभ्यो नमः   नीलरु. २।११
[+वा. सं. १३।७+   तै.सं. ४।२।८।४
या इष्टका यावतीर्वा यथा वा   कठो. १।१५
या उमा सा स्वयं विष्णुर्यो विष्णुः स हि चन्द्रमाः   रु. हृ.५
या ओषधयः सोमराज्ञीर्बह्वीः शतविचक्षणाः । बृहस्पतिप्रसूतास्ता नो मुञ्चन्त्वंहसः   प्रा. हो. १।२
या ओषधीः सोमराज्ञीरितितिसृभिरन्नपत इति द्वाभ्यामनुमन्त्रयते   प्रा. हो. १।१
या कनीनका तयाऽऽदित्यः..   बृह. २।२।२
यक्ष्यमाणो वै भगवन्तोऽहमस्मि यावदेकैकस्मा ऋत्विजे धनं दास्यामि तावद्भगवद्भ्यो दास्यामि वसन्तु भगवन्त इति   छांदो. ५।११।५
याग-व्रत-तपो-दान-विधिविधान-ज्ञानसम्भवो बन्धः ।   निरा. उ. २१
या गौर्वरिष्ठा सह सोर्वरित्री... एजते स्वाहा   पारमा. १०।१
या च प्रागात्मनो माया तथाऽन्ते च तिरस्कृता । ब्रह्मवादिभिरुद्गीता सा मायेति विवेकतः   वराहो. २।५१
याचितायाचिताभ्यां च भिक्षाभ्यां कल्पयेत्स्थितम् (तिं)   १सं.सो. २।७१
या जाग्रति महीयते, तां वैखरीमाचक्षते   गान्धर्वो. २
या ज्या व्यानः शास्या   बृह. ३।१।१०
याज्ञवल्क्य अयज्ञोपवीती कथं ब्राह्मण इति   जाबालो. ५
(अथ ह) याज्ञवल्क्य आदित्यमण्डलपुरुषं प्रपच्छ   मं. ब्रा. २।१
याज्ञवल्क्य किंज्योतिरयं पुरुष इति   बृह. ४।३।२
याज्ञवल्क्यस्त्वां..अक्रता ३इति (मा.)   बृह. ३।९।१८
(अथ ह) याज्ञवल्क्योऽन्यद्वृत्तमुपाकरिष्यन्   बृह. ४।५।१
याज्ञवल्क्यो मण्डलपुरुषं पप्रच्छ   मं. ब्रा. ३।१
याज्ञवल्क्यो महामण्डलपुरुषंपप्रच्छ   मं. ब्रा. ३।१

याज्ञवल्क्यो ह वै महामुनिरादित्यलोकं जगाम	मं. ब्रा. ११
या त इषुः शिवतमा शिवं बभूव ते धनुः । शिवा शरव्या या तव तया नो मृड जीवसे [नीलरु.१।७	+तै.सं.४।५।१।१
या तदभिमानं कारयति साऽविद्या	सर्वसारो. २
यातयामं गतरसं	भ.गी.१७।१०
याति नास्त्यत्र संशयः	भ. गी. ८।५
याति पार्थानुचिन्तयन्	भ. गी. ८।८
या तिरश्ची निपद्यतेऽहं विधरणी इति तां त्वा घृतस्य धारया यजे	बृह. ६।३।१
यातुधानाश्च रक्षांसि पिशाचा असुरास्तथा । एते हरन्ति वै श्राद्धं दैवं यत्र निवर्तयेत्	इतिहा. ६१
या ते अग्ने यज्ञिया तनूस्तयेह्यारोहात्मात्मानम् । अच्छा वसूनि कृण्वन्नस्मेनर्या पूरूणि [तै. सं. ३।४।१०।५	ना. प. ४।४२+
या ते तनूर्वाचि प्रतिष्ठिता या श्रोत्रे या च चक्षुषि । या च मनसि सन्तता शिवां तां कुरु मोत्क्रमीः	प्रश्नो. २।१२
या ते रुद्र शिवातनूरघोरा पापकाशिनी [श्वेता. ३।५+ [लिङ्गोप.१+वा.सं.१६।२+	नीलरु.१।८+ तै.सं.४।५।१।१
यादृच्छिको भवेत्स भिक्षुः	प. हं.८
यादृच्छिको भवेद्यदृच्छालाभसन्तुष्टः सुवर्णादीन्न परिग्रहेत् (यतिः)	ना. प. ३।८७
यादृशं द्रव्यमभाति सात्त्विकं राजसं तु वा । तादृशं गुणमाप्नोति गुणैः कर्मगतिं तथा	भवसं. ४।८
यादृशा भक्तास्तादृशं सुखं तादृशो लीलाभावश्च भवेत्	सामर. ३०
या देवानां प्रभवा चोद्भवा च विश्वाधिपा सर्वभूतेषु गूढा । हिरण्यगर्भं जनयामास पूर्वं सा नो बुद्ध्या शुभया संयुनक्तु	गुह्यका. ५६
या धमनयस्ता नद्यः	छांदो.३।१९।२
यानि खानि स आकाशः	१ ऐत. ३।३।२
यानि दुःखानि या तृष्णा दुस्सहा ये दुराधयः । शान्तचेतस्सु तत्सर्वं तमोऽर्केष्विव नश्यति	महो. ४।२९
या नित्यं संवर्ते महीयते, तां पश्यन्तीमाचक्षते	गान्धर्वो. २
यानि पञ्चधा त्रीणि त्रीणि तेभ्यो न ज्यायः परमन्यदस्ति	छांदो.२।२१।३
यानि मम पूर्वजन्मोपार्जितानि चक्षुःप्रतिरोधकदुष्कृतानि सर्वाणि निर्मूलय..	चक्षुषो. २
या निशा सर्वभूतानां	भ. गी. २।६९
यानि ह्येव जाग्रत्पश्यति तानि सुप्त इत्यत्रायंपुरुषःस्वयञ्ज्योतिर्भवति	बृह. ४।३।१४
(अथ) यानीतराणि स्तोत्राणि तेष्वात्मनेऽन्नाद्यमागायेत्	बृह. १।३।२८
यानूष्मणोऽधिदैवतमवोचाम मज्जानस्तेऽध्यात्मम्	३ ऐत. २।२।२
यानूष्मणोऽवोचाम रात्रयस्ताः	३ ऐत. २।२।१
यानेव हत्वा न जिजीविषामः	भ. गी. २।६
यान्ति देवव्रता देवान्	भ. गी. ९।२५
यान्ति ब्रह्म सनातनम्	भ. गी. ४।३१
यान्ति मद्याजिनोऽपि माम्	भ. गी. ९।२५
(अतो) यान्यन्यानि वीर्यवन्ति कर्माणि यथाऽग्नेर्मन्थनमाजेः सरणं..तानि करोति	छांदो. १।३।५
यान्यनवद्यानि कर्माणि, तानि सेवितव्यानि, नो इतराणि	तैत्ति. १।११।२
यान्यक्षराण्यवोचामाहानितानि	३ ऐत. २।२।१
यान्यक्षराण्यधिदैवतमवोचामास्थीनि तान्यध्यात्मम्	३ ऐत. २।२।२
(अथ) यान्यष्टाचत्वारिंशद्वर्षाणि तृतीयसवनम्	छांदो. ३।१६।५
यान्यस्माकं सुचरितानि, तानि त्वयोपास्यानि नो इतराणि	तैत्ति. १।११।२
यान्येतानि देवजातानि गणश आख्यायन्ते वसवो रुद्रा आदित्या विश्वेदेवा मरुतइति	बृह. १।४।१२

यान्येतानि देवत्रा क्षत्राणीन्द्रो वरुणः सोमो रुद्रः पर्जन्यो यमो मृत्युरीशान इति — बृह. १।४।११
यान्सन्धीनधिदैवतमवोचाम पर्वाणि तान्यध्यात्मम् — ३ ऐत. २।२।२
यान् सन्धीनवोचामाहोरात्राणां ते सन्धयः — ३ ऐत. २।२।१
या परा सा परा गतिः — गान्धर्वो. ५
या पुरस्ताद्युज्यत ऋचोऽक्षरे परमे व्योमन्निति — २ प्रणवो. ५
या प्रतीतिरनागस्का तद्वि-द्ब्रह्मास्मि सर्वगम् — अ. पू. ५।२२
या प्रत्यग्दृष्टिभिर्जीवैर्व्यज्यमानानु-भूयते । ज्ञापिनी ज्ञप्तिरूपैका सा मां पातु सरस्वती — सरस्व. १५
या प्राणेन सम्भवत्यदितिर्देवता-मयी । गुहां प्रविश्य तिष्ठन्ती या भूतेभिर्व्यजायत — कठो. ४।७
या प्राणेन संविशति (मा. पा.) — कठो. ४।७
या बुद्धिर्गर्भमध्ये सा बुद्धिर्बाल्या-वस्था न भवति — अद्वैतो. २
या बुद्धिर्बाल्यावस्था भवति सा बुद्धिर्यौवनावस्था न भवति — अद्वैतो. २
या बुद्धिर्यौवनावस्था सा बुद्धि-र्यूनावस्था न भवति — अद्वैतो. २
या भार्या (जननी हि सा) मातरेवहि — १ योगत. १३२
याभिरादित्यस्तपति रश्मिभिस्ताभिः पर्जन्यो वर्षति — महाना. १७।१३
याभिरिदं भिनुयुर्दाशुषः प्रजाः — बा. मं. १७
याभिर्विभूतिभिर्लोकान् — भ. गी. १०।१६
या (अदितिः) भूतेभिर्व्यजायत, एतद्वैतत् — कठो. ४।७
या मनसि सन्तता (मा. पा.) — प्रश्नो. २।१२
या मन्द्रा स्वरवती सा देवहूः — संहितो. १।२
याममात्रं तु यो नित्यमभ्यसेत्स तु कालजित् — १ यो.त. १२६
याममात्रं प्रतिदिनं योगी यत्नाद-तन्द्रितः — १ यो. त. ७२
याममात्रं वासुदेवं चिन्तयेत् कुंभकेन यः । सप्तजन्मार्जितं पापं तस्य नश्यति योगिनः — त्रि. ब्रा. १४८
या माता सा पुनर्भार्या या भार्या मातरेव हि (जननी हि सा) — २ योगत. ४ [१ यो. त. १३२+
(अथ) यामिच्छेद्दधीतेति तस्या-मर्थं निष्ठाय मुखेन मुखं सन्धायापान्याभिप्राण्यात् — बृह. ६।४।११
(अथ) यामिच्छेन्न गर्भं दधीतेति तस्यामर्थं निष्ठाय...इत्यरेता एव भवति — बृह. ६।४।१०
यामिन्द्रसेनेत्याहुस्तां विद्यां ब्रह्म-योनिं सरूपामिहायुषे शरणं प्रपद्ये — नृ. पू. ३।४
यामिमां पुष्पितां वाचं — भ. गी. २।४२
यामिषुं गिरिशन्त हस्ते बिभर्ष्य-स्तवे । शिवां गिरित्र तां कुरु माहिंसीः पुरुषं जगत् [श्वेता. ३।६ +नीलरु. १।५ [+वा.सं. १६।३+ — तै.सं. ४।५।१।१
यामेव कुमारस्यान्ते वाचमभाष-थास्तामेव मे ब्रूहि — छांदो. ५।३।६
याम्यकर्णान्तं यशस्विनी भवति — शांडि. १।४।६
यायावरा यजन्तो...ददतः प्रति-गृह्णन्तः शतसंवत्सराभिः क्रिया-भिर्यजन्त आत्मानं प्रार्थयन्ते — आश्रमो. २
या योदेति मनोनाम्नी वासना वासितान्तरा । तांतांपरिहरे-त्प्राज्ञस्ततोऽविद्याक्षयो भवेत् — महो. ४।१०८
यावच्चित्तस्य गतं तत्रास्य यथा-कामचारो भवति — छांदो. ७।५।२
यावच्चोपाधिपर्यन्तं तावच्छुश्रूषये-द्गुरुम् । गुरुवद्गुरुभार्यायां तत्पुत्रेषु च वर्तनम् — पैङ्गलो. ४।८
यावज्जीवति तावच्च दुःखैर्नानाविधैः प्लुतः । तन्तुकारणपक्ष्मौघैरास्ते कार्पासबीजवत् — भवसं. १।८
यावतः खलु पिण्डान् स प्राश्नाति हविषो नृचः । तावतः शूलान् ग्रसति प्राप्य वैवस्वतं यमम् — इतिहा. २६

यावती दृश्यकलना सकलेयं विलो-
क्यते । सा येन सुष्ठु सन्त्यक्ता
स जीवन्मुक्त उच्यते महो. २।५३
(अथ) यावतीयं त्रयी विद्या
यस्तावत्प्रतिगृह्णीयात्सोऽस्या
एतद्द्वितीयं पदमाप्नुयात् बृह. ५।१४।६
यावतीर्वै देवतास्ताः सर्वा वेदविदि
ब्राह्मणे वसन्ति तस्माद्ब्राह्मणे-
भ्यो वेदविद्भ्यो दिवे दिवे
नमस्कुर्याम्.. सह्वै. १९
यावत्केवलसिद्धिः स्यात्तावत्सहित-
मभ्यसेत् योगकुं. १।२०
यावत्त एनं प्रजायामुद्गीथं वेदिष्यते
परोवरीयो हैभ्यस्तावदस्मिँल्लोके
जीवनं भविष्यति छांदो. १।९।३
यावत्तेजसो गतं तत्रास्य यथाकाम-
चारो भवति छांदो. ७।११।२
यावत्प्रयत्नलेशोऽस्ति यावत्सङ्कल्प-
कल्पना । श्रेयस्त्वं मनसा प्राप्तं
तावत्तत्त्वस्य का कथा अमन. २।९६
यावत्यो वै कालस्य कलास्तावतीषु
चरत्यसौ यः कालं ब्रह्मे-
त्युपासीत मैत्रा. ६।१४
यावत्सङ्कल्पस्य गतं तत्रास्य यथा-
कामचारो भवति यः सङ्कल्पं... छांदो. ७।४।३
यावत् सञ्जायते किञ्चित् भ. गी. १३।२७
यावत्सर्वं न सन्त्यक्तं तावदात्मा
न लभ्यते । सर्वसङ्गपरित्यागे
शेष आत्मेति कथ्यते अ. पू. १।४५
यावत्स्मरस्य गतं तत्रास्य यथा-
कामचारो भवति यः स्मरं
ब्रह्मेत्युपास्ते छांदो. ७।१३।२
यावदनुदिशो यावदनुचन्द्रमा-
स्तावानस्य लोको भवति १ ऐत. १।७।५
यावदनुद्यौर्यावदन्वादित्यस्तावानस्य
लोको भवति १ ऐत. १।७।६
यावदनु पृथिवी यावदग्निस्तावा-
नस्य लोको भवति १ ऐत. १।७।२
यावदन्तरिक्षं यावदनुवायुस्तावानस्य
लोको भवति १ ऐत. १।७।३
यावदन्नस्य गतं तत्रास्य यथाकाम-
चारो भवति योऽन्नंब्रह्मेत्युपास्ते छांदो. ७।९।२
यावदन्वापो यावदनुवरुणस्तावा-
नस्य लोको भवति १ ऐत. १।७।६
यावदपां गतं तत्रास्य यथाकाम-
चारो भवति, योऽपोब्रह्मेत्युपास्ते छांदो. ७।१०।२
यावदाकाशस्य गतं तत्रास्य यथा-
कामचारो भवति य आकाशं.. छांदो. ७।१२।२
यावदाशाया गतं तत्रास्य यथा-
कामचारो भवति य आशां
ब्रह्मेत्युपास्ते छांदो. ७।१४।२
यावदादहनश्चोर्ध्वमधस्तात्पावनं
भवेत् बृ. जा. २।८
यावदायुषं ब्रह्मलोकमभिसम्पद्यते
न च पुनरावर्तते छांदो. ८।१५।१
यावदितः पुरस्तादुदयति सूर्यः,
तावदितोऽमुं नाशय वनदु. १६०
(अथ) यावदिदं प्राणि, यस्तावत्
प्रतिगृह्णीयात्, सोऽस्या एत-
त्तृतीयं पदमाप्नुयात् बृह. ५।१४।६
यावदुन्मेषकालस्तावन्निमेषकालो
भवति त्रि.म. ना. ४।६
यावदुष्णंभवत्यन्नंतावद्दश्नीतवाग्यतः इतिहा. ८१
यावदेकैकस्मा ऋत्विजे धनं दास्यामि
तावद्भगवद्भ्यो दास्यामि छांदो. ५।११।५
यावदेतान्निरीक्षेऽहं भ. गी. १।२२
यावदेनो दीक्षामुपैति दीक्षित एतैः
सततं जुहोति सह्वै. १२
यावद्दृष्टिर्भ्रुवोर्मध्ये तावत्काल-
भयं कुतः यो. चू. ९१
यावद्ध्यानस्य गतं तत्रास्य यथा-
कामचारो भवति यो ध्यानं
ब्रह्मेत्युपास्ते छांदो. ७।६।२
यावद्धेतुफलावेशस्तावद्धेतुफलोद्भवः ।
क्षीणे हेतुफलावेशे नास्ति
हेतुफलोद्भवः मां. शां. ५५

यावद्धेतुफलावेशः संसारस्ताव-
दायतः । क्षीणे हेतुफलावेशे
संसारं न प्रपद्यते अ. शां. ५६
यावद्ध्यस्मिञ्छरीरे प्राणो वसति
तावदायुः कौ. त. ३।२
यावद्ध्रियते सा दीक्षा [महाना.१८।१ +त्रिसुप. ४
यावद्बलस्य गतं तत्रास्य यथाकाम-
चारोभवति योबलंब्रह्मेत्युपास्ते छांदो. ७।८।२
यावद्बिन्दुः स्थितो देहे तावन्मृत्यु-
भयं कुतः । यावद्बद्धानभोमुद्रा
तावद्बिंदुर्नगच्छति [ध्या.बि.८४ +यो. चू. ५८
यावद्वा मक्षिकायाः पत्रं
तावन्तरेणाकाशः बृह. ३।३।२
यावद्यावन्मुनिश्रेष्ठ स्वयं सन्त्यज्य-
तेऽखिलम् । तावत्तावत्पराळोकः
परमात्मैव शिष्यते अ. पू. १।४४
यावद्वाचो गतं तत्रास्य यथाकाम-
चारो भवति, यो वाचं
ब्रह्मेत्युपास्ते छांदो. ७।२।२
यावद्वायुः स्थितो देहे तावज्जीवो
न मुञ्चति यो. चू. ९०।९१
यावद्वा शक्यते तावद्धारयेज्जप-
तत्परः । पूरितं रेचयेत्पश्चा-
न्मकारेणानिलं बुधः जा. द. ६।५
यावद्विलीनंनमनोनतावद्वासनाक्षयः अ. पू. ४।७८
यावद्विज्ञानस्य गतं तत्रास्य यथा-
कामचारो भवति, यो विज्ञानं
ब्रह्मेत्युपास्ते छांदो. ७।७।२
यावद्धि पुरुषः प्राणिति न ताव-
द्भाषितुं शक्नोति कौ. त. २।५
यावद्धि पुरुषो भाषते न ताव-
त्प्राणितुं शक्नोति कौ. त. २।५
यावन्तस्तु कराद्भ्रष्टाः पतन्ति
जलबिन्दवः । भूत्वा वज्राणि
ते सर्वे पतन्ति ह्यसुरेषु वै । ततो
विभावसुस्तेषां प्रीतात्मा-
ऽभ्यायते वरम् सन्ध्यो. १२,१३
६६

यावन्तीह वै भूतान्यन्नमदन्ति
तावत् स्वन्तस्थोऽन्नमत्ति यो
हैवं वेद मैत्रा. ६।१३
यावन्तो देवास्त्वयि जातवेदस्ति-
र्यञ्चो घ्नन्ति पुरुषस्य कामान् बृह. ६।३।१
यावन्तो वैश्वदेवस्य निविद्युच्यन्ते बृह. ३।९।१
यावन्न चित्तोपशमो न तावत्तत्त्व-
वेदनम् । यावन्न वासनानाश-
स्तावत्तत्त्वागमः कुतः अ. पू. ४।८०
यावन्न तत्त्वविज्ञानं ताव-
च्चित्तशमः कुतः अ. पू. ४।७९
यावन्न तत्त्वसम्प्राप्तिर्न ताव-
द्वासनाक्षयः अ. पू. ४।८०
यावन्न लभ्यते शाम्भं तावद्वा
पर्यटेद्यतिः । यदा सँल्लभ्यते
शाम्भं तदा सिद्धिः करे स्थिता योगकु. २।११
यावन्नाम्नो गतं तत्रास्य यथाकाम-
चारो भवति यो नाम
ब्रह्मेत्युपास्ते छांदो. ७।१।५
यावन्निश्श्वसितो जीवस्ताव-
न्निष्कलतां गतः ब्र. वि. १९
यावन्नोत्पद्यते सत्या बुद्धिर्नतदहं
यथा । नैतन्मम च विज्ञाय ज्ञः
सर्वमतिवर्तते आयुर्वे. २९
यावन्मनसो गतं तत्रास्य यथा-
कामचारो भवति यो मनो
ब्रह्मेत्युपास्ते छांदो. ७।३।२
यावन्मनस्तत्र मरुत्प्रवृत्तिर्याव-
न्मरुच्चापि मनोनिवृत्तिः अमन. २।२७
यावन्ममेदमित्यास्था तावच्चिता-
द्विविभ्रमः अ. पू. ५।११
यावमुष्य गेष्णौ तौ गेष्णौ
यन्नाम तन्नाम छांदो. १।७।५
यावर्णपदवाक्यार्थस्वरूपेणैव वर्तते ।
अनादिनिधनानन्ता सा मां
पातु सरस्वती सरस्व. ९
यावल्लिङ्गस्य दैर्घ्यं स्यात्तावद्वेधाश्च
विस्तरः । लिङ्गतृतीयभागेन
भवेद्वेधाः समुच्छ्रयः शिवो. २।१२

याऽवसानेऽस्य चतुर्थ्यर्धमात्रा सा
सोमलोक ओङ्कारः नृ. पू. ३।१
याऽवसानेऽस्य चतुर्थ्यर्धमात्रा सा
विद्युमतीसर्ववर्णापुरुषदेवत्या अ. शिखो. १
यावन्तं ह वा इमा वित्तस्य पूर्णां
ददल्लोकं जयति
तावन्तं लोकं जयति सद्वै. १८
या वाक् सर्क् तस्मादप्राणन्ननपान-
न्नृचमभिव्याहरति छांदो. १।३।४
यावानर्थ उदपाने भ. गी. २।४६
यावानु वै रसस्तावानात्मा संहितो. ४।१
यावान् यश्चास्मि तत्त्वतः भ. गी. १८।५५
यावान्वा अयमाकाशस्तावानेषो-
ऽन्तर्हृदय आकाशः छांदो. ८।१।३
यावान् संवत्सरस्तमेतावतः कालस्य
परस्तादसृजत बृह. १।२।४
या वा प्रजा स प्राणः कौ. त. ३।३
या वाऽस्या अग्न्यास्तनवस्ता अभि-
ध्यायेदर्चयेन्निकुयात् मैत्री. ४।६
या वित्तैषणा सा लोकैषणा बृह. ३।५।१
या वेदादिषु गायत्री सर्वव्यापि-
महेश्वरी। ऋग्यजुःसामाथर्वश्च
तन्मे मनः शिवसङ्कल्पमस्तु २शिवसं. १९
या वेदान्तार्थतत्त्वैकस्वरूपा
परमार्थतः। नामरूपात्मना
व्यक्ता सा मां पातु सरस्वती सरस्व. ५
या वै वरदा स्वोपाया सुप्रसन्ना
सुखयति सहस्रपुरुषान् लक्ष्म्यु. ५
या वै शिवा भगवती अणिमा-
सिद्धिस्तस्यै वै नमोनमः आथ. द्वि. २
या वै शिवा भगवती अणिमा-
सिद्धया विद्युत्कतस्यैव नमोनमः आथ. द्वि. १
या वै शिवा भगवती ईशित्वसि-
द्धिस्तस्यै वै नमो नमः आथ. द्वि. ५
या वै शिवा भगवती प्राकाम्यसि-
द्धिस्तस्यै वै नमो नमः आथ. द्वि. ७
या वै शिवा भगवती मुक्तिसिद्धि-
स्तस्यै वै नमो नमः आथ. द्वि. ८
या वै शिवा भगवती महिमासि-
द्धिस्तस्यै वै नमो नमः आथ. द्वि. ४
या वै शिवा भगवती लघिमासि-
द्धिस्तस्यै वै नमोनमः आथ. द्वि. ३
या वै शिवा भगवती वशित्व-
सिद्धिस्तस्यै वै नमोनमः आथ. द्वि. ६
या वै ता इमाः प्रजास्तिस्रो अत्या-
यमायन् १ ऐत. २।१।१
या वै विष्णुं पालने सन्नियुङ्क्ते रुद्रं
देवं संहृतौ चापि गुहा। तां वै
देवीमात्मबुद्धिप्रकाशां मुमुक्षुर्वै
शरणमहं प्रपद्ये गुह्यको. ७२
या वै सा गायत्रीयं पृथिव्यसा९
हीद९..(मा.) छांदो. ३।१२।२
या वै सा गायत्रीयं वाव सा येयं
पृथिव्यस्यां९ हीद९ सर्वं भूतं
प्रतिष्ठितमेतामेव नातिशीयते छांदो. ३।१२।२
या वै सा पृथिवीयं वाव सा यदि-
दमस्मिन्पुरुषे शरीरमस्मिन्हीमे
प्राणाः प्रतिष्ठिता एतदेव नाति-
शीयन्ते छांदो. ३।१२।३
या वै सा मूर्तिरजायताऽन्नं वै तत् २ ऐत. ३।२
या व्याहृतिराहुतिर्यदस्य विज्ञानं
तज्जुहोति [महाना. १८।१+ त्रिसुप. ४
या शक्तिस्तद्वशाद्ब्रह्म विकृतत्वेन
भासते। अत्राप्यावृतिनाशेन
विभाति ब्रह्मसर्गयोः सरस्व. ३३
या शतेन प्रतनोषि सहस्रेण विरोहसि।
तस्यास्ते देवीष्टके विधेम हविषा
वयम् [महाना. ४।३+ बृजाबा. २५
[+ वा. सं. १३।२१+ तै.सं.४।२।९।२
याश्च ते हस्त इषवः परा ता भगवो
वप। अवतत्य धनुस्त्व९ सह-
स्राक्ष शतेषुधे [नीलरु. २।५+ वा.सं. १६।९
[+तै. सं. ४।५।१।३
याश्च देवता एतस्यां प्रतिवसन्त्ये-
ताभ्यश्च नमो नमः सद्वै. २२
याश्च मृत्योः प्राणवत्यस्ताभ्यो
नमो नमस्तेनैतं मृडयत २ अ. मा. ५

या श्रद्धा धारणा मेधा वाग्देवी
विधिवल्लभा । भक्तजिह्वाग्रसदना
शमादिगुणदायिनी सरस्व. २९
या साङ्गोपाङ्गवेदेषु चतुर्ष्वेकैव
गीयते । अद्वैता ब्रह्मणः शक्तिः
सा मां पातु सरस्वती सरस्व. ७
या सा तृतीया मात्रा ईशान-
देवत्या कपिला वर्णेन यस्तां
ध्यायतेनित्यंसगच्छेदैशानपदं
[अ. शिरः. ३।१०+ २ प्रणवो. १३
या सा द्वितीया मात्रा विष्णु-
दैवत्या कृष्णा वर्णेन यस्तां
ध्यायते नित्यं स गच्छे-
द्वैष्णवं पदं [२ प्रणवो. १३+ अ. शिरः. ३।१०
या सा प्रथमा मात्रा ब्रह्मदेवत्या
रक्ता वर्णेन यस्तां ध्यायते
नित्यं स गच्छेद्ब्राह्मं पदम् २ प्रणवो. १३
या साऽर्धचतुर्थी मात्रा सर्वदैवत्या
व्यक्तीभूता खं विचरति शुद्ध-
स्फटिकसन्निभा वर्णेन यस्तां
ध्यायते नित्यं स गच्छेत्पद-
मनामकम् २ प्रणवो. १३
या साऽर्धचतुर्थी मात्रा सर्वदेवत्या-
ऽव्यक्तीभूता खं विचरति...
यस्तां ध्यायते नित्यं स गच्छेत्
पदमनामयम् अ. शि:. ३।१०
यास्तिस्रो रेखाः सदनानि भूस्त्री-
स्त्रिविष्टपास्त्रिगुणास्त्रिप्रकाराः ।
एतत्त्रयं पूरकं पूरकाणां मन्त्री
प्रथते मदनो मदन्या त्रिपुरो. ५+
यास्ते सोम प्रजावत्सोऽभिसो अहं त्रिसुप. १
[महाना. १२।१+
यास्ते सोम प्राणा५ स्ताञ्जुहोमि त्रिसुप. १
[+महाना. १२।१
याऽस्य तृतीयारेखा साऽऽहवनीयो
मकारस्तमो द्यौलोकः परमात्मा
ज्ञानशक्तिः सामवेदस्तृतीयसवनं
महादेवो देवतेति [का.रुद्रो.४+ जाबाल्यु. ८
याऽस्य (भस्मनः) द्वितीया रेखा
सा दक्षिणाग्निरुकारः सत्त्व-
मन्तरिक्षमन्तरात्माचेच्छाशक्ति-
र्यजुर्वेदो माध्यन्दिनं सवनं
सदाशिवो देवतेति का.रुद्रो. ४
याऽस्य द्वितीया रेखा सा दक्षिणा-
ग्निः...माध्यन्दिनसवनं विष्णु-
र्देवो देवतेति जाबाल्यु. ८
याऽस्य प्रथमा रेखा सा गार्हपत्य-
श्चाकारो रजो भूर्लोकः स्वात्मा
क्रियाशक्तिर्ऋग्वेदः प्रातस्सवनं
महेश्वरो देवतेति का. रुद्रो. ४
याऽस्य प्रथमा रेखा सा गार्हपत्यः
...प्रजापतिर्देवो देवतेति जाबाल्यु. ८
या स्वप्ने महीयते, तां मध्यमा-
माचक्षते गान्धर्वो. १
या स्वच्छा समता शान्ता जीव-
न्मुक्तव्यवस्थितिः । साक्ष्यवस्था
व्यवहृतौ सा तुर्या कलनोच्यते म.पू. ५।१०६
या हुता अतिनेदन्ते पितृलोकमेव
ताभिर्जयत्यतीव हि पितृलोकः बृह. ३।१।८
या हुता अधिशेरते मनुष्यलोकमेव
ताभिर्जयत्यध इव हि मनुष्यलोकः बृह. ३।१।८
या हुता उज्ज्वलन्ति या हुता अति-
नेदन्ते या हुता अधिशेरते किं
ताभिर्जयतीति बृह. ३।१।८
या हुता उज्ज्वलन्ति देवलोकमेव
ताभिर्जयति दीप्यत इव हि
देवलोकः बृह. ३।१।८
या होता हृदयस्य नाड्यस्ताः पिङ्ग-
लस्याणिम्नस्तिष्ठन्ति छांदो.८।६।१
या ह्येव पुत्रैषणा सा वित्तैषणा
या वित्तैषणा सा लोकैषणा उभे
ह्येते एषणे एव भवतः [बृह.३।५।१+ ४।४।२२
यां कल्पयन्ति नोऽरयः क्रूरां कृत्यां
वधूमिव । तां ब्रह्मणे च निर्णुमः
प्रत्यक्कर्तारमृच्छतु वनदु. १२८
यां गामुशन्तीमुशतभिपूर्णां...
वरदाय पित्रे स्वाहा पारमा. ६।७

(अथ) यां चतुर्थी जुहुयात्तां जुहुयात्समानाय स्वाहेति समानस्तृप्यति छांदो. ५।२२।१
यां तु कुमारस्यान्ते वाचमभाषथास्तां मे ब्रूहीति बृह. ६।२।५
(अथ) यां तृतीयां जुहुयात्तां जुहुयादपानाय स्वाहेत्यपानस्तृप्यति छांदो. ५।२१।१
यां त्वमापः सत्यधृतिर्बतासित्वादृङ्नो भूयान्नचिकेतः प्रष्टा कठो. २।९
(अथ) यां द्वितीयां जुहुयात्तां जुहुयाद्व्यानाय स्वाहेति व्यानस्तृप्यति छांदो. ५।२०।१
(अथ) यां पञ्चमीं जुहुयात्तां जुहुयादुदानाय स्वाहेत्युदानस्तृप्यति छांदो. ५।२३।१
यां यामहं मुनिश्रेष्ठ संश्रयामि गुणाश्रयम्। तांतांकृन्तति मे तृष्णा तन्त्रीमिव कुमूषिका महो. ३।२२
यां यां वासनां प्राप्नोति तं तं लिङ्गशरीरं प्राप्नुवंस्तास्ते सामर. १००
यां यां वासनामात्मा विलापयमानो भवति तत्तद्भावेन तत्तलिङ्गं विलीयमानं भवति सामर. १०२
यां विदित्वाऽखिलंबन्धंनिर्मथ्याखिलवर्त्मना। योगी याति परं स्थानं सा मां पातु सरस्वती सरस्व. २१
याः प्राच्यः स्यन्दन्ते स उद्गीथो याः प्रतीच्यः स प्रतिहारः समुद्रो निधनम् छांदो. २।४।१
याः फलिनीर्या अफला अपुष्पा याश्च पुष्पिणीः [प्रा.हो. १।३ ऋ.मं.१०।९७।१९ [वा. सं. १२।८९
युक्त आसीत मत्परः [भ.गी.२।६१+ ६।१४
युक्त इत्युच्यते तदा भ. गी. ६।१८
युक्त इत्युच्यते योगी भ. गी. ६।८
युक्तचेष्टस्य कर्मसु भ. गी. ६।१७
युक्तस्वप्नावबोधस्य भ. गी. ६।१७
युक्तः कर्मफलं त्यक्त्वा भ. गी. ५।१२
युक्तं युक्तं त्यजेद्वायुं युक्तं युक्तं च (प्र) पूरयेत्। युक्तं युक्तं प्रबध्नीयादेवं सिद्धिमवाप्नुयात् शांडि. १।७।७ [यो. चू. ११९+
युक्तात्मानः सर्वमेवाविशन्ति मुण्ड. ३।२।५
युक्ताहारविहारस्य भ. गी. ६।१७
युक्तेन मनसा वयं देवस्य सवितुः सवे। सुवर्गेयाय शक्त्या.. श्वेता. २।२
युक्तो मन्येत तत्त्ववित् भ. गी. ५।८
युक्त्या वै चरतो ह्यस्य संसारो गोष्पदाकृतिः महो. ६।९
युक्त्या श्रुत्या स्वानुभूत्या ज्ञात्वा सार्वात्म्यमात्मना। (स्वात्मन्येव सदा स्थित्या मनो नश्यति योगिनः।) अध्यात्मो. ४
युक्त्वाय मनसा देवान् सुवर्यतो धियां दिवम्। बृहज्ज्योतिः करिष्यतः सविता प्रसुवाति तान् श्वेता. २।३
युगपत्सम्भवे यस्मादसम्बन्धो विषाणवत् अ. शां. १६
युजे वां ब्रह्म पूर्व्यं नमोभिर्विश्लोकायन्ति पथ्येव सूराः श्वेता. २।५
युज्यते नात्र संशयः भ. गी. १०।७
युज्यते वेष्टनं वायोराकाशस्य च खण्डनम्। ग्रन्थनं च तरङ्गाणामास्था नायुषि युज्यते महो. ३।११
युज्यन्ते हास्मै सर्वाणि भूतानि श्रैष्ठ्याय बृह. ५।१३।२
युञ्जते मन उत युञ्जते धियो विप्रा विप्रस्य बृहतो विपश्चितः श्वेता. २।४
युञ्जतो योगमात्मनः भ. गी. ६।१९
युञ्जन्नेवं सदाऽऽत्मानं [भ. गी. ६।१५+६।२८
युञ्जानः प्रथमं मनस्तत्त्वाय सविता धियः श्वेता. २।१
युञ्जीत प्रणवे चेतः प्रणवो ब्रह्म निर्भयम्। प्रणवे नित्ययुक्तस्य न भयं विद्यते क्वचित् आगम. २५
युद्धाय कृतनिश्चयः भ. गी. २।३७
युद्धे चाप्यपलायनम् भ.गी. १८।४३

युद्धेन पौरुषेण च तं हेन्द्र उवाच
प्रतर्दन वरं ते ददानीति कौ. त. ३।१
युद्धे प्रियचिकीर्षवः भ. गी. १।२३
युद्धयस्व जेताऽसि रणे सपत्नान् भ. गी. ११।३४
युद्धयस्व विगतज्वरः भ. गी. ३।३०
युधामन्युश्च विक्रान्तः भ. गी. १।६
युनक्ति युञ्जते वाऽपि तस्माद्योग
इति स्मृतः मैत्रा. ६।२५
युयुत्सुं समुपस्थितम् भ. गी. १।२८
युयुधानो विराटश्च भ. गी. १।४
युवतिभगगतं बिन्दुमूर्ध्वं नयन्ति...
नैतेषां देहसिद्धिः अमन. २।३१
युवमस्मासु नियच्छतम् ।
प्र प्र यक्षपतिं तिर चित्त्यु. ११।१२
युवा भवति वृद्धोऽपि सततं मूल-
बन्धनात् ध्या. बिं. ७४
युवा यौवनवृत्तेषु दुःखितेषु
सुदुःखधीः अ. पू. २।३०
युवा सुवासाः [अरुणो. १+ ऋ. मं. ३।८।४
युवा स्यात्साधु-युवाध्यायकः तैत्ति. २।८
युवैव धर्मशीलः स्यादनिमित्तं
हि जीवितम् भवसं. १।४१
यूनश्च परदारादि दारिद्र्यं च कुटु-
म्बिनः । पुत्रदुःखस्य नास्त्यन्तो
धनी चेन्म्रियते तदा याज्ञव. २०
ये अन्यधर्मरहिता अन्यासक्तिरहि-
तास्ते तन्मण्डलं न प्राप्नुवन्ति सामर. ७५
ये अन्योपासका भक्ता आनन्दे-
नाश्रिताः कर्मजडाः कर्मकाण्डो-
पासका एव ते सामर. ७५
ये अर्वागुत वा पुराणे वेदं विद्वां-
समभितो वदन्ति । ते परि-
वदन्ति सर्वे अग्निं द्वितीयं तृतीयं
च हंसमिति [बह्वृ. १९+ अथर्व. १०।८।१७
[+तै. आ. २।१५।१
ये अहोरात्रे ते दर्शपूर्णमासौ त्रिसुप. ४
[महाना. १८।१+
ये अर्धमासे पशुबन्धाः [महाना. १८।१+त्रिसुप. ४

ये कण्ठलग्नतुलसीनलिनाक्षमालाः...
श्रीवैष्णवा भुवनमाशु पवित्रयन्ति सुदर्श. १३
ये कर्मणा देवानपियन्ति तैत्ति. २।८।१
ये केचन जगद्भावास्तानविद्यामया-
न्विदुः । कथं तेषु किलात्मज्ञस्त्य-
क्ताविद्यो निमज्जति वराहो. ३।२८
ये केचनैते ते सर्वेऽप्यज्ञानिनः स्वसंवे. ३
ये केचास्मच्छ्रेयांसो ब्राह्मणाः, तेषां
त्वयाऽऽसने न प्रश्वसितव्यम् तैत्ति. १।११।३
ये के चोभयादतः चित्त्यु. १२।६
ये ग्राम्याः पशवो विश्वरूपाः चित्त्यु. ११।११
[+अथर्व. २।३४।४ तै. आ. ३।११।१२
ये च सत्त्वानजा दोषा ये दोषा देह-
सम्भवाः । प्रैषाग्निर्निर्देहेत्सर्वांस्तु-
षाग्निरिव काञ्चनम् १ सं. सो. २।८
(अथ) ये चान्ये ह नित्यप्रमुदिताः...
तैः सह न संवसेत् मैत्रा. ७।८
(अथ) ये चान्ये ह पुरयाजका
अयाज्ययाजकाः... तैः सह न
संवसेत् मैत्रा. ७।८
(अथ) ये चान्ये ह यक्षराक्षस-
भूतगणपिशाचोरगग्रहादी-
नामर्थं पुरस्कृत्य शमयाम
इत्येवं ब्रुवाणाः...तैः सह
न संवसेत् मैत्रा. ७।८
(अथ) ये चान्ये ह वृथाकषाय-
कुण्डलिनः...तैः सह न संवसेत् मैत्रा. ७।८
(अथ) ये चान्ये ह वृथातर्क-
दृष्टान्तकुहकेन्द्रजालैर्वैदिकेषु
परिस्थातुमिच्छन्ति तैः सह
न संवसेत् मैत्रा. ७।८
ये चाप्यक्षरमव्यक्तं भ. गी. १२।१
ये चास्य ऋत्विजः पूर्ववद्वृणीत्वा
सर्वांस्तांश्च वैश्वानरेष्टीर्निर्वपेत्
सर्वस्वं दद्यात् कठश्रु. ३
ये चास्य विषमा केचिद्दिवि
स यदा तेजसाऽभिभूतो भवत्यत्रैष देवः स्वप्नान्न पश्यत्यथ तदैतस्मिञ्छरीरे एतत्सुखं भवति — प्रश्नो. ४।६

स यदा प्रतिबुध्यते — कौ. त. ३।३

स यदा प्रतिबुध्यते तदेतत्सर्वमस्मादेवोत्तिष्ठति — नृसिंहो. ७।६

स यदा प्राणेन सह संयुज्यते तदा पश्यति नद्यो नगराणि बहूनि विविधानि च — सुबालो. ४।२

स यदा बली भवत्यथोत्थाता भवति — छांदो. ७।८।१

स यदा मनसा मनस्यति मन्त्रानधीयीयेत्यथाधीते — छांदो. ७।३।१

स यदा मृत्युमत्यमुच्यत स वायुरभवत्सोऽयं वायुः परेण मृत्युमतिक्रान्तः पवते — बृह. १।३।१३

स यदा विजज्ञावथ हत्वाऽसुरान्विजित्य सर्वेषां भूतानां श्रैष्ठ्यं स्वाराज्यमाधिपत्यं पर्येति — कौ. त. ४।२०

स यदाऽस्माच्छरीरादुत्क्रामति, वागस्मात्सर्वाणि नामान्यभिविसृजते, वाचा सर्वाणि नामान्याप्नोति — कौ. त. ३।४

स यदाहासतो मा सद्गमयेति मृत्युर्वा असत्सदमृतं मृत्योर्मामृतं गमयामृतं मा कुरु — बृ.उ. १।३।२८

स यदि तस्य कर्ता भवति (मा.पा.) — छां.उ. ६।१६।२

स यदिदमत्रान्वायत्तं वेदाथ तथैवोपास्तेऽत्रैवान्वायत्तो भवति — आर्षे. ४।३

स यदिदमेतस्मिन्नन्वायत्तं वेदाथ तथोपास्तेऽन्वायत्तो हैवास्मिन् भवति — आर्षे. २।३

स यदिदं सर्वमभिप्रागाद्यदिदं किञ्च तस्मात्प्रगाथाः — १ ऐत. २।२।३

स यदिदं सर्वमभ्यपवयत यदिदं किञ्च तस्मात्पावमान्यः — १ ऐत. २।२।४

स यदिदं सर्वं पाप्मनो त्रायत यदिदं किञ्च तस्मादत्रयः — १ ऐत. २।१।६

स यदि परेण वोपसृतः स्वेन वाऽर्थेनाभिव्याहरेत् । अभिव्याहार्षमेव विद्यात् — ३ ऐत. १।६।४

स यदि पितरं वा मातरं वा भ्रातरं वा स्वसारं वाऽऽचार्यं वा ब्राह्मणं वा किञ्चिद्भृशमिव प्रत्याह धिक्त्वास्त्वित्येवैनमाहुः — छांदो. ७।१५।२

स यदि पितृलोककामो भवति सङ्कल्पादेवास्य पितरः समुत्तिष्ठन्ति, तेन पितृलोकेन सम्पन्नो महीयते — छांदो. ८।२।१

स यदिमानि भूतानि सर्वाणि भूतानि पादि तस्मात्पदम् — १ऐत. २।२।९

स यदि विचिकित्सेत्स णकारं ब्रवाणी३ँ अणकारा३ँ इति — ३ ऐत. २।६।२

स यदि स्त्रियं पश्येत्समृद्धं कर्मेति विद्यात् — छांदो. ५।२।८

स यदि ह वा अपि मृषा वदति सत्यं हैवास्योदितं भवति — १ ऐत. १।५।३

स यदेभ्यः सर्वेभ्यो भूतेभ्योऽर्चत, तस्मादृक् — १ ऐत. २।२।७

स यदेभ्यः सर्वेभ्योऽर्वेभ्योऽर्चत तस्मादर्धर्चः — १ ऐत. २।२।८

स यदेभ्यः सर्वेभ्यो भूतेभ्यः क्षरति, न चैनमतिक्षरन्ति — १ ऐत. २।२।१०

स यदेवंविदस्माल्लोकात्प्रैत्यथैभिरेव प्राणैः सह पुत्रमाविशति — बृह. १।५।१७

स यदैतत्सर्वमपेक्षते तदैतत्सर्वमस्मिन्प्रविशति — नृसिंहो. ७।६

स यदोत्क्रमिष्यन् भवति, नैनं घोष९ शृणोति [बृह. ५।९।१+ — मैत्रा. २।८

स यद्धैनच्चक्षुषाऽग्रहैष्यद्दृष्ट्वा हैवान्नमत्रप्स्यत् — २ ऐत. ३।५

स यद्धैनच्छिश्नेनाग्रहैष्यद्विसृज्य हैवान्नमत्रप्स्यत् — २ ऐत. ३।९

स यद्धैनच्छ्रोत्रेणाग्रहैष्यच्छ्रुत्वा हैवान्नमत्रप्स्यत् — २ ऐत. ३।६

स यद्धैनत्त्वचाऽग्रहैष्यत्स्पृष्ट्वा हैवान्नमत्रप्स्यत् — २ ऐत. ३।७

स यद्धैनत्प्राणेनाग्रहैष्यदभिप्राण्य हैवान्नमत्रप्स्यत् — २ ऐत. ३।४

स यद्धैनद्वाचाऽग्रहैष्यदभिव्याहृत्य हैवान्नमत्रप्स्यत् — २ ऐत. ३।३

स यद्धैनन्मनसाऽग्रहैष्यद्ध्यात्वा हैवान्नमत्रप्स्यत् — २ ऐत. ३।८

स यद्यगदः स्यात् पुत्रस्यैश्वर्ये पिता वसेत् — कौ. उ. २।१५

स यद्यदेवासृजत तत्तदत्तुमध्रियत — बृह. १।२।५

स यद्यनुरुद्ध्यते तद्भवति — निरुक्तो. १

स यद्यनेन किञ्चिदक्ष्णया कृतं भवति तस्मादेन९ सर्वस्मात्पुत्रो मुञ्चति — बृह. १।५।१७

स यद्येकमात्रमभिध्यायीत स तेनैव संवेदितस्तूर्णमेव जगत्यामभिसम्पद्यते — प्रश्नो. ५।३

स यद्येतेषां (स्वप्ने) किञ्चित् पश्येत् , उपोष्य पायसं स्थालीपाकं श्रपयित्वा रात्रिसूक्तेन प्रत्यृचं हुत्वाऽन्येनान्नेन ब्राह्मणान्भोजयित्वा चरुं स्वयं प्राश्नीयात् — ३ ऐत. २।४।७

स यश्चन्द्रमसो देवानां भूर्भुवःस्वरादीनां सर्वेषां लोकानां च — भस्मजा. २।५

स यश्च सङ्क्रामत्येकपञ्चाशत् — तैत्ति. २।१०

स यश्चायमशरीरः प्रज्ञात्मा यश्चासावादित्य एकमेवतदिति — ३ ऐत. २।३।२

स यश्चायं पुरुषे । यश्चासावादित्ये स एकः [तैत्ति. — २।८+३।१०।४

स यश्चित्तं ब्रह्मेत्युपास्ते चित्तान्वै स लोकान्ध्रुवान्ध्रुवः प्रतिष्ठितान् प्रतिष्ठितोऽव्यथमानानव्यथमानोऽभिसिद्ध्यति — छांदो. ७।५।३

स यस्तान् पुरुषान्निरुह्य प्रत्यूह्य (मा. पा.) — बृह. ३।९।२६

स यस्तान्पुरुषान्निरुह्य प्रत्युह्यात्यक्रामत् — बृह. ३।९।२६

स यस्तं न विद्यात्कथं कुर्यादथ विद्वान्कुर्यात् — छांदो. २।२४।२

स यः सङ्कल्पं ब्रह्मेत्युपास्ते क्लृप्तान्वै स लोकान्ध्रुवान्ध्रुवः प्रतिष्ठितान् प्रतिष्ठितोऽव्यथमानानव्यथमानोऽभिसिद्ध्यति — छांदो. ७।४।३

स यः स पाप्मा — बृह. १।३।२

स यः स्मरं ब्रह्मेत्युपास्ते यावत् स्मरस्य गतं तत्रास्य यथाकामचारो भवति — छांदो. ७।१३।२

स यः कामयेत महत्प्राप्नुयामित्युदगयन आपूर्यमाणपक्षस्य पुण्याहे...पु९सा नक्षत्रेण मन्थ९ संनीय जुहोति — बृह. ६।३।१

स यः कामयते महत्प्राप्नुयां(मा.पा.) — बृह. ६।३।१

स याति परमां गतिम् — भ. गी. ८।१३

स यामिच्छेत्कामयेत मेति... — बृह. ६।४।९

स यामेवामु९ सावित्रीमन्वाहैषैव स यस्मा अन्वाहतस्य प्राणा९स्त्रायते — बृह. ५।१४।४

स यावतीयं त्रयी विद्या तावद्ध जयति — बृह. ५।१४।५

स यावत्क्षिप्येन्मनस्तावदादित्यं गच्छति — छांदो. ८।६।५

स यावदप्येतेषामेकैकं न प्राप्नोत्यकृत्स्न एव तावन्मन्यते — बृह. १।४।१७

स यावदस्माच्छरीरादनुत्क्रान्तो भवति तावज्जानाति — छांदो. ८।६।४

स यावदादित्य उत्तरत उदेता दक्षिणतोऽस्तमेता छांदो. ३।१०।४
स यावदादित्यः पश्चादुदेता पुरस्तादस्तमेता छांदो. ३।९।४
स यावदादित्यः पुरस्तादुदेता पश्चादस्तमेता [छांदो. ३।६।४+७।४
स यावदादित्यो दक्षिणत उदेतोत्तरतोऽस्तमेता छांदो. ३।८।४
स यावदिदं प्राणि तावद्ध जयति बृह. ५।१४।३
स यावदेषु त्रिषुलोकेषु तावद्ध जयति बृह. ५।१४।१
स यावद्ध वा इन्द्र एतमात्मानं न विजज्ञेतावदेनमसुरा अभिबभूवुः कौ. त. ४।२०
स यावन्मनसोगतंतत्रास्य..(मा.पा.) छां. उ. ७।३।२
स यावान् ह वै वाजपेयेन यजमानस्य लोको भवति तावानस्य लोको भवति बृह. ६।४।३
स यां प्रथमामाहुतिं जुहुयात्तां जुहुयात्प्राणाय स्वाहेति प्राणस्तृप्यति छांदो. ५।१९।१
स युक्तः कृत्स्नकर्मकृत् भ. गी. ४।१८
स युक्तः स सुखी नरः भ. गी. ५।२३
स येन यज्ञक्रतुना याजयेत्सोऽरण्यं परेत्य शुचौ देशे स्वाध्यायमेवैनमधीयन्नासीत् सहवै. २१
स योगी परमो मतः भ. गी. ६।३२
स योगी ब्रह्मनिर्वाणं भ. गी. ५।२४
स योगी मयि वर्तते भ. गी. ६।३१
स योत एकैकमुपास्ते न स वेद बृह. १।४।७
स योऽतोऽश्रुतोऽगतोऽमतोऽनतोऽदृष्टोऽविज्ञातोऽनादिष्टः श्रोता मन्ता द्रष्टा देष्टा घोष्टा विज्ञाता प्रज्ञाता सर्वेषां भूतानामन्तरपुरुषः स म आत्मेति विद्यात् ३ ऐत. २।४।८
स यो ध्यानं ब्रह्मेत्युपास्ते यावद्ध्यानस्य गतं तत्रास्य यथाकामचारो भवति छांदो. ७।६।२
स यो नाम ब्रह्मेत्युपास्ते यावन्नाम्नो गतं तत्रास्य यथाकामचारो भवति छांदो. ७।१।५

स योऽन्नं ब्रह्मेत्युपास्तेऽन्नवतो वै स लोकान्पानवतोऽभिसिद्ध्यति छांदो. ७।९।२
स योऽन्यमात्मनः प्रियं ब्रुवाणं ब्रूयात्प्रियꣳ रोत्स्यतीश्वरः बृह. १।४।८
स योऽपो ब्रह्मेत्युपास्ते आप्नोति सर्वान्कामाꣳ स्तृप्तिमान्भवति छांदो. ७।१०।२
स यो बलं ब्रह्मेत्युपास्ते यावद्बलस्य गतं तत्रास्य यथाकामचारो भवति छांदो. ७।८।२
स यो म आयुरमृतमित्युपास्ते सर्वमायुरस्मिँल्लोक एत्याप्नोति कौ. त. ३।२
स यो मनुष्याणाꣳ राद्धः समृद्धो भवत्यन्येषामधिपतिः बृह. ४।३।३३
स यो मनो ब्रह्मेत्युपास्ते यावन्मनसो गतं तत्रास्य यथाकामचारो भवति छांदो. ७।३।२
स यो मां विजानीयान्नास्य केन च कर्मणा लोको मीयते कौ. त. ३।१
स यो वाचं ब्रह्मेत्युपास्ते यावद्वाचो गतं तत्रास्य यथाकामचारो भवति छांदो. ७।२।२
स यो विज्ञानं ब्रह्मेत्युपास्ते विज्ञानवतो वै स लोकाञ्ज्ञानवतोऽभिसिद्ध्यति छांदो. ७।७।२
स यो ह वै तदच्छायमशरीरमलोहितं शुभ्रमक्षरं वेदयते यस्तु सोम्य स सर्वज्ञः सर्वो भवति प्रश्नो. ४।१०
स यो ह वैतद्भगवन्मनुष्येषु प्राणान्तमोङ्कारमभिध्यायीत प्रश्नो. ५।१
स योऽस्य प्राङ्सुषिः स प्राणस्तच्चक्षुः स आदित्यस्तत्तेजोऽन्नाद्यमित्युपासीत छांदो. ३।१३।१
स यो हवै परमंब्रह्मवेद ब्रह्मैवभवति मुण्ड. ३।२।९
स यो ह वै मनुष्याणां राद्धः समृद्धो भवति.— (मा. पा.) बृह. ४।३।३३
स यो ह वै तत्परमं ब्रह्म यो वेद वै मुनिः रुद्रहृ. ५२
स यो ह वै सावित्रस्याष्टाक्षरं पदं श्रियाभिषिक्तंतत्साम्नोऽङ्गं वेद श्रिया हैवाभिषिच्यते नृ. पू. ९।३

स यो हैतमेवमुपास्त एतेषां सर्वेषामात्मा भवति	कौ.त.४।१६।१७
स यो हैतमेवमुपास्ते जिष्णुर्ह वाऽपराजिष्णुरन्यतस्तज्ज्यायान् भवति	कौ. त. ४।७
स यो हैतमेवमुपास्तेऽतिष्ठाः सर्वेषां भूतानां मूर्धा भवति	कौ. त. ४।२
स यो हैतमेवमुपास्ते तेजस आत्मा भवति	कौ. त. ४।४
स योहैतमेवमुपास्तेनाम्नआत्माभवति	कौ. त. ४।९
स यो हैतमेवमुपास्तेऽन्नस्यात्माभवति	कौ. त. ४।३
स यो हैतमेवमुपास्ते पूर्यते प्रजया पशुभिर्नो एव स्वयं नास्य प्रजा पुरा कालात्प्रवर्तते	कौ. त. ४।६
स यो हैतमेवमुपास्ते प्रतिरूपो हैवास्य प्रजायामाजायते नाप्रतिरूपः	कौ. त. ४।१०
स यो हैतमेवमुपास्ते प्रजायते प्रजया पशुभिः	कौ. त. ४।१४
स यो हैतमेवमुपास्ते विन्दते द्वितीयाद्द्वितीयवान्भवति	कौ. त. ४।११
स यो हैतमेवमुपास्ते विषासहिर्वा एष भवति	कौ. त. ४।८
स यो हैतमेवमुपास्ते सर्वं हास्मा इदं श्रैष्ठ्याय यम्यते	कौ. त. ४।१५
स यो हैतमेवमुपास्ते नो एव स्वयं नास्य प्रजा पुरा कालात्सम्मोहमेति (कालात्प्रमीयते)	कौ.त.४।१२,१३
स यो हैतं महद्यक्षं प्रथमजं वेद सत्यं ब्रह्मेति	बृह. ५।४।१
स यो हैतानन्तवत उपास्तेऽन्तवन्त॰ स लोकं जयति	बृह. १।५।१३
(अथ) स यो हैताननन्तानुपास्तेऽनन्त॰ स लोकं जयति	बृह. १।५।१३
स यो हैतामवरपरां संहितां वेद	३ ऐत. १।६।३
स यो हैतां दैवीं वीणां वेद श्रुतवदनो भवति	३ ऐत. २।५।३
स यो हैतौ णकारषकारावनुसंहितमृचो वेद सबलां सप्राणां संहितां वेदायुष्यमिति विद्यात्	३ ऐत. २।६।१
सरसामस्मि सागरः	भ.गी. १०।२४
सरसा॰ सपिष्टान् गन्धार मम चित्ते रमन्तु स्वाहा	महाना. १४।५
सरस्वती कुहूश्चैव सुषुम्नापार्श्वयोः स्थिते । गान्धारा हस्तिजिह्वा च इडायाः पृष्ठपार्श्वयोः	जा. द. ४।१४
सरस्वती तथा चोर्ध्वगता जिह्वा तथा मुने । हस्तिजिह्वा तथा सव्यपादाङ्गुष्ठान्तमिष्यते	जा. द. ४।२१
सरस्वती तु या नाडी सा जिह्वान्तं प्रसर्पति	यो. शि. ५।२३
सरस्वती रत्नरूपं च दुर्गा हैमं लिङ्गं पूजयामास भक्त्या	सि. शि. २५
सरस्वत्याः सर्वे वेदा अभवन्	गायत्रीर. १
सराणां सप्तकं वापि बिभृयात् कण्ठदेशतः । मुकुटे कुण्डले चैव कर्णिकाहारकेऽपि वा	रु. जा. १८
स रात्रिभिरेवा च पूर्यते अप च क्षीयते	बृह. १।५।१४
स राम इति लोकेषु विद्वद्भिः प्रकटीकृतः	रा. पू. ता. १।२
स रावण इति ख्यातो यद्वा रावाच्च रावणः	रा.पू.ता. ४।१८
स-रि-ग-म-प-ध-नि-स-संज्ञै-र्वैराग्यबोधकरैः...परमहंसाश्रमेणास्खलितस्वस्वरूपध्यानेन देहत्यागंकरोति समुक्तोभवति	ना. प. ३।१
सरूपोऽसौ मनोनाशो जीवन्मुक्तस्य विद्यते	अ. पू. ४।१८
स रौद्र॰ सामाभिगायति	छांदो. २।२४।७
सर्गाणामादिरन्तश्च	भ. गी. १०।३२
सर्गादिकाले भगवान् विरिञ्चिरुपास्यैनं सर्गसामर्थ्यमाप्य । तुतोष चित्ते वाञ्छितार्थांश्च लब्ध्वा धन्यः सोपास्यैपासको भवति धाता	द. मू. २२

सर्गेऽपि नोपजायन्ते — भ. गी. १४।२

सर्गे यान्ति परन्तप — भ. गी. ७।२७

सर्प इति सर्पविदः (उपासते) — मुद्गलो. ३।२

सर्पत्वेन यथा रज्जू रजतत्वेन शुक्तिका। विनिर्णीता विमूढेन देहत्वेन तथाऽऽत्मता — यो. शि. ४।२२

सर्पा गन्धर्वाः पितरस्तन्निधनमेतत्साम सर्वस्मिन्प्रोतम् — छांदो. २।२१।१

सर्पाणामस्मि वासुकिः — भ. गी. १०।२८

सर्पादौ रज्जुसत्तेव ब्रह्मसत्तैव केवलम्। प्रपञ्चाधाररूपेण वर्ततेऽतो जगन्नहि — आ. प्र. १३

सर्व आत्मा जायते पुरुषोत्तमात् — सि. वि. २

सर्व इन्मामुपयन्ति विश्वतः — बा. मं. २०

सर्व ऊष्माणः प्रजापतेरात्मनः — छांदो. २।२२।३

सर्व एते पुण्यलोका भवन्ति — छांदो. २।२३।१

सर्व एते विष्णुलिङ्गिनः शिखिन उपवीतिनः शुद्धचित्ताः... पुण्यश्लोका भवन्ति — शाट्याय. ११

सर्व एव त आयुर्यन्ति — तैत्ति. २।३

सर्व एव महारथाः — भ.गी. १।६

सर्व एव विमुच्यन्ते ये नराः शिवमाश्रिताः — शिवो. १।३२

सर्वकरणानि मनसि सम्प्रतिष्ठाप्य ध्यानम् — अ. शिखो. ३

सर्वकरणोपसंहाराद्धार्यधारणा ब्रह्म तुरीयम् — अ. शिखो. ३

सर्वकर्ता च योगीन्द्रः स्वतन्त्रोऽनन्तरूपवान् — यो.शि. १।१५०

सर्वकर्मकृदप्यहम् — मैत्रे. ३।१५

सर्वकर्मनिराकरणमावाहनम् [मं. ब्रा. २।५+ — अ. पू. १

सर्वकर्मपरित्यागी नित्यतृप्तो निराश्रयः। न पुण्येन न पापेन नेतरेण च लिप्यते — अ. पू. ५।९७

सर्वकर्मफलत्यागं [भ.गी.१२।११ +१८।२

सर्वकर्मफलादीनां मनसैव न कर्मणा। निपुणो यः परित्यागी सोऽसंन्यस्त इति स्मृतः — अ. पू. २।६

सर्वकर्मविनिर्मुक्तः काम-क्रोध-लोभ-मोह-मद-मात्सर्यादिकं दग्ध्वा त्रिगुणातीतः...स्थिरमतिर्नानृतवादी गिरिकन्दरेषु वसेत् — ना. प. ७।२

सर्वकर्माणि मनसा — भ. गी. ५।१३

सर्वकर्माण्यपि सदा — भ.गी. १८।५६

सर्वकर्मा सर्वकामः सर्वगन्धः सर्वरसः सर्वमिदमभ्यात्तः — छांदो. ३।१४।४

सर्वकारणकार्यात्मा कार्यकारणवर्जितः — ते. बिं. ५।१

सर्वकारणं परं ब्रह्म — मं. ब्रा. ३।१

सर्वकालं हंसं प्रकाशकम् — पा. ब्र. ४

सर्वकालाबाधितं ब्रह्म — त्रि.म.ना. १।२

सर्वक्षेत्रेषु भारत — भ. गी. १३।३

सर्वगं सच्चिदात्मानं ज्ञानचक्षुर्निरीक्षते। अज्ञानचक्षुर्नेक्षेत भास्वन्तं भानुमन्धवत् — वराहो. २।१८

सर्वगः सर्वसम्बन्धो गत्यभावान्न गच्छति। नास्त्यसावाश्रयाभावात्सद्रूपत्वादथास्ति च — महो. २।८

सर्वगुह्यतमं भूयः — भ. गी. १८।६

सर्वगो ह्येष ईश्वरः क्रियाज्ञानात्मा — नृसिंहो. ९।४४

सर्वचिन्तावधिर्गुरुः — ते. बिं. ५।१

सर्वचिन्तां परित्यज्य चिन्मात्रपरमो भव — शांडि. १।७।२०

सर्वचिन्तां परित्यज्य सावधानेन चेतसा। नाद एवानुसन्धेयो योगसाम्राज्यमिच्छता — वराहो. २।८३

सर्वचिन्तां समुत्सृज्य सर्वचेष्टाविवर्जितः। नादमेवानुसन्दध्यान्नादे चित्तं विलीयते — ना. बिं. ४१

सर्वजगदात्मत्वेन पश्यंस्त्यक्ताहङ्कारो ब्रह्माहमस्मीति चिन्तयन्निदं सर्वं यदयमात्मेति भावयन्कृतकृत्यो भवति — मं. ब्रा. २।८

सर्वजनविश्वजनशत्रुजनवश्यजनसर्वजनस्य दृशं लं लां श्रीं ह्लां ह्रीं मनः स्तम्भय स्तम्भय — लाङ्गूलो. ८

सर्वज्यानीं यास्यतीति विद्याद्य-
स्तथाऽधीते संहितो. १।२
सर्वज्वरोच्चाटनीं च सर्वमन्त्रप्रभञ्ज-
नीम् ।...मातङ्गीं मदिरामोदां
वन्दे तां जगदीश्वरीम् वनदु. २०
सर्वज्ञता हि सर्वत्र भवतीह
महाधियः अ. शां. ८९
सर्वज्ञत्वं परेशत्वं सर्वसम्पूर्ण-
शक्तिता । अनन्तशक्तिमत्त्वं
च मदनुस्मरणाद्भवेत् यो. शि. ३।२५
सर्वज्ञं महामायं महाविभूतिं नृसिंहो. ५।६
सर्वज्ञं सर्वगं शान्तं सर्वेषां हृदये
स्थितम् । सुसंवेद्यं गुरुमतात्
सुदुर्बोधमचेतसाम् यो. शि. ३।२०
सर्वज्ञः पञ्चकृत्यसम्पन्नः सर्वेश्वर
ईशः पशुपतिः जाबाल्यु. २
सर्वज्ञः सर्वेश्वरः सर्वभूतान्तरात्मा
सर्वभूताधिवासः सर्वभूतनि-
गूढो भूतयोनिर्योगैकगम्यः शांडि. २।१।४
सर्वज्ञानविमूढांस्तान् भ. गी. ३।३२
सर्वज्ञानानिव्याकरणमुद्रं(गायत्र्याः) सन्ध्यो. २३
सर्वज्ञानित्वतृप्त्यनादिबोधस्वतन्त्र-
नित्यमलुप्तानन्तं षट्कोणशक्तयः ना.पू.ता. ६।१
सर्वज्ञेशो मायालेशसमन्वितो
व्यष्टिदेशं प्रविश्य तया
मोहितो जीवत्वमगमत् पैङ्गलो. १।५
सर्वज्ञो मघोऽप्रमेयोऽनाद्यन्तः मैत्रा. ७।१
सर्वज्ञोऽसौ भवेत्कामरूपः पवन-
वेगवान् यो शि. १।१४८
सर्वतत्त्वमसद्विद्धि ह्यहं भूमा
सदाशिवः ते. बिं. ३।५१
सर्वतन्त्रेषु गोप्यमहाविद्या भवति मं. ब्रा. १।४
सर्वतः खल्वयं मुखवान्विश्व-
रूपत्वात् अव्यक्तो. ३
सर्वतः पाणिपादं तत्सर्वतोऽक्षि-
शिरोमुखम् । सर्वतः श्रुति-
मल्लोके सर्वमावृत्य तिष्ठति
[श्वेताश्व. ३।१६+ भ.गी. १३।१४
सर्वतः पाणिपादान्ता सर्वतोऽक्षि-
शिरोमुखा । सर्वतः श्रुतिमत्येषा
सर्वमावृत्य तिष्ठति गुह्यका. ४८
सर्वतः श्रुतिमल्लोके भ. गी. १३।१४
सर्वतः सम्प्लुतोदके भ. गी. २।४६
सर्वतः स्वरूपमेवपश्यञ्जीवन्मुक्ति-
मवाप्य प्रारब्धप्रतिभासनाश-
पर्यन्तं चतुर्विधं स्वरूपं ज्ञात्वा
देहपतनपर्यन्तं स्वरूपा-
नुसन्धानेन वसेत् ना. प. ७।३
सर्वतीर्थस्वरूपोऽस्मि परमात्मा-
स्म्यहं शिवः मैत्रे. ३।१२
सर्वतेजःप्रकाशात्मा नादानन्द-
मयात्मकः ते. बिं. ५।३
सर्वतोऽक्षिशिरोमुखम् भ. गी. १३।१४
सर्वतो मां पाहि पाहि समन्तात् गणप. ३
सर्वतोमुखत्वान्नृसिंहत्वाद्भीषण-
त्वाद्भद्रत्वात्...मनआदि-
साक्षिणमन्विच्छेत् नृसिंहो. ७।५
सर्वतो मुखमसर्वतोमुखं नृसिंह-
मनृसिंहं भीषणमभीषणं..
नृसिंहानुष्टुभैव बुबुधिरे नृसिंहो. ६।१
सर्वतोमुखमित्याह—सर्वतः खल्वयं
मुखवान् विश्वरूपत्वात् अव्यक्तो. ३
सर्वतोमुखं पञ्चमं स्थानं (जानीयात्) नृ. पू. २।३
सर्वतो वितता दृष्टिः प्रत्यग्भूता
शनैः शनैः अमनं. २।६३
सर्वत्र गतास्तोभावः सर्वत्रनिवृत्ताः
सर्वत्र प्रवृत्ताः संहितो. २।१
सर्वत्रगमचिन्त्यं च भ. गी. १२।३
सर्वत्र चतुर्थस्वरा मन्द्रस्वराश्च
प्रस्तावा चतुर्थमन्द्रातिस्वार्याश्च
स्वराश्च भवन्ति संहितो. २।२
सर्वत्र जडहीनात्मा सर्वेषा-
मन्तरात्मकः ते. बिं. ३।३४
सर्वत्र तृप्तिरूपोऽहं परामृत-
रसोऽस्म्यहम् ते. बिं. ३।३९
सर्वत्र दानप्रतिग्रहः सोमयाज्यपूतो
भवति संहितो. ५।१

सर्वत्रानिकेतः स्थिरमतिः...कटि-
सूत्रं च कौपीनं दण्डं वस्त्रं
कमण्डलुं सर्वमप्सु विसृज्याथ
जातरूपधरश्चरेदात्मान-
मन्विच्छेत् — ना. प. ३।८७
सर्वत्रनीरसमिह तिष्ठत्यात्मरसंमनः — अ. पू. २।९
सर्वत्र पुण्यापुण्यवर्जितः ज्ञानाज्ञान-
मपि विहाय...प्रणवात्मकत्वेन
देहत्यागं करोति यः सोऽवधूतः — तुरीया. ३
सर्वत्र भानुवन्मुमुक्षूणामाधारः
स्वयञ्ज्योतिर्ब्रह्माकाशः सर्वदा
विराजते — ना. प. ८।२३
सर्वत्र भावना गन्धः — मं. ब्रा. २।५
सर्वत्र युग्मकृत्या ब्राह्मणानर्चयेत् — ना. प. ४।३९
सर्वत्र रोहपूर्वेष्ववरोहपूर्वाण्यु-
दात्तेष्वनुदात्तान्यभिगीते-
ष्वनभिगीतानि — संहितो. २।१
सर्वत्र वर्तते जाग्रत्स्वप्नं जाग्रति
वर्तते । सुषुप्तं च तुरीयं च
नान्यावस्थासु कुत्रचित् — त्रि.ब्रा. १।२।१०
सर्वत्र विगतस्नेहो यः साक्षिवदव-
स्थितः । निरिच्छो वर्तते कार्ये
स जीवन्मुक्त उच्यते — महो. २।५१
सर्वत्र विचरेन्मौनी वायुवद्वीत-
कल्मषः । समदुःखसुखः क्षांतो
हस्तप्राप्तं च भक्षयेत् — ना. प. ५।४८
सर्वत्र विनामितप्रणामितेष्वविना-
मितेष्वविनामितान्यप्रणामितानि — संहितो. २।१
सर्वत्र विसर्गोपगृहेष्वविसृष्टान्यनुप-
गृहीतानि — संहितो. २।२
सर्वत्रशुभाशुभयोरनभिस्नेहः[तुरीया. ३+प. हं. ९
सर्वत्र समदर्शनः — भ. गी. ६।२९
सर्वत्र समबुद्धयः — भ. गी. १२।४
सर्वत्र सर्वतः सर्वब्रह्ममात्रावलो-
कनम् । सद्भावभावनादार्ढ्या-
द्वासनालयमश्नुते — अध्यात्मो. १३
सर्वत्र सुखवानहम् — ते. बिं. ३।३८
सर्वत्र सौक्ष्म्यं लुप्तेषु रेफसन्धयः — संहितो. २।१

सर्वत्र ह्रस्वकर्षणेषु दीर्घकर्षणानि
दीर्घकर्षणेषु मन्द्रकर्षणानि — संहितो. २।२
सर्वत्रान्तःपदार्थविवेचने
मनोयुक्ताभ्यास इष्यते — अद्वयता. ६
सर्वत्रावस्थितं शान्तं चिद्ब्रह्मे-
त्यनुभूयते — अ. पू. ५।२१
सर्वत्रावस्थितो देहे — भ. गी. १३।३३
सर्वत्राहमकर्तेति दृढभावनया-
ऽनया । परमामृतनाम्नी सा
समतैवावशिष्यते — महो. ६।२
सर्वथा वर्तमानोऽपि [भ.गी.६।३१+ १३।२३
सर्वदहनोऽयमात्मेत्याचक्षते — सुबालो. ९।१४
सर्वदा द्वैतरहित आनन्दरूपः
सर्वाधिष्ठानः...परं ब्रह्मानु-
सन्दध्यात् — नृसिंहो. २।८
सर्वदाऽनवच्छिन्नं परं ब्रह्म तस्मा-
ज्जाता परा शक्तिः स्वय-
ञ्जोतिरात्मिका — यो. चू. ७।२
सर्वदा पूर्णरूपोऽस्मि नित्यतृप्तो-
ऽस्म्यहं सदा — ते. बिं. ३।१५
सर्वदा मनोवाक्कायकर्मभिः सर्व-
संसारमुत्सृज्य प्रपञ्चावाङ्मुखः
स्वरूपानुसन्धानेन भ्रमरकीट-
न्यायेन मुक्तो भवति — ना. प. ५।९२
सर्वदा यमामनन्ति यन्नमस्यन्ति
देवाः स ब्रह्मा स शिवः — सूर्यता. १।२
सर्वदा शुचिरशुचिर्वा पठन्ब्राह्मणः
सलोकतां समीपतां सरूपतां
सायुज्यतामेति — कलिसं. ५
सर्वदा समरूपोऽस्मि शान्तोऽस्मि
पुरुषोत्तमः — मैत्रे. ३।२४
सर्वदा समस्तेन साम मां प्रति मां
प्रतीति सर्वेण समस्तेन साम — छांदो. २।९।१
सर्वदा सर्वशून्योऽहं सर्वात्मा-
ऽऽनन्दवानहम् — ते. बिं. ३।२७
सर्वदा सर्वसोम्येति प्रणवपूर्वकं
कमण्डलुं परिगृह्य...स्वाश्रमा-
चारपरो भवेत् — ना. प. ४।५०

सर्वदा सुलभोऽस्म्यहम् मैत्रे. ३।१५
सर्वदा ह्यजरूपोऽहं नीरागोऽस्मि
निरञ्जनः ते. बिं. ३।४२
सर्वदिव्यदेहमध्ये परमात्मा प्रकाशितः
विनिर्मुक्तभवसागरः स्वर्गे
देवमध्ये उत्तमस्वरूपस्य
बुद्धिप्रकाशः अस्मिन्मध्ये
मायामोहं परित्यजेत् अद्वैतो. ४
सर्वदुष्टप्रशमनं सर्वैश्वर्यफलप्रदम् ।
वामदेवं महाबोधदायकं
पावकात्मकम् पञ्चब्र. ५
सर्वद्वयविहीनोऽहं दृग्रूपो-
ऽस्म्यहमेव हि ते. बिं. ३।१९
सर्वदेवमयं ब्रह्म तथा प्रीणाति
विश्वभुक् गान्धर्वो. ७
सर्वदेवमयं शान्तं शान्त्यतीतं
स्वराद्बहिः पञ्चब्र. १५
सर्वदेवमयः सर्वप्रपञ्चाधारगर्भितः ।
सर्वाक्षरमयः कालः सदस-
द्व्यक्तिवर्जितः तुरीयो. ३
सर्वदेवस्य मध्यस्थो हंस एव
महेश्वरः ब्र. वि. ६२
सर्वदेवात्मकं रुद्रं नमस्कुर्यात्
पृथक्पृथक् । एभिर्मन्त्रपदैरेव
नमस्यामीशपार्वतीम् रुद्रहृ. २४
सर्वदेवात्मको रुद्रः सर्वे देवाः
शिवात्मकाः रुद्रहृ. ४
सर्वदेवात्मा वै स एकः गणेशो. ४।९
सर्वदेशिकवाक्योक्तिर्येन केनापि
निश्चितम् । दृश्यते जगति
यद्यत्सर्वं मिथ्येति निश्चिनु ते. बिं. ५।५४
सर्वदेशेष्वनुस्यूतः चतूरूपः
शिवात्मकः । यथा महाफले
सर्वे रसाः सर्वप्रवर्तकाः त्रि.ब्रा. १।२।११
सर्वदेहेषु लिङ्गधारणं भवति लिङ्गोप. २
सर्वदोषरहित आनन्दरूपः गणेशो. १।४
सर्वदोषैर्वृतो जीवः कथं ज्ञानेन
मुच्यते यो. शि. १।१६
सर्वद्रष्टा सर्वानुभूरहम् ब्र. वि. १।१०
सर्वद्वन्द्वैर्विनिर्मुक्तो ब्रह्मण्येवाव-
तिष्ठते ना. प. ३।५४
सर्वद्वाराणि संयम्य भ. गी. ८।१२
सर्वद्वारेषु देहेऽस्मिन् भ. गी. १४।११
सर्वधर्मान् परित्यज्य भ. गी. १८।६६
सर्वधर्मान्परित्यज्य निर्ममो
निरहङ्कारो भूत्वा ब्रह्मेष्टं
शरणमुपगम्य तत्त्वमसि...
इत्यादिमहावाक्यार्थानुभवज्ञाना-
द्ब्रह्मैवास्मीति निश्चित्य निर्वि-
कल्पसमाधिना स्वतन्त्रो यति-
श्चरति स सन्न्यासी निरा. ३२
सर्वध्यानयोगज्ञानानां यत्फल-
मोङ्कारः ब्र. शिखो. ३
सर्वनयनः प्रशस्तान्नमयो भूतात्मा
प्राणमय इन्द्रियात्मा सुबालो. ५।१५
सर्वनादमयः शिवः ते. बिं. ५।२
सर्वनिरामयपरिपूर्णोऽहमस्मीति
मुमुक्षूणां मोक्षैकसिद्धिर्भवति आत्मपू. १
सर्वपरिपूर्णतुरीयातीतब्रह्मभूतो
योगी भवति मं. ब्रा. २।९
सर्वपरिपूर्णं ब्रह्म त्रि. म. ना. १।३
सर्वपरिपूर्णानन्तचिन्मयस्तम्भाकारं
(ब्रह्म) त्रि.म.ना. ४।१
सर्वपरिपूर्णो नारायणस्त्वनया
निजया क्रीडति स्वेच्छया सदा त्रि.म.ना. ४।१०
सर्वपरिपूर्णोऽहमेव त्रि. म. ना. ८।६
सर्वपरोक्षा देवस॰ हिता भवति संहितो. १।१
सर्वपर्वसु यत्नेन ह्येषु सम्पूजये-
च्छिवम् शिवो. ७।७५
सर्वपापविशुद्धात्मा परंब्रह्माधि-
गच्छति । मासि मासि
कुशाग्रेण जलबिन्दुं च यः पिबेत् योगो. १७
सर्वपापैः प्रमुच्यते भ. गी. १०।३
सर्वपूर्णस्वरूपोऽस्मिसच्चिदानन्दलक्षणः मैत्रे. ३।१२
सर्वप्रकाशरूपोऽस्मि मैत्रे. ३।२१
सर्वप्रकाशरूपोऽहं परावरसुखो-
ऽस्म्यहम् ते. बिं. ३।१०
सर्वप्रत्यक्षाऽसुरसंहिता भवति संहितो. १।१

सर्वप्रपञ्चभ्रमवर्जितोऽसि, सर्वेषु भूतेषु च भासितोऽसि	ते. बिं. ५।६३
सर्वप्रयत्नेन कुर्याच्छ्राद्धं महालयम्	इतिहा. ९१
सर्वबन्धाः प्रविनश्यन्ति	त्रि. म. ना. ५।४
सर्वभावपदातीतं, ज्ञानरूपं निरञ्जनम्	यो. शि. १।७
सर्वभावान्तरस्थाय चैत्यमुक्त-चिदात्मने । प्रत्यक्चैतन्यरूपाय मह्यमेव नमोनमः	१सं. सो. २।२५
सर्वभावेन भारत [भ. गी. १५।१९	+१८।६२
सर्वभूतस्थमात्मानं	भ. गी. ६।२९
सर्वभूतमसत्सदा	ते. बिं. ३।१
सर्वभूतातिगश्चात्मा	२रुद्रो. ५२
सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनि । सम्पश्यन्ब्रह्म परमं याति नान्येन हेतुना	कैव. १०
सर्वभूतस्थमेकं (वै) नारायणं कारणपुरुषमकारणं परं ब्रह्मो [आ. प्र. १+	नारा. ४
सर्वभूतस्थितं देवं सर्वेशं नित्यमर्चयेत्	ब्र. वि. ७७
सर्वभूतस्थितं यो मां	भ. गी. ६।३१
सर्वभूतहितः शान्तस्त्रिदण्डी सकमण्डलुः । एकारामः परिव्रज्य भिक्षार्थी ग्राममाविशेत्	ना. प. ३।५५
सर्वभूतहिते रताः [भ.गी.५।२५+	१२।४
सर्वभूतातिगश्चात्मा कोशातीतः परात्परः	२रुद्रो. ५२
सर्वभूतात्मभूतात्मा	भ. गी. ५।७
सर्वभूतात्मभूतो हि वासुदेवो महाबलः	ना. महो. २२
सर्वभूताधिवासं च यद्भूतेषु वसत्यधि	ब्र. बिं. २२
सर्वभूताधिवासः सर्वभूतनिगूढो भूतयोनिर्योगैकगम्यः	शांडि. २।४
सर्वभूताधिवासोऽहं सर्वव्यापी स्वराडहम्	ब्र. बिं. १०६
सर्वभूतानां माता मेदिनी	महाना. १०।१४
सर्वभूतान्तरस्थाय नित्यमुक्त-चिदात्मने । प्रत्यक्चैतन्यरूपाय मह्यमेव नमोनमः	वराहो. २।३३
सर्वभूतान्तरात्माऽहमहमस्मि सनातनः	ब्र. बिं. १०९
सर्वभूतान्तर्वर्ती हंस इति प्रतिपादनम्	निर्वाणो. १
सर्वभूतानि कौन्तेय	भ. गी. ९।७
सर्वभूतानि चात्मनि	भ. गी. ६।२९
सर्वभूतानि सम्मोहं	भ. गी. ७।२७
सर्वभूताशयस्थितः	भ. गी. १०।२०
सर्वभूतेभ्योऽभयं दत्त्वाऽरण्यं गत्वा...स्वाच्छरीरादुपलभ्यै-तैनम् (आत्मानम्)	मैत्रा. ६।८
सर्वभूतेषु चात्मानं ततो न विजुगुप्सते । यस्तु सर्वाणि भूतान्यात्मन्येवानुपश्यति	ईशा. ६
सर्वभूतेषुचात्मानं ब्रह्म सम्पद्यतेतदा	जा. द. १२।१०
सर्वभूतेषु येनैकं	भ. गी. १८।२०
सर्वमग्राह्यभावेन हेतुनाजं प्रकाशते	अद्वैत. २६
सर्वमङ्गलमाङ्गल्ये शिवे सर्वार्थ-साधिके । शरण्ये त्र्यम्बके गौरि नारायणि नमोऽस्तु ते	वनदु. १५,९१
सर्वमजीजनत् (दैवी शक्तिर्माया)	बह्वृचो. १
सर्वमनुष्टुप् । एतं मन्त्रराजं यः पश्यति, स पश्यति	ग. पू. ३।६
सर्वमन्तः परित्यज्य शीतलाशय-वर्ति यत् । वृत्तिस्थमपि तच्चित्तमसद्रूपमुदाहृतम्	अ. पू. ४।५१
सर्वमन्त्रान् समुत्सृज्य एतं (अहं ब्रह्मास्मि) मन्त्रं समभ्यसेत् । सद्यो मोक्षमवाप्नोति नात्र सन्देहमणवपि	ते. बिं. ३।७४
सर्वमन्यत्परित्यज्य समस्तार्थव-शिखैतामधीत्य द्विजो गर्भवासा-द्विमुक्तो विमुच्यते	अ. शिखो. ३
सर्वमयस्तद्यदेतदिदम्मयोऽदोमय इति यथाकारी यथाचारी तथा भवति	बृह. ४।४।५

सर्वमस्तीति नास्तीति निश्चयं त्यक्त्वा तिष्ठति — ते. बिं. ४।३९
सर्वमस्मीत्युपासीत, तद्व्रतम् — छांदो. २।२१।४
सर्वमस्यान्नं भवति य एवमेतददितेरदितित्वं वेद — बृह. १।२।५
सर्वमस्यान्नं भवति य एवं वेद — बृह. २।२।४
सर्वमहोरात्राभ्यामभिपन्नम् — बृह. ३।१।४
सर्वमाकाशतामेति नित्यमन्तर्मुखस्थितेः — अ. पू. १।३२
सर्वमात्ममयं जगत् — ते. बिं. ६।४६
सर्वमात्मा जानीत — मैत्रा. ६।७
सर्वमात्मानं पश्यति नैनं पाप्मा तरति — बृह. ४।४।२३
सर्वमात्माऽहमात्माऽस्मि परमात्मा परात्मकः। नित्यानन्दस्वरूपात्मा वैदेही मुक्त एव सः — ते. बिं. ४।६२
सर्वमात्मेदमत्राहं किं वाञ्छामि त्यजामि किम् — अ. पू. २।३
सर्वमात्मेदमाततम्। अहमन्य इदं चान्यदिति भ्रांतिं त्यजानघ — महो. ६।१२
सर्वमात्मैव कौ दृष्टौ भावाभावौ क्व वा स्थितौ — अ. पू. २।३६
सर्वमात्मैव शुद्धात्मा सर्वं चिन्मात्रमद्वयम् — ते. बिं. ६।३९
सर्वमायुरस्मिँल्लोक एवाप्नोति — कौ. त. ३।२
सर्वमायुरेति [३ ऐत. १।१।३+ १।५।१ [आर्षे.४।३+६।२,३+८।२,४+ — गोपीचं. ८
सर्वमायुरेति ज्योग्जीवति महान् प्रजया पशुभिर्भवति महान् कीर्त्या.. [छांदो. २।११।२+ — २।१२।२।
सर्वमावृत्य तिष्ठति — भ.गी. १३।१४
सर्वमित्याकाशे, तत्प्रतिष्ठेत्युपासीत — तैत्ति. ३।१०।३
सर्वमिदमभ्यात्तोऽवाक्यनादरः — छां. ३।१४।२,३
सर्वमिदं तस्त्वदितो वदामि — बा. मं. २१
सर्वमिदं प्रशास्ति, यदिदं किञ्च — बृह. ५।६।१
सर्वमिदं रक्षति (माया) सर्वमिदं संहरति [नृ. पू. ३।२+ — ग. पू. २।३
सर्वमिदं शिव एव विजानीहि... — त्रि. ब्रा. १।१
सर्वमु ह्येवैष रज उपर्युपरि तपति — बृह. ५।१४।३
सर्वमु ह्येष रज उपर्युपरि तपति — गायत्र्यु. २
सर्वमेकमजं शान्तमनन्तं ध्रुवमव्ययम्। पश्यन्भूतार्थचिद्रूपं शान्त आस्व यथासुखम् — अध्युप. ५
सर्वमेकमिदं शान्तमादिमध्यान्तवर्जितम्। भावाभावमजं सर्वमिति मत्वा सुखी भव — अ. पू. ५।६७
सर्वमेकं परं व्योम को मोक्षः कस्य बन्धता — अ. पू. २।३७
सर्वमेतत्सन्दहति एवंविद्यद्यपवहीव पापं करोति — गायत्र्यु. ९
सर्वमेतदृतं मन्ये — भ.गी. १०।१४
सर्वमेतद्धिया त्यक्त्वा यदि तिष्ठसि निश्चलः। तदाहङ्कारविलये त्वमेव परमं पदम् — अ. पू. ५।५४
सर्वमेतद्विश्वमधितिष्ठत्येको गुणांश्च सर्वान्विनियोजयेद्यः — श्वेताश्व. ५।५
सर्वमेव तत्सम्प्साय शुद्धः पूतोऽजरोऽमृतः संभवति — बृह. ५।१४।८
सर्वमेव परित्यज्य महामौनी भवानघ। निर्वाणवान्निर्मननः क्षीणचित्तः प्रशान्तधीः — अ. पू. ५।११४
सर्वमोङ्कार एव — माण्डू. १
सर्वमौनफलोऽस्म्यहम् — मैत्रे. ३।१६
सर्वयोनिषु कौन्तेय — भ. गी. १४।४
सर्वरोगनिवृत्तिः स्यान्नाभिमध्ये तु धारणात् — जा. द. ६।२४
सर्वलिङ्गं स्थापयति पाणिमन्त्रं पवित्रम् — लिङ्गोप. १
सर्वलोकगुरुश्चास्मि सर्वलोकेऽस्मि सोऽस्म्यहम् — मैत्रे. ३।१
सर्वलोकमध्ये ब्रह्म द्विधारूपं विचरति — अद्वैतो. १
सर्वलोकमहेश्वरम् — भ. गी. ५।२९
सर्वलोकस्तुतिपात्रः सर्वदेशसञ्चारशीलः...जीवन्मुक्तो भवति — मं. ब्रा. २।९
सर्वलोका आत्मनि ब्रह्मणि मणय इवोताश्च प्रोताश्चेति — सुबालो. १०।१
सर्वलोकात्मकः कस्मादनुतिष्ठामि किं कथम् — १ वराह. १२

सर्वलोकानां सृष्टिस्थित्यन्तकृद्वि- भुरीशः कथं जीवत्वमगमदिति	पैङ्गलो. २।१
सर्वलोकेषु विहरन्नणिमादिगुणा- न्वितः। कदाचित्स्वेच्छया देवो भूत्वा स्वर्गे महीयते	१ यो.त. १०९
सर्ववर्णे महादेवि सन्ध्याविधे सरस्वति	महाना. ११।६
सर्ववर्णेषु धारणं कैलाससिद्धिर्भवति	लिङ्गोप. २
सर्ववस्तुन्युदासीनभाव- (आसनमुच्यते) मासन- मुत्तमम् [त्रि. ब्रा. २।२९+	२ अवधू. २
सर्ववस्तुपरित्यागे शेष आत्मेति कथ्यते	अ. पू. १।४५
सर्ववाचोऽवधिर्ब्रह्म सर्वचिन्ता- वधिर्गुरुः	ते. बिं. ५।१
सर्ववाच्यवस्तु प्रणवात्मकम्	अ. शिखो. १
सर्वविघ्नहरश्चायं प्रणवः सर्वदोषहा	वराहो. ५।७१
सर्वविघ्नहरो मन्त्रः प्रणवः सर्वदोषहा	१ यो. त. ६४
सर्वविद्यारूपोविघसःप्रसरणः(आत्मा)	आर्षे. ९।२
सर्वविद्यापाण्डित्यप्रपञ्चं भस्मीकृत्य स्वरूपं गोपयित्वा..प्रणवात्मक- त्वेन देहत्यागं करोति यः सोऽवधूतः	तुरीया. ३
सर्वविषयपराङ्मुखत्वं प्रत्याहारः	शांडि. १।८।१
सर्ववेदान्ततृप्तोऽस्मि सर्वदा सुलभोऽस्म्यहम्	मैत्रे. ३।१५
सर्ववेदवेदान्तानां नारायणपरब्रह्म- ण्येव तात्पर्यम्	ना.पू.ता. ५।११
सर्ववेदसं वा एतत्सर्वं	महाना. १८।१
सर्ववेदान्तसंलक्ष्यं तद्ब्रह्मेत्य- भिधीयते	ना.उ.ता. १।९
सर्ववेद्यः सर्वज्ञः सर्वसिद्धिदः सर्वेश्वरः सोऽहम्	ना. प. ९।१२
सर्वव्यापिनमात्मानं क्षीरे सर्पिरि- वार्पितम् [श्वेताश्व. १।१६+	ब्रह्मो. २३
सर्वव्यापिनमोङ्कारं मत्वा धीरो न शोचति	आगम. २८
सर्वव्यापी स भगवाँस्तस्मात् सर्वगतः शिवः	श्वेताश्व. ३।११
सर्वव्यापी सर्वभूतानां हृदये सन्निविष्टः मायावी मायया क्रीडति	शांडि. ३।१।३
सर्वव्यापी सर्वभूतान्तरात्मा [श्वेता. ६।११+	गोपालो. ३।१९
सर्वव्यापी सोऽचिन्त्यो निर्वर्ण्यश्च पुनात्यशुद्धान्यपूतानि	१ आत्मो. ३
सर्वशक्तेर्महेशस्य विलासो हि मनो भवेत्। संयमासंयमाभ्यां च संसारः शान्तिमन्वगात्	महो. ४।८७
[उपास्य इति च] सर्वशरीरस्थ- चैतन्यब्रह्मप्रापको गुरुरुपास्यः	निरा. उ. २३
सर्वशरीरिणां जीवस्यैकरूपत्वात्। तस्माज्ञ जीवो ब्राह्मणः	व. सू. ३
सर्वशरीरेषु चैतन्यैकतानताध्यानम्	मं. ब्रा. १।१
सर्वशः पृथिवीपते	भ. गी. १।१८
सर्वशून्यस्वरूपोऽहं सकला- गमगोचरः	ते. बिं. ३।४०
सर्वश्रुत्युत्तमो मृग्यः सकलोप- निषन्मयः	ना. प. ८।६
सर्वसङ्कल्परहितःसर्वनादमयः शिवः	ते. बिं. ५।२
सर्वसङ्कल्परहिता सर्वसंज्ञाविव- र्जिता। सैषा चिदविनाशात्मा स्वात्मेत्यादिकृताभिधा	महो. ५।१०७
सर्वसङ्कल्पशून्यत्वात्सर्वकार्यवि- वर्जनात्। केवलं ब्रह्ममात्र- त्वान्नास्त्यनात्मेति निश्चिनु	ते. बिं. ५।१६
सर्वसङ्कल्पसन्यासश्चेतसा यत्परिग्रहः	महो. २।९
सर्वसङ्कल्पसन्यासी	भ. गी. ६।४
सर्वसङ्कल्पसंशान्तं प्रशान्त- घनवासनम्। न किञ्चिद्भा- वनाकारं यत्तद्ब्रह्म परं विदुः	अ. पू. ५।४८
सर्वसङ्कल्पहीनात्मा चिन्मात्रो- ऽस्मीति सर्वदा	ते. बिं. ४।४४
सर्वसङ्कल्पहीनात्मा वैदेही मुक्त एव सः। निष्कलात्मानिर्म- लात्मा बुद्धात्मा पुरुषात्मकः	ते. बिं. ४।६८

सर्वसंक्षोभिण्यादिचतुर्दशारगा देवताः — भावनो. ४
सर्वसङ्गनिवृत्तात्मा स मामेति न संशयः — वराहो. २।३६
सर्वसन्तोषो विसर्जनम् — मं. ब्रा. २।५
सर्वसन्धिस्थ उदानः — शांडि. १।४।७
सर्वसंसारदुःखानां तृष्णैका दीर्घदुःखदा । अन्तःपुरस्थमपि या योजयत्यतिसङ्कटे — महो. ३।२५
सर्वसंसारेषु विरक्तो ब्रह्मचारी गृही वानप्रस्थो वा...तदु तथा न कुर्यात् — प. हं. प. २
सर्वसंहारसमर्थः परिभवासहः प्रभुर्व्याप्तः...निरस्ताविद्या-तमोमोहोऽहमेवेति — नृसिंहो. २।८
सर्वसाक्षिणमात्मानं वर्णाश्रमवि-वर्जितम् । ब्रह्मरूपतया पश्यन्ब्रह्मैव भवति स्वयम् — वराहो. २।१२
सर्वसारं निरालम्बं रहस्यं वज्रसूचिकम् — मुक्तिको. १।३३
सर्वसिद्धिप्रदा देव्यो बहिर्दशारगा देवताः — भावनो. ४
सर्वसौख्यैरुपास्यमानो न च सर्व-सौख्यान्युपास्यति — सुबालो. ५।१५
सर्वसौभाग्यदं नृणां सर्वकर्मफल-प्रदम् । ...अष्टाक्षरसमायुक्त-मष्टपत्रान्तरस्थितम् — पञ्चब्र. ९
(ततः) सर्वस्मादन्यो विलक्षण-श्चक्षुषः साक्षी — नृसिंहो. २।२
सर्वस्माद्व्यतिरिक्तोऽहं वालाग्राद-प्यहं तनुः । इति यः संविदो ब्रह्मन् द्वितीयाऽहंकृतिः शुभा — महो. ५।९०
सर्वस्य चाहं हृदि सन्निविष्टः — भ. गी. १५।१५
सर्वस्य धातारमचिन्त्यरूपम् — भ. गी. ८।९
सर्वस्य धातारमचिन्त्यरूपमादित्य-वर्णं परं ज्योतिस्तमस उपरि विभाति — त्रि.म.ना. ४।३
सर्वस्य धातारमचिन्त्यशक्ति सर्वागमान्तार्थविशेषवेद्यम् — ना. प. ९।१६
सर्वस्य प्रभुमीशानं सर्वस्य शरणं बृहत् — श्वेता. ३।१७
सर्वस्य प्रणवो ह्यादिर्मध्यमन्त-स्तथैव च — आगम. २७
सर्वस्य प्रभवाप्ययौ (आत्मा) — ना. प. ८।१७
सर्वस्य मेदोमांसक्लेदावकीर्णे शरीरमध्येऽत्यन्तोपहते चित्रभित्तिप्रतीकाशे गान्धर्व-नगरोपमे कदलीगर्भवन्निस्सारे जलबुद्बुदवच्चञ्चले निस्सृतं आत्मानं...पश्यन्ति विद्वांसः — सुबालो. ८।१
सर्वस्य वशी सर्वस्येशानः सर्वस्या-धिपतिः स न साधुना कर्मणा भूयान्नो एवासाधुना — बृह. ४।४।२२
सर्वस्य वशी सर्वस्येशानः सर्वमभिक्षिपन् — आर्षे. ९।२
सर्वस्यात्मनः परायणं यमात्थ — बृह. ३।९।१०
सर्वस्यात्मा भवति य एवं वेद — सुबालो. ९।१४
सर्वस्याऽऽत्मा सर्वभुक् — मैत्रा. ७।१
सर्वस्याभिमतं वक्ता चोदितः पेशलोक्तिमान् । आशयज्ञश्च भूतानां संसारे नावसीदति — महो. ६।६५
सर्वस्येशानः सर्वस्याऽऽन्तरान्तरः — मैत्रा. ७।१
सर्वस्यैतस्याप्ता भवति — बृह. १।२।५
सर्वस्यैतस्यैव कालस्य विभागविशेषाः प्रकाशरूपाः कालरूपा भवन्ति — सीतो. ७
सर्वं कर्माखिलं पार्थ — भ. गी. ४।३३
सर्वं कार्ष्णायसं ज्ञातं तदभिन्नं स्वभावतः — पञ्चब्र. ३१
सर्वं कारणवद्दुःखमस्वं चानित्य-मेव च । न चात्मकृतकं तद्धि तत्र चोत्पद्यते स्वता — आयुर्वे. २४
सर्वं किञ्चिदिदं दृश्यं दृश्यते य-(चि) ज्जगद्गतम् । चिन्नि-ष्पन्दांशमात्रं तन्ना(न्यदस्तीति-भावयम्)न्यत्किञ्चन शाश्वतम् [महो. ४।१०+ — अ. पू. १।४७
सर्वं खल्विदं ब्रह्म [निरा. ११+ — त्रि. म. ना. १।१, गान्धर्वो. ६

सर्वं खल्विदं ब्रह्म तज्जलानिति शान्त उपासीत छांदो. ३।१४।१
सर्वं च खल्विदं ब्रह्म नित्यचिद्घन-मक्षतम् महो. ४।११९
सर्वं च न परं शून्यं न परं नापरात्परम् । अचिंत्यमप्रबुद्धं च न सत्यं न परं विदुः तै. बिं. १।११
सर्वं च मयि पश्यति भ. गी. ६।३०
सर्वं च मे भूयात् चिरञ्जु. ७।४
सर्वं च सद्रूपमसत्यनाशात् वराहो. ३।४
सर्वं चाप्यहमेवेति निश्चयो यो महामते । समादाय विषादाय न भूयो जायते मतिः महो. ६।६०
सर्वं चिन्मात्रमद्वयम् तै. बिं. ६।३९
सर्वं चिन्मात्रमेव हि [तै.बिं.२।२५, २७–२९
सर्वं चेदं क्षयिष्णु पश्यामः मैत्रा. १।५
सर्वं चोदरपोषणस्य नटनं न श्रेयसः कारणम् अमन. १।६
सर्वं जगदानुष्टुभ एवोत्पन्नमनुष्टु-प्प्रतिष्ठितं प्रतितिष्ठति यश्चैवं वेद अन्यक्तो. ६
सर्वं जगदिदं त्वत्तस्तिष्ठति गणप. ५
सर्वं जगदिदं त्वत्तो जायते गणप. ५
सर्वं जगदिदं त्वयि प्रत्येति गणप. ५
सर्वं जगदिदं त्वयि लयमेष्यति गणप. ५
सर्वं जगद्धितं वा एतदक्षरं प्राजापत्यम् अ. शिरः. ३।३
सर्वं जनयति प्राणश्चेतोंऽशून्पुरुषः पृथक् आगम. ६
सर्वं जहाति सर्वः शुध्यति छांदो. ६।११।२
सर्वं ज्ञानप्लवेनैव भ. गी. ४।३६
सर्वं तदत्र गत्वा विन्दतेऽत्र छांदो. ८।३।२
सर्वं तदभिसमेति छांदो. ४।१।४
सर्वं तं परादाद्योऽन्यत्रात्मनः सर्वं वेद बृह. ४।५।७
सर्वं तं परादाद्योऽन्यत्रात्मनो ब्रह्म वेद बृह. २।४।६
सर्वं देवी सृजते विश्वमेतत् गुह्यका. ५४
सर्वं नश्वरमेव तत् महो. ३।५३
सर्वं नारायण एव भवतीति विज्ञायते ना. उ. ता. ३।१
सर्वं पञ्चात्मकं विद्यात्पञ्चब्रह्मात्म-तत्त्वतः पञ्चब्र. २५
(अतः) सर्वं परित्यज्य तत्प्रसक्तं मनोदण्डं करपात्रं दिगम्बरं दृष्ट्वा परिव्रजेद्भिक्षुः ना. प. ५।११
सर्वं पश्यति सर्वः पश्यति प्रश्नो. ४।५
सर्वं पाप्मानं तपति बृह. ४।४।२३
सर्वं पाप्मानं तरति बृह. ४।४।२३
सर्वं पाहि शतक्रतो स्वाहा महाना. ७।४
सर्वं पुनातु मामापोऽसतां च प्रतिग्रहं स्वाहा महाना. ११।२
सर्वं पूर्वपक्षापरपक्षाभ्यामभिपन्नम् बृह. ३।१।५
सर्वं प्रतिष्ठितं तस्मिन् सर्वगं विश्वतोमुखम् । तस्य मध्य-गताः सूर्यसोमाग्निपरमेश्वराः यो. शि. ६।१०
सर्वं प्रकृतिजैर्गुणैः भ. गी. ३।५
सर्वं प्रशान्तमजमेकमनादिमध्यमा-भास्वरं स्वदनमात्रमचैत्यचिह्नम् । सर्वं प्रशान्तमिति शब्द-मयी च दृष्टिर्बाधार्थमेव हि मुधैव तदोमितीदम् महो. ४।९
सर्वं प्रोक्तं त्रिविधं ब्रह्ममेतत् श्वेताश्व. १।१२
सर्वं ब्रह्ममयंप्रोक्तं सर्वं ब्रह्ममयंजगत् तै. बिं. ६।१८
सर्वं ब्रह्मेति यस्यान्तर्भावना सा हि मुक्तिदा । भेददृष्टिरविद्येयं सर्वथा तां विसर्जयेत् महो. ५।११३
सर्वं ब्रह्मेति वै ज्ञानादिन्द्रियग्राम-संयमः । यमोऽयमिति सम्प्रोक्तो-ऽभ्यसनीयो मुहुर्मुहुः तै. बिं. १।१७
सर्वं ब्रह्मेति सङ्कल्पात्सुदृढा-न्मुच्यते मनः महो. ४।१२५
सर्वं ब्रह्मैव केवलम् तै. बिं. ६।४
[+६।६५+६।१०५,६+ यो. शि. ४।१८
सर्वं ब्रह्मैव सततं सर्वं ब्रह्मैव केवलम् तै. बिं. ६।६५
सर्वं ब्रह्मोपनिषदं माहं ब्रह्म निराकुर्यां केनो. शां. पा.
सर्वं भूतमयं चेति त्यक्त्वा नास्तीति भावयेत् अमन. १।१७
सर्वं भूतं भव्यं जायमानं च गणेशो. ३।१

सर्वं भृग्वङ्गिरोमयं अन्तरैते
  त्रयो वेदा भृगूनङ्गिरसः श्रिताः — २ प्रणवो. २१
सर्वं मृत्युनाऽभिपन्नम् — बृह. ३।१।३
सर्वं वा अत्तीति तददितेरदितित्वम् — बृह. १।२।५
सर्वं वा एतदिन्द्रो यज्जगद्यथैवेति — शौनको. २।४
सर्वं वा एष सर्वमश्नोतीति — शौनको. १।५
सर्वं विश्वमिदं नारायणः, य एवं वेद — ना.उ.ता. २।५
सर्वं वै तेऽन्नमाप्नुवन्ति, येऽन्नं
  ब्रह्मोपासते — तैत्ति. २।२।२
सर्वं शाक्तमजीजनत् — बह्वृचो. १
सर्वं शान्तं निरालम्बं व्योमस्थं
  शाश्वतं शिवम् — महो. ५।४५
सर्वं सच्चिन्मयं ततम् [महो.६।११+ — ते. बिं. ६।१,९
सर्वं सच्चिन्मयं विद्धि सर्वं सच्चि-
  न्मयं ततम् — ते. बिं, ६।१
सर्वं सत्यं परं ब्रह्म न चान्यदिति
  या मतिः। तच्च सत्यं वरं
  प्रोक्तं वेदान्तज्ञानपारगैः — जा. द. १।१०
सर्वं सन्त्यज्य दूरेण यच्छिष्टं
  तन्मयो भव — अ. पू. १।४६
सर्वं सन्मात्ररूपत्वात्सच्चिदानन्द-
  मात्रकम् — ते. बिं. ६।३०
सर्वं समतया बुद्ध्या यः कृत्वा
  वासनाक्षयम्। जहाति निर्ममो
  देहं नेयोऽसौ वासनाक्षयः — महो. ६।४४
सर्वं सर्वमयं सर्वे जीवाः सर्वमयाः — नृसिंहो. ९।४
सर्वं समाप्नोषि ततोऽसि सर्वः — भ. गी. ११।४०
सर्वंसहाः समलोष्टाश्मकाञ्चना
  यथोपपन्नचातुर्वर्ण्यभैक्षाचर्यं
  चरन्त आत्मानं मोक्षयन्त इति — आश्रमो. ४
सर्वं सुखं विद्धि सुदुःखनाशात्
  सर्वं च सद्रूपमसत्यनाशात्।
  चिद्रूपमेव प्रतिभानयुक्तं तस्मा-
  दखण्डं मम रूपमेतत् — वराहो. ३।४
सर्वं सौभाग्यदं नृणां सर्वकर्म-
  फलप्रदम् — पं. ब्र. ९
सर्वं ह पश्यः पश्यति सर्वमाप्नोति — छांदो. ७।२६।२
सर्वं ह वा एतदिदं भस्म — भस्मजा. १।४
सर्वं हि पश्यन्पश्यति सर्वमाप्नोति
  सर्वशः — मैत्रा. ७।११
सर्वं हीदं नामानी३ँ सर्वं वाचा-
  ऽभिवदति — १ ऐत. १।६।१
सर्वं हीदं प्राणेनावृतं सोऽयमाकाशः
  प्राणेन बृहत्या विष्टब्धः — १ ऐत. १।६।३
सर्व९ हैवास्मिँल्लोक आयुरेति नैनं
  पुराकालात्प्राणो जहाति — बृह. २।१।१०
सर्व९ हैवास्मिँल्लोक आयुरेति नैनं
  पुराकालान्मृत्युरागच्छति — बृह. २।१।१२
सर्वं ह्ययमात्मा हि सर्वान्तरः — नृसिंहो. ७।२
सर्वं ह्येतद्ब्रह्म [मांडू. २+ — रामो. २।१+
  [नृ. पू.४।२+नृसिंहो. १।२+ — गणेशो. १।१
सर्वं ह्येतद्ब्रह्म आत्मा — राधोप. २।२
सर्वः (शर्वः) सर्वस्य जगतो
  विधाता धर्ताहर्ताविश्वरूपत्वमेति — त्रि. म. १५
सर्वाक्षरमयःकालःसदसद्व्यक्तिवर्जितः — तुरीयो. ३
सर्वाक्षरमयः कालः सर्वागममयः
  शिवः। सवश्रुत्युत्तमो मृग्यः
  सकलोपनिषन्मयः — ना. प. ८।५
सर्वाजीवे सर्वसंस्थे बृहन्ते (वहते
  अस्मिन्) तस्मिन्हंसो भ्राम्यते
  ब्रह्मचक्रे[श्वेता.१।६+ना.प.९।५+ — भवसं. २।४
सर्वाज्ञानमसन्मयम् — ते. बिं. ३।५८
सर्वाञ्छब्दान्विजानाति, स
  सम्प्रसाद इत्याचक्षते — सुबालो. ४।३
सर्वाणि च भूतानि प्रज्ञायते(मा.पा.) — बृह. ४।१।२
सर्वाणि च भूतानि वाचैव सम्राट्
  प्रज्ञायन्ते; वाग्वै सम्राट् परमं ब्रह्म — बृह. ४।१।२
सर्वाणि च भूतानि...यदेनज्जरा-
  मवाप्नोति (मा. पा.) — छां. उ. ८।१।४
सर्वाणि च भूतानि च सर्वे च
  कामास्तस्मात्तस्योदयं प्रति
  प्रत्यायनं प्रति घोषा उल्लवः — छांदो. ३।१९।३
सर्वाणि च भूतानि सर्वे च कामा
  यदेनज्जरामाप्नोति — छांदो. ८।१।४
सर्वाणि चेन्द्रियाणि सहभूतैर्न
  कारणं कारणानां ध्याता कारणं — अ. शिखो. ३
सर्वाणि छन्दांसि, आपः स्थानं — २ प्रणवो. २१

सर्वाणि छन्दांसि नारायणादेव समुत्पद्यन्ते	नारा. १
सर्वाणि जगन्ति नारायणमयानि प्रविभान्ति	त्रि. म. ना. ५।५
सर्वाणि तत्र भूतानि वसन्ति परमात्मनि	भवसं. २।५३
सर्वाणि धर्मशास्त्राणि विस्तारयिष्णुः	सङ्कर्षणो. २
सर्वाणि बृंहयतीति ब्रह्मा	ब. शिखो. २
(एवं) सर्वाणि भूतानि मणौ सूत्र इवात्मनि। स्थिरबुद्धिरसम्मूढो ब्रह्मविद्ब्रह्मणि स्थितः	ध्या. बिं. ६
सर्वाणि भूतानि रमन्ते सर्वाणि ह वा अस्मिन्भूतानि विशन्ति	बृह. ५।१२।१
सर्वाणि भूतानीत्येव पञ्चमं मुखं तेन मुखेन सर्वाणि भूतान्यत्सि	कौ. त. २।९
सर्वाणि भूतान्यभ्यात्तं यदनेकमेकं नानावर्णं नानारूपं नानाशब्दं नानागन्धं नानारसं नानास्पर्शमिति	शौनको. १।५
सर्वाणिभूतान्यस्यैवैतानि सर्वाणि निश्श्वसितानि	बृह. ४।५।११
(एवं) सर्वाणि भूतान्यापिपीलिकाभ्यो बृहत्या विष्टब्धानीत्येव विद्यात्	१ ऐत. १।६।३
सर्वाणि भौतिकानि कारणे भूतपञ्चके संयोज्य भूमिं जले.. क्रमेण विलीयते	पैङ्गलो. ३।३
सर्वाणि रूपाणि विचित्य धीरः नामानि कृत्वाऽभिवदन् यदास्ते [+चित्त्यु. १२।७+	महावा. ३ पारमा. ७।९
सर्वाणि ह वा इमानि भूतानि प्रणव एव प्रतितिष्ठन्ति	शौनको. ४।५
सर्वाणि ह वा इमानि भूतानि प्राणमेवाभिसंविशन्ति	छांदो. १।११।५
सर्वाणि हास्मै भूतानि श्रैष्ठ्याय सन्नमन्ते तच्छ्रीत्युपासीत	कौ. त. २।६
सर्वाणि ह वा इमानि भूतान्यन्नमेव प्रतिहरमाणानि जीवन्ति	छांदो. १।११।९
सर्वाणि ह वा इमानि भूतान्यहरहः प्रपतन्त्यन्नमभिजिघृक्षमाणानि	मैत्रा. ६।१२
सर्वाणि ह वा इमानि भूतान्याकाशादेव जायन्ते [त्रि. ता. ९।२२+	नृ. पू. ३।५ ग. पू. २।९
सर्वाणि ह वा इमानि भूतान्याकाशादेव समुत्पद्यन्ते	छांदो. १।९।१
सर्वाणि ह वा इमानि भूतान्यादित्यमुच्चैः सन्तं गायन्ति	छांदो. १।११।७
सर्वाणि ह वा इमानि भूतान्येतदक्षरमन्वायत्तानि	शौनको. १।५
सर्वाणि हास्मै भूतानि श्रैष्ठ्याय सन्नमन्ते तच्छ्रीत्युपासीत तत्सामेत्युपासीत	कौ. त. २।६
सर्वाणि हास्मै भूतानि श्रैष्ठ्यायाभ्यर्च्यन्ते तद्यजुरित्युपासीत	कौ. त. २।६
सर्वाणीत्युपधारय	भ. गी. ७।६
सर्वाणीन्द्रियकर्माणि	भ. गी. ४।२७
सर्वाण्डेष्वनन्तलोकाश्चानन्तवैकुण्ठाः सन्तीति सर्वेषां खल्वभिमतम्	त्रि. म. ना. ८।२
सर्वाण्येनं भूतान्यभिरक्षन्ति	बृह. ४।१।२,३
सर्वाण्येनं वामान्यभिसंयन्ति	छांदो. ४।१५।२
सर्वाण्येवैतानि प्रज्ञानस्य नामधेयानि भवन्ति	२ ऐत. ६।२
सर्वातीतपदालम्बी परिपूर्णैकचिन्मयः। नोद्वेगी न च तुष्टात्मा संसारे नावसीदति	महो. ६।६३
सर्वातीतोऽस्म्यहं सदा	ते. बिं. ३।१२
सर्वात्मकत्वमात्माधारो भवति	आ. पू. १
सर्वात्मकत्वं दृश्यविलयो गन्धः	आ. पू. १
(तस्मात्) सर्वात्मकेनाकारेण सर्वात्मकमात्मानमन्विच्छेत्	नृसिंहो. ७।२
सर्वात्मकोऽहं सर्वोऽहं	कुण्डिको. २६
सर्वात्मवेदनं शुद्धं यदोदेति तवात्मकम्। भातिप्रसृतिदिक्कालबाह्यं चिद्रूपदेहकम्	महो. ४।४२
सर्वात्मा समरूपात्मा शुद्धात्मा त्वहंमुत्थितः। एकवर्जित एकात्मा सर्वात्मा स्वात्ममात्रकः	ते. बिं. ४।३४

सर्वा दिशश्चोर्ध्वमधश्च तिर्यक्
प्रकाशयन्ती भ्राजते गुह्यकाली गुह्यका. ६४
सर्वा दिशो बलिमस्मै हरन्ति छांदो. २।२१।४
सर्वाद्या सर्वविधा च वृंदावन-
विहारिणी राधिको. ७
सर्वाधारमनाधारमनिरीक्ष्यं भस्मजा. २।९
सर्वाधिव्याधिभेषजम् पं. ब्र. १२
सर्वाधिष्ठानरूपोऽस्मि सर्वदा
चिद्घनोऽस्म्यहम् ते. बिं. ३।१३
सर्वाधिष्ठानमद्वन्द्वं परं ब्रह्म
सनातनम् । सच्चिदानन्दरूपं
तदवाङ्मनसगोचरम् [रुद्रहृ.२६+ अ. पू. ४।२९
सर्वाधिष्ठानमद्वयपरब्रह्मविहार-
मण्डलं...चिद्रूपादित्यमण्डलं
द्वात्रिंशद्व्यूहभेदैरधिष्ठितम् त्रि.म.ना. ७।८
सर्वाननशिरोग्रीवः सर्वभूत-
गुहाशयः । सर्वव्यापी स भगवां-
स्तस्मात्सर्वगतः शिवः श्वेताश्व. ३।११
सर्वानपि वैष्णवान्धर्मान्विजृम्भयन्
सर्वानपि पाखण्डान्भिवखान सङ्कर्षणो. २
सर्वानिन्द्रियकृतान्पापान्नाशयतीति
तेन नाशी (वरणा) भवति
[जाबालो. २+ रामो. ३।१
सर्वानुग्रहार्थाय तेषां (रुद्राक्षाणां)
नामोच्चारमात्रेण दशगोप्रदानफलं
दर्शनस्पर्शनाभ्यां द्विगुणं फलम् रु. जा. १
सर्वानुग्राहकत्वेन तदस्म्यहं वासुदेवः ब्र. बिं. २३
सर्वानन्दमयः परः ते. बिं. ५।२
सर्वान्कामान् समश्नुते तैत्ति. २।५
[विद्वानिति च–] सर्वान्तरस्थ-
स्वसंविद्रूपविद्विद्वान् निरा. २५
सर्वान् पार्थ मनोगतान् भ. गी. २।५५
सर्वान्तर्यामिरूपोऽहं सर्वसाक्षित्व-
लक्षणः ते. बिं. ६।६६
सर्वान्तरः स्वयं ज्योतिः सर्वाधि-
पतिरस्म्यहम् ब्र. बि. १०६
सर्वान्पाप्मन औषत्समात्पुरुष
औषति बृह. १।४।१

सर्वान्प्राणानसद्विद्धि सर्वान्भोगा-
नसदित्यति ते. बिं. ३।५४
सर्वान् बन्धूनवस्थितान् भ. गी. १।२५
सर्वापदां पदं पापा भावा विभव-
भूमयः महो. ३।४
सर्वारम्भपरित्यागी[भ.गी.१२।१६+ १४।२५
सर्वारम्भा हि दोषेण भ. गी. १८।४८
सर्वार्थवासनोन्मुक्ता तृष्णा
मुक्तेति भण्यते महो. ६।५०
सर्वार्थान् विपरीतांश्च भ. गी. १८।३१
सर्वाश्चर्यमयं देवं भ. गी. ११।१२
सर्वांस्तथा भूतविशेषसंघान् भ. गी. ११।१५
सर्वाः प्रजा ब्राह्मणत्वं नरेन्द्र न
ब्राह्मणत्वात्परमस्ति किञ्चित् इतिहा. १४
सर्वाः प्रजा यत्रैकं भवन्ति चित्यु. ११।२
सर्वाभिलापविगतः सर्वचिन्ता-
समुत्थितः । सुप्रशान्तः
सकृज्ज्योतिः समाधिरचलोऽभयः अद्वैत. ३७
सर्वा भूतानि तिष्ठन्ति सर्वमायुरेति
वसीयान्भवति आर्षे. ६।२
सर्वावस्थाविनिर्मुक्तः सर्वचिन्ता-
विवर्जितः ना. बिं. ५१
सर्वावस्थासु साक्षी त्वेक एवावतिष्ठते ना. प. ६।७
सर्वा वृद्धा वायोः, सर्ववृद्धेन्द्रस्यो-
त्सेधपरोक्षवृद्धाऽग्नेः संहितो. १।८
सर्वाशासङ्क्षये चेतःक्षयो मोक्ष
इतीष्यते अ. पू. २।२३
सर्वाश्च मधुमतीः सर्वाश्च
व्याहृतीः (मा. पा.) बृह. ६।३।६
सर्वाश्रयं हि चिन्मात्रं देहं
चिन्मात्रमेव हि ते. बिं. २।३२
सर्वाश्रयोऽहमेव त्रि.म.ना. ८।६
सर्वासत्त्वविहीनोऽस्मि सात्त्विको-
ऽस्मि सदाऽस्म्यहम् मैत्रे. ३.६
(स यथा) सर्वासामपाᳬ समुद्र
एकायनं, एवᳬ सर्वेषाᳬ
रसानां जिह्वैकायनम् बृह. ४।५।१२

सर्वासामेव नाडीनामेष बन्धः प्रकीर्तितः — वराहो. ५।४२
(एवं) सर्वासां विद्यानाᳫ हृदयमेकायनमेवᳫ सर्वेषां कर्मणाᳫ हस्तावेकायनम् — बृह. ४।५।१२
सर्वास्वप्सु पञ्चविधᳫ सामोपासीत — छांदो. २।४।१
सर्वा ह्यस्मिन्देवताः शरीरेऽभिसमाहिताः — ग्रा. हो. ४।४
सर्वा ह्येवेमाः सर्वस्यै वाच उपनिषद इमां त्वेवाचक्षते — ३ ऐत. २।५।१
सर्वां च सावित्रीमन्वाह, सर्वाश्च मधुमतीरहमेवेदᳫ सर्वं भूयासं भूर्भुवः स्वः स्वाहा — बृह. ६।३।६
सर्वांश्च वेदान् सर्वांश्च यज्ञान् सर्वांश्च शब्दान्सर्वाश्च व्युष्टीः सर्वाणि च भूतानि स्थावरजङ्गमान्यनुभवेयमिति — २ प्रणवो. २
सर्वांश्च वेदान् साङ्गानपि ब्रह्म ब्राह्मणैश्च...सत्यं धर्मेण धर्मं तर्पयामि स्वेन तेजसा — अ. शिरः. १।१
सर्वे आनन्दरसा यस्मात्प्रकटिता भवन्ति — सामर. ३
सर्वे ऊष्माणोऽग्रस्ता अनिरस्ता विवृत्ता वक्तव्याः प्रजापतेरात्मानं परिददातीति — छांदो. २।२२।५
सर्वे कामा मनोगता व्यावर्तन्ते — प. हं. ९
सर्वे कुर्वन्ति कर्माणि विवशाः पूर्वकर्मभिः — शिवो. ७।१२५
सर्वेच्छाकलनाशान्तावात्मलाभोदयाभिधः। स पुनः सिद्धिवाञ्छायां कथमर्हत्यचित्ततः — वराहो. ३।३०
सर्वेच्छाजालसंशान्तावात्मलाभो भवेन्मुने। स कथं सिद्धिजालानि नूनं वाञ्छत्यचित्तकः — अ. पू. ४।८
सर्वेच्छाः सकलाः शङ्काः सर्वेहाः सर्वनिश्चयाः। धिया येन परित्यक्ताः स जीवन्मुक्त उच्यते — महो. २।५८
सर्वे जीवाश्च स्वस्वरूपं भजन्ते — त्रि.म.ना. ३।७
सर्वे जीवाः सुखैर्दुःखैर्मायाजालेन वेष्टिताः। तेषां मुक्तिः कथं देव कृपया वद शङ्कर — यो. शि. १।१
सर्वे जीवाः सुखैर्दुःखैर्मायाजालेन वेष्टिताः। तेषां मुक्तिकरं मार्गं मायाजालनिकृन्तनम् — १ यो. त. ४
सर्वे तु शक्तिजालेन रोगा नश्यन्ति निश्चयम् — योगकुं. १।१८
सर्वे देवा ऋषयो मुनयः सिद्धगन्धर्वयक्षरक्षःपिशाचाः सर्वे नारायणः — ना.पू.ता. ५।६
सर्वे देवाः शिवात्मकाः — रुद्रहृ. ४
सर्वे देवाः संविशन्तीति विष्णुः — अ. शिखो. ७
सर्वे धर्मा मृषा स्वप्ने कायस्यान्तर्निदर्शनात्। संवृतेऽस्मिन्प्रदेशे वै भूतानां दर्शनं कुतः — अ. शां. ३३
सर्वे धर्मास्तथा ज्ञानं नैतद्बुद्धेन भाषितम् — अ. शां. ९९
सर्वे धर्माः सदाभिन्ना अजं साम्यं विशारदम् — अ. शां. ९३
सर्वे नमस्यन्ति च सिद्धसङ्घाः — भ.गी. ११।३६
सर्वे नादसमुद्भवाः — यो. शि. ३।८
सर्वे निमेषा जज्ञिरे विद्युतः पुरुषादधि — महाना. १।८
सर्वेन्द्रियगुणाभासं सर्वेन्द्रियविवर्जितम्। सर्वस्य प्रभुमीशानं सर्वस्य शरणं बृहत् — श्वेताश्व. ३।१७
सर्वेन्द्रियगुणाभासं — भ. गी. १३।१४
सर्वेन्द्रियगुणाभासः सर्वेन्द्रियविवर्जितः — ब्र. वि. १०७
सर्वेन्द्रियगुणाभासा सर्वेन्द्रियविवर्जिता। सर्वेषां प्रभुरीशानी सर्वेषां शरणं सुहृत — गु. का. ४९
सर्वेन्द्रियविवर्जितम् — भ. गी. १३।१४
सर्वेन्द्रियविहीनोऽस्मि सर्वकर्मकृदप्यहम् — मैत्रे. ३।१५
सर्वे पाप्मानोऽतो निवर्तन्ते — छांदो. ८।४।१
सर्वेऽप्येते यज्ञविदः — भ. गी. ४।३०

सर्वे बन्धाः प्रविनश्यन्ति त्रि. म. ना. ८।७
सर्वे ब्रह्म वदिष्यन्ति सम्प्राप्ते तु कलौ युगे। वैदिके नानुतिष्ठन्ति शिश्नोदरपरायणाः भवसं. १।५७
सर्वेभ्यः पापकृत्तमः भ. गी. ४।३६
सर्वेभ्योऽन्तस्स्थानेभ्यो ध्येयेभ्यः प्रदीपवत्प्रकाशयतीति प्रकाशः अ. शिखो. २
सर्वेभ्यो लोकेभ्यः सर्वे प्राणिनोऽभवन् गायत्रीर. १
सर्वेभ्यो वेदेभ्यः सर्वे लोका अभवन् गायत्रीर. १
सर्वे मरुद्गणा अजीजनन् (देव्याः) बह्वृचो. १
सर्वे युद्धविशारदाः भ. गी. १।९
सर्वे वयमतः परम् भ. गी. २।१२
सर्वे वाक्यात्मका मन्त्रा वेदशास्त्राणि कृत्स्नशः यो. शि. ३।७
सर्वे वेदा यत्पदमामनन्ति तपा९सि सर्वाणि च यद्वदन्ति [कठो. २।१५+ गुह्यका. ३९
सर्वे वेदा यत्रैकं भवन्ति चित्त्यु. ११।१
सर्वे वेदाः प्रणवादिकास्तं प्रवणं तस्मान्नोऽङ्गं वेद स आयुर्यशःकीर्तिज्ञानैश्वर्यवान्भवति नृ. पू. १।३
सर्वे वेदाः सर्वं यज्ञा इत्यथ खल्विन्द्रमन्वायत्तं शौनको. १।५
(तदनु) सर्वेशमप्रमेयमजं शिवं परमाकाशं निरालम्बमद्वयं... परं ब्रह्म प्राप्नोति मं. ब्रा. ३।१
सर्वेशः सर्वसाक्षी च २ रुद्रो. ४४
सर्वेश्वरं सर्वदेवैरुपास्यम् ना. प. ९।१७
सर्वेषणाविनिर्मुक्तश्छित्त्वा तं तु न बध्यते क्षुरिको. २५
(तस्मात्) सर्वेषामधिकारिणामनधिकारिणांच भक्तियोग एव प्रशस्यते त्रि. म. ना. ८।४
(एवं) सर्वेषामध्वनां पादावेकायनमेव९ सर्वेषां वेदानां वागेकायनम् [बृह. २।४।११+ ४।५।१२
सर्वेषामपि पापानां प्रायश्चित्तं त्वमेव हि तुलस्यु. १३
सर्वेषामात्मानुसन्धानं विधिरित्येव ना. प. ७।११
(एवं) सर्वेषामानन्दानामुपस्थ एकायनम्९ सर्वेषां विसर्गाणां पायुरेकायनम् [बृह. २।४।११+ ४।५।१२
सर्वेषामिन्द्रियाणां गतिरुपरमते य आत्मन्येवावस्थीयते प. हं. ९
सर्वेषामेव गतीनामव्यक्तं हृदयम् सुबालो. १३।४
सर्वेषामेव गन्धानां पृथिवी हृदयं सुबालो. १३।४
सर्वेषामेव पापानां सङ्घाते समुपस्थिते। तारं द्वादशसाहस्रमभ्यसेच्छेदनं हि तत् १सं.सो.२।१०३
सर्वेषामेव भूतानां महासौभाग्यदायिनी। महालक्ष्मीर्महादेवी.. ना. पू. ता. २।२
सर्वेषामेव भूतानां विष्णुरात्मा.. रुद्रहृ. १३
सर्वेषामेव रूपाणां तेजो हृदयम् सुबालो. १३।४
सर्वेषामेव शब्दानामाकाशं हृदयम् सुबालो. १३।४
सर्वेषामेव रसानामापो हृदयम् सुबालो. १३।४
सर्वेषामेव शर्म भवान् २ प्रणवो. १९
सर्वेषामेव सत्त्वानां मृत्युर्हृदयम् सुबालो. १३।४
सर्वेषामेव स्पर्शानां वायुर्हृदयम् सुबालो. १३।४
सर्वेषामेव त्रीणि शरीराणि वर्तन्ते यो. चू. ७२
(एवं) सर्वेषां कर्मणां हस्तावेकायनम् [बृह. २।४।११+ ४।५।१२
सर्वेषां खलु भूतानामात्मा सत्ये प्रतिष्ठितः (मा. पा.) छां.ब. ६।१७
(एवं) सर्वेषां गन्धानां नासिके एकायनम् बृह. ४।५।१२
सर्वेषां च महीक्षिताम् भ. गी. १।२५
(तस्मात्) सर्वेषां जीवानामिष्टविषये...सुखबुद्धि... त्रि.म.ना. ५।३
सर्वेषां ज्योतिषां ज्योतिस्तमसः परमुच्यते त्रि.म.ना. ४।३
सर्वेषां दिव्यानां (विद्यानां) प्रेरयिता ईशानः पञ्चब्र. १
सर्वेषां देवानां सार्ष्टितां सालोक्यतां सायुज्यतां गच्छति कठश्रु. १३
सर्वेषां देवालयस्थं भस्म शिवाग्निजं शिवयोगिनाम् बृ. जा. ५।७

सर्वेषां दोषरत्नानां सुसमुद्रिकया- ऽनया । दुःखशृङ्खलया नित्य- मलमस्तु मम स्त्रिया [याज्ञव.१६+ महो. ३।४७
सर्वेषां पुरुषाणामन्तःपुरुषः स आत्मा स विज्ञेयः त्रि. ता. ५।१
सर्वेषां पूर्वोक्तब्रह्मयज्ञक्रमं मुक्ति- क्रममिति ब्रह्मपुत्रः प्रोवाच पा. ब्र. ५
सर्वेषां प्रणवो बीजं हंसः शक्तिः प्रकीर्तिता गुह्यका. ८।१
सर्वेषां प्राणिनां प्रारब्धसञ्चिता- गामिकर्मसाधर्म्यदर्शनात्कर्मा- भिप्रेरिताः सन्तो जनाः क्रियाः कुर्वन्ति व. सू. ७
(ॐ) सर्वेषां प्राणिबुद्बुदानां निरञ्जनाव्यक्तामृतनिधौ विलयविलासः स्थितिर्विजृम्भते स्वसंवे. १
सर्वेषां बीजानां हयग्रीवैकाक्षर- बीजमनुत्तमं मन्त्रराजात्मकंभवति हयग्री. ६
सर्वेषां ब्रह्मादीनां देवर्षीणां मनुष्याणां मूर्तिरेका परब्र. ६
सर्वेषां भूतानामन्तरपुरुषः स म आत्मेति विद्यात् ३ ऐत. २।४।८
सर्वेषां भूतानां मूर्धा भवति कौ. त. ४।२
सर्वेषां भूतानां मूर्धा राजा भवति बृह. २।१।२
सर्वेषां भूतानां मूर्धेति वा अहमेत- मुपास इति कौ. त. ४।२
(एवं) सर्वेषां रसानां जिह्वै- कायनम् [बृह. २।४।११+ ४।५।१२
(एवं) सर्वेषां रूपाणां चक्षु- रेकायनम् [बृह. २।४।११+ ४।५।१२
सर्वेषां वस्तूनां मुख्यवस्तु भवति ना.उ.ता. ३।१
सर्वेषां वा एतद्भूतानामाकाशः परायणम् [नृ.पू.३।६+त्रि.ता. ५।२२+ग.पू.२।९
(एवं) सर्वेषां विसर्गाणां पायु- रेकायनम् [बृह. २।४।११+ ४।५।१२
(एवं) सर्वेषां वेदानां वागेकायनं [बृ. उ. २।४।११+ ४।५।१२
(एवं) सर्वेषां शब्दानां श्रोत्र- मेकायनम् [बृह. २।४।११+ ४।५।१२

सर्वेषां शरीराणां समानगुणाभवन्ति सामर. १०१
(एवं) सर्वेषां सङ्कल्पानां मन एकायनम् [बृह. २।४।११+ ४।५।१२
सर्वेषां समवायेन सिद्धिः स्या- द्योगरक्षणा योगो. ३२
(एवं) सर्वेषां स्पर्शानां त्वगेकायनम् [बृह.२।४।११+ ४।५।१२
सर्वे स्पर्शा मृत्योरात्मानः छांदो. २।२२।३
सर्वे स्पर्शा लेशेनानभिनिहिता वक्तव्या मृत्योरात्मानं परिहराणीति छांदो. २।२२।५
सर्वेऽस्मै देवा बलिमावहन्ति तैत्ति. १।५।३
सर्वे स्वरा इन्द्रस्यात्मानः छांदो. २।२२।३
सर्वे स्वरा घोषवन्तो बलवन्तो वक्तव्या इन्द्रे बलं ददानीति छांदो. २।२२।५
सर्वे होतारो यत्रैकं भवन्ति चित्यु. ११।१
सर्वेषु कालेषु लाभालाभौ समौ कृत्वा...ध्रुवशीलोऽष्टौ मास्ये- काकी चरेत् (?) प. हं. प. ७
सर्वेषु तीर्थेषु स्नातो भवति ऊर्ध्वपुं. ६
सर्वेषु भूतेषु गणेशमेकं विज्ञाय तं मृत्युमुखात् प्रमुच्यते हेरम्बो. ८
सर्वेषु भूतेष्वेतमेव ब्रह्मेत्याचक्षते ३ ऐत. २।३।५
सर्वेषु वेदेष्वारण्यकमावर्तयेत् आरुणि. २
सर्वे सहैवावनिपालसङ्घैः भ. गी. ११।२६
सर्वैरेव (अक्षरैः) स इन्द्रोऽभवत् अव्यक्तो. ६
सर्वैरेव (अक्षरैः) स विष्णुरभवत् अव्यक्तो. ६
सर्वोत्कृष्टपरमद्युतिप्रद्योतमानं तत्त्वाकाशं भवति अद्वयता. ४
सर्वोत्कृष्टपरमाद्वितीयप्रद्योतमानं तत्त्वाकाशं भवति मं. ब्रा. २।३
सर्वोपनिषदभ्यासं दूरतस्त्यक्त्व सादरम् । तेजोबिन्दूपनिषद- मभ्यसेत्सर्वदा मुदा । सकृदभ्यास- मात्रेणब्रह्मैवभवतिस्वयम् [ते.बिं. ६।११०,११
सर्वोपकारी मोक्षी भवति दत्तात्रे. १६
सर्वोपनिषदां मध्ये सारमष्टोत्तरं शतम् । सकृच्छ्रवणमात्रेण सर्वाघौघनिकृन्तनम् मुक्तिको. १।४४

सर्वोपसंहारेण संहारप्रणवः	तुरीयो. १
सर्वोपाधिविनिर्मुक्तं स्वात्मानं भावयेत्सुधीः	कठरु. ४४
सर्वोपाधिविनिर्मुक्तं परं तत्त्वं तदुच्यते	अमन. १।११
सर्वो योगाग्निना देहो ह्यजडः शोकवर्जितः	यो. शि. १।२६
सर्वो वै रुद्रस्तस्मै रुद्राय नमो अस्तु	महाना.१०।११
सर्वोऽसि सर्वहीनोऽसि शान्ताशान्तविवर्जितः	ते. बिं. ५।६८
सर्वो ह्येष रुद्रस्तस्मै रुद्राय नमोऽस्तु [+महाना. १०।११	शिव. सं. ३१
सर्वौषधस्य मन्थं दधिमधुनोरुपमथ्य ज्येष्ठाय श्रेष्ठाय स्वाहेत्यग्नावाज्यस्य हुत्वा मन्थे सम्पातमवनयेत्	छांदो. ५।२।४
सलिल एको द्रष्टाऽद्वैतो भवति	बृह. ४।३।३२
सलिल एवेदं सलिलं वनं भूयस्तेनैव मार्गेण जाग्राय धावति	सुबालो. ४।४
सलिलकण इवाम्बुधौ महात्मा विगलितवासनमेकतां जगाम	महो. २।७७
सलिलमिति लौहित्यकारणं सत्त्वम्	भावनो. ७
सलिलात्फेनमभवत्	गायत्रीर. १
सलिलेधारयेद्विसंनाम्भसापरिभूयते	यो.शि. ५।५०
सलिले सैन्धवं यद्वत्साम्यं भवति योगतः। तथाऽऽत्ममनसोरैक्यं समाधि-(रिति कथ्यते) रभिधीयते [सौभाग्य. १८+	वराहो. २।७९
स लोकमागच्छत्यशोकमहिमं तस्मिन्वसति शाश्वतीः समाः	बृह. ५।१०।१
सवतात्सविता	मैत्रा. ६।७
सवस्तु सोपलम्भं च द्वयं लौकिकमिष्यते। अवस्तु सोपलम्भं च..	म. शां. ८७
स वा अयमात्माऽनन्तोऽजरोऽपारो न वारे बाह्यो नांतरः	आर्षे. ९।२
स वा अयमात्मा ब्रह्म	बृह. ४।४।५
स वा अयमात्मा सर्वेषां भूतानामधिपतिः	बृह. २।५।१५
स वा अयं पुरुषः सर्वासु पूर्षु पुरिशयः	बृह. २।५।१८
स वा अयं पुरुषो जायमानः शरीरमभिसम्पद्यमानः पाप्मभिः संसृज्यते	बृह. ४।३।८
स वा ऋषे तृतीयं शंस	१ ऐत. २।३।३
स वा ऋषे द्वितीयं शस	१ ऐत. २।३।२
स वा एवं प्रवरणीय आत्मकामेनेत्याहुर्ब्रह्मवादिनः	मैत्रा. ६।७
स वा एष आत्मा परः	नृसिंहो. ९।१
स वा एष आत्मा हृदि	छांदो. ८।३।३
स वा एष आत्मेत्यदो वशं नीत एव सितासितैः कर्मफलैरभिभूयमान इव प्रतिशरीरेषु चरति	मैत्रा. २।१०
स वा एष एकस्त्रिधाभूतोऽष्टधैकादशधा द्वादशधाऽपरिमितधा वोद्भूत उद्भूतत्वाद्भूतेषु चरति प्रतिष्ठा सर्वभूतानामधिपतिर्बभूवेत्यसावात्मान्तर्बहिश्चान्तर्बहिश्च	मैत्रा. ४।५
स वा एष एतस्मिन्बुद्धान्ते रत्वा चरित्वा दृष्ट्वैव पुण्यं च पापं च पुनः प्रतिन्यायं प्रतियोन्या द्रवति स्वप्नान्तायैव	बृह. ४।३।१७
स वा एष एतस्मिन्सम्प्रसादे रत्वा..	बृह. ४।३।१५
स वा एष एतस्मिन्स्वप्नान्ते रत्वा चरित्वा दृष्ट्वैव पुण्यं पापं.,	बृह. ४।३।३४
स वा एष एतस्मिन्स्वप्ने रत्वा...	बृह. ४।३।१६
स वा एष एतेन दैवेन चक्षुषा मनसैतान्कामान्पश्यन्रमते	छांदो. ८।१२।५
स वा एष एवं पश्यन्नेवं मन्वान एवं विजानन्नतिवादी भवति	छांदो. ७।१५।४
स वा एष एवं पश्यन्नेवं मन्वान एवं विजानन्नात्मरतिरात्मक्रीड आत्ममिथुन आत्मानन्दः स स्वराट् भवति	छांदो. ७।२५।२
स वा एष ओमित्येतदात्मा, स त्रेधाऽऽत्मानं व्यकुरुत	मैत्रा. ६।३
स वा एष दिव्यः शाकरः शिशुमारस्तस्य ह य एवं वेदाप पुनर्मृत्युं जयति	सद्वै. २१

स वा एष निरिन्द्रियो विमुक्तो-ऽस्माल्लोकात्प्रैति बृह. ६।४।१२
स वा एष पञ्चधाऽऽत्मानं प्रविभज्य निहितो गुहायां मनोमयः प्राणशरीरो बहुरूपः सत्यसङ्कल्प आत्मेति मैत्रा. २।६
स वा एष पुरुषविध एव तैत्ति. २।२
स वा एष पुरुषः पञ्चधा पञ्चात्मा महाना. १७।१४
स वा एष पुरुषोऽन्नरसमयः तैत्ति. २।१।१
स वा एष भूतानीन्द्रियाणि विराजं देवताः कोशांश्च सृष्ट्वा प्रविश्यामूढो मूढ इव व्यवहरन्नास्ते नृसिंहो. ९।५
स वा एष महानज आत्माऽजरोऽमरोऽमृतोऽभयो ब्रह्माभयं वै ब्रह्माभयं हि वै ब्रह्म भवति बृह. ४।४।२५
स वा एष महानज आत्माऽन्नादो वसुदानो विन्दते वसु बृह. ४।४।२४
स वा एष महानज आत्मा योऽयं विज्ञानमयः प्राणेषु य एषो-ऽन्तर्हृदय आकाशस्तस्मिञ्छेते बृह. ४।४।२२
स वा एष यज्ञः प्रादक्षिणोऽनन्तदक्षिणः समृद्धतरः सहवै. २१
स वा एष यज्ञः सद्यः प्रतायते सद्यः सन्तिष्ठते सहवै. १७
स वा एष वाचः परमो विकारः, यदेतन्महदुक्थम् १ ऐत. ३।६।३
स वा एष शुद्धः स्थिरोऽचलश्चालेपोऽव्यग्रो निःस्पृहः प्रेक्षकवदवस्थितः मैत्रा. २।११
स वा एष सूक्ष्मोऽग्राह्योऽदृश्यः पुरुषसंज्ञो बुद्धिपूर्वमिहैवावर्तते मैत्रा. २।५
स वा एषा देवता दूर्नाम दूरं ह्यस्या मृत्युर्दूरं ह वा अस्मान्मृत्युर्भवति बृह. १।३।९
स वा एषोऽभिभूतः प्राकृतैर्गुणैः मैत्रा. ३।२
स वा एषोऽस्मद्धृदन्तरे तिष्ठन्कृतार्थोऽमन्यत मैत्रा. २।९
स वाजपेयेनसोऽतिरात्रेणसोऽप्तोर्यामेण स सर्वैः क्रतुभिर्यजते ग. शो. ५।३
स वायुना ज्योतिषा भाति च तपति च, भाति च तपति च कीर्त्या यशसा ब्रह्मवर्चसेन छांदो. ३।१८।४
स वायुपूतो भवति, स आदित्यपूतो भवति। अरोगी भवति। श्रीमांश्च भवति मुद्गलो. ५।१
स वायुप्रतिष्ठा, आकाशात्मा स्वरेति स तद्भवति कौ. व्र. २।१४
स वायुमिवात्मानं कृत्वाऽभ्यन्तरं प्राविशत् मैत्रा. २।६
स वायुः स आकाशस्तदेतदोजश्च महश्चेत्युपासीत छांदो. ३।१३।५
स वासुदेवो न यतोऽन्यदस्ति गो. पू. ४।२
स वां मधु प्रवोचदृतायन्त्वाष्ट्रं यद्दस्रावपि कक्ष्यं वामिति बृह. २।५।१७
सविकल्पो निर्विकल्पः समाधिर्द्विविधो हृदि (कुर्यात्) सरस्व. ४९
सविकारमुदाहृतम् भ. गी. १३।७
सविकारस्तथा जीवो निर्विकारस्तथा शिवः। कोशास्तस्य विकारास्ते ह्यवस्थासु प्रवर्तकाः त्रि. ब्रा. २।१३
स विजायमानः स जनिष्यमाणः प्रत्यङ्मुखस्तिष्ठति विश्वतोमुखः महाना. २।१
[+तै.आ.१०।१।३+ सूर्यता. १।२
स विज्ञानो भवति स विज्ञातमेवान्ववक्रामति तं विद्याकर्मणी समन्वारभेते पूर्वप्रज्ञा च बृह. ४।४।२
सविता पश्चात्तात्सविता पुरस्तात्सवितोत्तरात्तात्सविताऽधरात्तात्। सविता नः सुवतु सर्वतातिं सविता नो रासतां दीर्घमायुः [सूर्यो.८+ ऋ.मं.१०।३६।१४
सविता प्रसविता दीप्तो दीपयन् दीप्यमानः नृ. पू. २।७
सविता प्राणिनः सूते प्रसूते शक्तिम् त्रि. ता. १।६
सविता वै देवस्ततो योऽस्य भर्गाख्यस्तं चिन्तयामि मैत्रा. ६।७

सविता श्रियः प्रसविता श्रियमेवाप्नोति । अथो प्रज्ञातयैव प्रतिपदा छन्दांसि प्रतिपद्यते — सद्वै. १५
सवितुरिति सविता, सावित्रमादित्यो वै — गायत्रीर. २
सवितुर्वा योग्यो जीवात्मपरमात्मसमुद्भवस्तं प्रकाशशक्तिरूपं जीवाक्षरं स्पष्टमापद्यते.. — त्रि. ता. १।१४
स वित्तेनैवा च पूर्यतेऽप च क्षीयते — बृह. १।५।१५
सवित्रा प्रसवेन जुषेत ब्रह्म पूर्व्यम् — श्वेताश्व. २।७
स विशृङ्ग एवाभवत् — शौनको. २।३
स विश्वकृद्विश्वविदात्मयोनिर्ज्ञः कालकालो गुणी सर्वविद्यः । प्रधानक्षेत्रज्ञपतिर्गुणेशः संसारमोक्षस्थितिबन्धहेतुः — श्वेता. ६।१६ [भवसं. २।४६
स विश्वकृत् स हि सर्वस्य कर्ता तस्य लोकाः स उ लोक एव — बृह. ४।४।१३
स विश्वरूपस्त्रिगुणस्त्रिवर्त्मा प्राणाधिपः सञ्चरति स्वकर्मभिः — श्वेताश्व. ५।७
सविषयं मनो बन्धाय, निर्विषयं मुक्तये भवति — मं. ब्रा. ५।१
स विष्णुःसशिवःसब्रह्मासेन्द्रःसेन्दुः स सूर्यः स वायुः सोऽग्निः स ब्रह्म — ग. शो. २।१
स वेत्ति वेद्यं न च तस्यास्ति वेत्ता तमाहुरग्र्यं पुरुषं महान्तम् — श्वेता. ३।१९ [+ना. प. ९।१४+ — भवसं. २।४९
स वेदैतत्परमं ब्रह्म धाम यत्र विश्वं निहितं भाति शुभ्रम् । उपासते पुरुषं ये ह्यकामास्ते शुक्रमेतदतिवर्तन्ति धीराः — मुण्ड. ३।२।१
(अथ) संवेश्यजायायै हृदयमभिमृशेत् — कौ. त. २।१०
स वृक्षकालाकृतिभिः परोऽन्यो यस्मात्प्रपञ्चः परिवर्ततेऽयम् । धर्मावहं पापनुदं भगेशं ज्ञात्वाऽऽत्मस्थममृतं विश्वधाम — श्वेता. ६।६
स वै खलु प्रस्तोता साम प्रस्तौति — बृह. १।३।२८
स वै गणेशः सर्वात्मा विज्ञेयः — गणेशो. ४।१०
स वै गौतम तीर्थेनेच्छसीति इत्युपैम्यहम् (मा. पा.) — बृह. ६।२।७
स वै त्रिविधः—सात्त्विको राजसस्तामसश्चेति । सात्त्विकी ज्ञानशक्तिः, राजसी क्रियाशक्तिः, तामसी द्रव्यशक्तिः — गणेशो. ४।३
स वै दैवः प्राणो यः सञ्चरंश्चासञ्चरंश्च न व्यथते न रिष्यति — बृह. १।५।२०
स वै नैव रेमे तस्मादेकाकी न रमते — बृह. १।४।३
स वै ब्रह्म परमात्मेत्युच्यते — हंसो. ४
स वै बलं बलिनामग्रगण्यः पुण्यः शरण्यः सकलस्य जन्तोः । तमेकदन्तं गजवक्त्रमीशं विज्ञाय दुःखान्तमुपैति सद्यः — हेरम्बो. ११
स वै ब्रह्मण आनन्दः — गान्धर्वो. ६
स वै वाचमेव प्रथमामत्यवहत् सा यदा मृत्युमत्यमुच्यत — बृह. १।३।१२
स वै वेदिता स्याद्याज्ञवल्क्य वेद वा [बृह. ३।९।१०,११, — १२–१७
स वैष्णवं धाम भित्वा परं ब्रह्म प्राप्नोति — त्रि. ता. १।१५
सव्यदक्षिणनाडीस्थो मध्ये चरति मारुतः । तिष्ठतः खेचरी मुद्रा तस्मिन्स्थाने न संशयः — शाण्डि.१।७।४०
सव्यहस्त आज्यस्थाली (शारीरयज्ञस्य) — प्रा. हो. ४।२
सव्याहृतिं सप्रणवां गायत्रीं शिरसा सह । त्रिः पठेदायतप्राणः प्राणायामः स उच्यते — अ. ना. ११
सव्ये तु शङ्खं बिभृयादिति ब्रह्मविदो विदुः — सुदर्श. ११
सव्ये दक्षिणगुल्फं तु पृष्ठपार्श्वे नियोजयेत् । दक्षिणेऽपि तथा सव्यं गोमुखं गोमुखं (गोमुखं) यथा [त्रि. ब्रा. २।३६+ — शाण्डि. १।३।२
सव्ये दक्षिणगुल्फं तु पृष्ठपार्श्वे नियोजयेत् । दक्षिणेऽपि तथा सव्यं गोमुखं तत्प्रचक्षते — जा. द. ३।४

सव्ये दले तिष्ठति पद्मयोनिः स्वरान्वितो दक्षिणपत्रगो हरिः । श्रिया समेतः शिवयाऽनुषक्तो मध्ये दलेऽहं निवसामि नित्यम् — १ बिल्वो. ३

सव्योरुदक्षिणे गुल्फे दक्षिणं दक्षिणेतरे । निदिध्याद्दृजुकायस्तु चक्रासनमिदं मतम् — वराहो. ५।१७

स शब्दस्तुमुलोऽभवत् — भ. गी. १।१३

सशरीरं समारोप्य तन्मयत्वं तथोमिति । त्रिशरीरं तमात्मानं परं ब्रह्म विनिश्चिनु — ना. प. ८।८

स शान्तिमधिगच्छति — भ. गी. २।७१

स शान्तिमाप्नोति न कामकामी — भ. गी. २।७०

सशिखं वपनं कृत्वा बहिस्सूत्रं त्यजेद्बुधः । यदक्षरं परं ब्रह्म तत्सूत्रमिति धारयेत् — ब्रह्मो. ६ [+ना. प. ३।७८+ — परब्र. ७

सशिखान् केशान् निकृत्य विसृज्य यज्ञोपवीती निष्क्रम्य पुत्रं दृष्ट्वा त्वं ब्रह्मा त्वं यज्ञस्त्वं सर्वमित्यनुमन्त्रयेत् — कठश्रु. ४

सशिखान् केशान्निष्कृष्य विसृज्य यज्ञोपवीतं भूः स्वाहेत्यप्सु जुहुयात् — कठरु. ३

स शिखान्केशान्विसृज्य यज्ञोपवीतं छित्त्वा पुत्रं दृष्ट्वा त्वं यज्ञस्त्वं सर्वमित्यनुमन्त्रयेत् — १ सं. सो. १।२

स शिवः सच्चिदानन्दः सोऽन्वेष्टव्यो मुमुक्षुभिः — पै. ब्र. ३५

स शिवः स शिवः स शिवो गणेशः — गणेशो. २।४

स शीतोष्ण-सुखदुःख-मानावमानवर्जितः — प. हं. प. ११

स शुकः स्वकया बुद्ध्या न वाक्यं बहु मन्यते — महो. २।१७

स शुद्धः स शुद्धः स शुद्धो गणेशः — गणेशो. २।४

स शुष्यति स उद्वर्तते तस्मादनृतं न वदेत् — १ ऐत. ३।६।५

स शौद्रं वर्णमसृजत — बृह. १।४।१३

स षकारं भ्रवाणीइँ अषकाराइँ इति, स षकारमेव ब्रूयात् — ३ ऐत. २।६।२

स षट्पदो भवति, साम एव षट्पदः — ग. पू. १।११

स षडूर्मिवर्जितः । षड्भावविकारशून्यः — प. हं. प. ११

स षोडशिना यजते, स वाजपेयेन यजते, सोऽतिरात्रेण यजते, सोऽप्तोर्यामेण यजते, सोऽश्वमेधेन यजते, स सर्वैः क्रतुभिर्यजते — नृ. पू. ५।१४

स सकलभोगान् भुङ्क्ते देहं त्यक्त्वा शिवसायुज्यमेति — का. रुद्रो. ५

स सच्चिदानन्दाद्वयचिद्घनः सम्पूर्णानन्दैकबोधो ब्रह्मैवाहमस्मीत्यनवरतं ब्रह्मप्रणवानुसन्धानेन यः कृतकृत्यो भवति स हि परमहंसपरिव्राट् — प. हं. प. ११

स सततं सकलरुद्रमन्त्रजापी भवति, स सकलभोगान्भुङ्क्ते, देहं त्यक्त्वा शिवसायुज्यमेति, न स पुनरावर्तते — का. रुद्रो. ५

स सत्याभिसन्धः सत्येनात्मानमन्तर्धाय परशुं तप्तं प्रतिगृह्णाति, स न दह्यतेऽथ मुच्यते — छांदो. ६।१६।२

स सन्यासी च योगी च — भ. गी. ६।१

स सन्यासी शिव एव सर्वदेवमयो भवति — तारोप. ४

स समानः सन्नुभौ लोकावनुसञ्चरति — बृह. ४।३।७

स समुद्र एव भवति (मा. पा.) — छां. व. ६।१०।१

स समृद्धकायः सन् सृष्टिकर्म न जज्ञिवान् — मुद्गलो. २।४

स सम्यग्ज्ञानं च लब्ध्वा विष्णुसायुज्यमवाप्नोति — वासुदे. १७

स सर्वकर्मकृत् स ब्राह्मणः — प. हं. प. ११

स सर्वकारणमूलं विराट्स्वरूपोभवति — त्रि. म. ना. २।६

स सर्वज्ञः सर्वमेवाविवेश — प्रश्नो. ४।११

स सर्वज्ञः सर्ववित् यस्य ज्ञानमयं तपः । तस्यैषाऽऽहुतिर्दिव्याऽऽस्ततत्वाय कल्पतामिति — २ सन्यासो. १

स सर्वभयनिर्मुक्तः साक्षाच्छिवमयो भवेत् वज्रपं. ६
स सर्वलोकस्य शुभाशुभस्य तं वै ज्ञात्वा मृत्युमत्येति जन्तुः हेरम्बो. ८
स सर्वविद्भजति मां भ. गी. १५।१९
स सर्ववेत्ता भुवनस्य गोप्ता ताभिः प्रजानां निहिता जनानाम्। प्रोता त्वमोता विचितिः क्रमाणां प्रजापतिश्छन्दमयो विगर्भः एका. ९
स सर्ववेदव्रतचर्यासु चरितो भवति पैङ्गलो. ४।२४
स सर्वशः सर्वं भवति (मा. पा.) प्रश्नो. ४।१०
स सर्वसम्पत्तिभूतं प्रथमं...महाविद्येश्वरीविद्यां..त्रिपुरेश्वरीं.. त्रि. ता. २।२
स सर्वं चानिकेतः स्थिरमतिरेवं स भिक्षुः सौवर्णादीनां नैव परिग्रहेत् प. हं. ९
स सर्वं लोकाञ्जित्वा ब्रह्म परं प्राप्नोति अव्यक्तो. ५
स सर्वान्वेदानधीतो भवति का. रुद्रो. ५
स सर्वा वाचो विजृम्भयति त्रि. ता. १।१५
स सर्वांश्च लोकानाप्नोति सर्वांश्च कामान्यस्तमात्मानमनुविद्य विजानाति छांदो.८।७।१,३
[८।१२।६+पैङ्गलो. ४।२४+ महो. ६।८
स संसारं तरति, सोऽमृतत्वं च गच्छति, महतीं श्रियमश्नुते नृ. पू. ३।२
स संस्तुतो दैवतदेवसूनुः सुतं भृगोर्वाक्यमुवाच तुष्टः। अवेहि मां भार्गव वक्रतुण्डमनाथनाथं त्रिगुणात्मकं शिवम् ग. पू. ता. १।९
स साक्षी भवति, स एव भवति, स सर्वो भवति गणेशो. ५।८
ससागरां सपर्वतां सप्तद्वीपां वसुन्धरां तत्साम्नः प्रथमं पादं जानीयात् नृ. पू. १।२
ससागरां सप्तद्वीपां सपर्वतां वसुन्धरां तत्साम्नः प्रथमं पादं जानीयात् रायस्पोषस्य दातेति ग. पू. १।१२
स साम भवति, ऋग्वै गायत्री, यजुरुष्णिक्, अनुष्टुप् साम ग. पू. १।११

स सामभिः सामवेदो रुद्रा आदित्या जगत्याहवनीयः सा साम्नस्तृतीयो पादो भवति नृ. पू. २।१
स सामभिः सामवेदो रुद्रादित्या जगत्याहवनीयः सा तृतीयः पादो भवति नृसिंहो. ३।२
स सिद्धिसाधनैर्योगैस्तानि साधयति क्रमात् अ. पू. ४।५
स सारः सर्वसाराणां तस्मात्सारो न विद्यते अ. पू. ४।७०
स सार्वभौमवव्यवहाराच्छ्रान्तोऽन्तर्भवनं प्रवेष्टुं मार्गमाश्रित्य तिष्ठति पैङ्गलो. २।७
स सूर्यः स चन्द्रः सुरास्ते ते असुराः (परमात्मैव) निरा. १०
स सूर्यः स वायुः सोऽग्निः स ब्रह्म गणेशो. २।१
स सूर्यो भगवान्सहस्रांशुः, तं सूर्यं भगवन्तं सर्वस्वरूपिणं निगमा बहु वर्णयन्ति सूर्यता. १।२
स सोमलोके विभूतिमनुभूय पुनरावर्तते प्रश्नो. ५।४
स सोमः कस्मिन्प्रतिष्ठित इति। दीक्षायामिति बृह. ३।९।२३
स स्त्रियं ससृजे, तां सृष्ट्वाऽध उपास्ते बृह. ६।४।२
स स्त्रियं ससृजे तां सृष्ट्वाऽथ उपास्ते...(मा. पा.) बृह. ६।४।२
सस्यमिव मर्त्यः पच्यते सस्यमिवाजायते पुनः कठो. १।६
स स्वराड्भवति, तस्य सर्वेषु लोकेषु कामचारो भवति छांदो. ७।२५।२
स स्वर्ग्यो भवति ब्रह्मचारी वेदमधीत्य वेदोक्ताचरितब्रह्मचर्यो दारानाहृत्य पुत्रानुत्पाद्य ताननुपाधिभिर्वितत्येष्ट्वा च शक्तितो यज्ञैः कठरु. ५
स स्वर्लोकं स महर्लोकं स जनोलोकं, स तपोलोकं, स सत्य-

लोकꣳ स सप्तलोकꣳ स सर्वलोकꣳ सर्वलोकं जयति	ग. शो. ५।२
स स्वव्यतिरेकेण नान्यद्रष्टा	प. हं. प. ११
स स्वाधीनमायः सर्वज्ञः सृष्टिस्थितिलयानामादिकर्ता जगदङ्कुररूपो भवति	पैङ्गलो. १।२
स ह अविदूर एव शवशयितमात्रेयमच्छावदमुपदर्शयन्नुवाच	छाग. २।१
स य एषोऽणिमैतदात्म्यमिदं सर्वम्	छांदो. ६।१२।३
स ह कामप्रश्नमेव वव्रे, तꣳ हास्मै ददौ	बृह. ४।३।१
स ह कृच्छ्री बभूव तꣳ ह चिरं वसेत्याज्ञापयाञ्चकार	छांदो. ५।३।७
स ह क्षत्ताऽविदमिति प्रत्येयाय	छांदो. ४।१।८
स ह क्षत्ताऽन्विष्य नाविदमिति प्रत्येयाय	छांदो. ४।१।७
स ह गवाꣳ सहस्रमवरुरोध दश दश पादा एकैकस्याः शृङ्गयोराबद्धा बभूवुः	बृह. ३।१।१
स ह क्षत्तान्विष्याविदमिति प्रत्येयाय (मा. पा.)	छां. उ. ४।१।८
स ह गायत्रीमेव प्रतिसन्दिदेश	शौनको. १।२
सहजं कर्म कौन्तेय	भ. गी. १८।४८
(एवं) सहजानन्दे यदा मनो लीयते तदा शान्तो भवी भवति	मं. ब्रा. २।३
सहजेनामनस्केन मनश्शल्यं वियोजयेत्	अमन. २।८१
स ह तेनैव वज्रेणासुरान् पराभावयन्	शौनको. ४।४
स ह त्रिष्टुभमेव प्रतिसन्ददत्	शौनको. ३।२
स ह द्वादशवर्ष उपेत्य चतुर्विꣳशतिवर्षः सर्वान्वेदानधीत्य महामना अनूचानमानी स्तब्ध एयाय	छांदो. ६।१।२
स ह नाववतु सह नौ भुनक्तु सह वीर्यं करवावहै	शांतिपाठः
स ह नौ यशः । सह नौ ब्रह्म वर्चसम्	तैत्ति. शा. पा.
स ह पञ्चदशाहानि नाशाथ हैनमुपससाद	छांदो. ६।७।२
स ह पुत्रं श्वेतकेतुं प्रजि-(गाय-) घाय याजयेति	कौ. त. १।१
स ह प्रजापतिरीक्षांचक्रे, हन्तास्मै प्रतिष्ठां कल्पयानीति	बृह. ६।४।२
स ह प्रणव उवाच—यदहं सर्वभवानि	शौनको. २।२
स ह प्रणवपर्यन्तदीर्घनिःस्वनतन्तुना । जहाविन्द्रियतन्मात्रजालं खग इवानिलः	अ. पू. ३।१४
स ह प्रणवमेवोवाच—पुरोगायमेवारभस्वेति	शौनको. ३।२
स ह प्रवाहणो जैवलिरुवाच भगवन्तावग्रेवदतां ब्राह्मणयोर्वदतोर्वाचꣳ श्रोष्यामीति	छांदो. १।८।२
स ह प्रातः सञ्जिहान उवाच—न मे स्तेनो जनपदे न कदर्यो न मद्यपः । नानाहिताग्निर्नाविद्वान्न स्वैरी, स्वैरिणी कुतः	छांदो. ५।११।५
स ह प्रातः सञ्जिहान उवाच-यद्बताऽन्नस्यलभेमहि धनमात्राꣳ राजासौ यक्ष्यते सर्वैरार्त्विज्यैर्वृणीतेति	छांदो. १।१०।६
स ह प्रातः सभाग उदेयाय तꣳ होवाच मानुषस्य भगवन्गौतम वित्तस्य वरं वृणीथा इति	छांदो. ५।३।६
सहमाना नाम दक्षिणा, राज्ञी नाम प्रतीची, सुभूता नामोदीची, तासां वायुर्वत्सः, स य एवमेवं वायुं दिशां वत्सं वेद न पुत्ररोदꣳ रोदिति	छांदो. ३।१५।२
सहयज्ञाः प्रजाः सृष्ट्वा	भ. गी. ३।१०
स ह रक्षांसि यद्देवाः सप्तदश	सहवै. २५
स हरिर्वसुवित्तमः	चित्सु. ११।७
स ह वा एतस्य स्वधा न यजुषा न साम्नामर्थोऽस्ति	सूर्यता. ३।१
स ह वै देवानां चासुराणां च यज्ञौ प्रततावास्ताम्	सहवै. १

स ह व्याधिनाऽनशितुं दध्रे, तमाचार्यजायोवाच-ब्रह्मचारिन्नशान, किं नु नाश्नासीति छांदो. ४।१०।३
स ह शान्तहृदय एव विरोचनोऽसुराञ्जगाम तेभ्यो हैतामुपनिषदं प्रोवाचात्मैवेह मह्य्य आत्मा परिचर्यः... छांदो. ८।८।४
स ह श्वोभूते गा अभिप्रस्थापयाञ्चकार, ता यत्राभिसायं अभूवुस्तत्राग्निमुपसमाधाय गा उपरुध्य समिधमाधाय पश्चादग्नेः प्राङुपोपविवेश [छांदो.४।६।१ +७।१+८।१
स ह षोडशं वर्षशतमजीवत् , प्र ह षोडशं वर्षशतं जीवति यएवंवेद छांदो. ३।१६।७
स ह षोडशं वर्षशतं जीवति(मा.पा.) छां.उ.३।१६।७
स ह सञ्जिहान एव क्षत्तारमुवाचाङ्गारे ह सयुग्वानमिव रैक्वमात्थेति यो नु कथ५ सयुग्वा रैक्व इति छांदो. ४।१।५
स ह समित्पाणिश्चित्रं गार्ग्यायणिं प्रतिचक्राम उपायानीति कौ. त. १।१
स ह सम्पादयाञ्चकार प्रक्ष्यन्ति मामिमे महाशाला महाश्रोत्रियाः छांदो. ५।११।३
स ह सम्पायास्त्वमाशिषमाशिभूताभूतमाशिषमाशिराशीराशिरनुभूमिः स्वाहा पारमा. ४।५
स ह सर्वत आवसथान्मापयाञ्चक्रे छांदो. ४।१।१
स ह सर्वमेवात्मानमुपसंहृत्य शृङ्ग एवागूहयत् शौनको. ३।४
स ह सहस्रं समा ब्रह्मचर्यमध्युवास अव्यक्तो. २
सहसैवाभ्यहन्यन्त भ. गी. १।१३
स ह स्मयमान उवाच सम्पश्यध्वा एव मा प्रमदत छाग. २।४
स ह स्मान्यानन्तेवासिनःसमावर्तयंस्त५ ह स्मैव न समावर्तयति छांदो. ४।१०।१
स ह स्माह पाणिना मा मातृदः बृह. ५।१२।१
स ह स्मैभ्यः कामानागायति छांदो. १।५।१३
सहस्रकमले शक्तिः शिवेन सह मोदते । सैवावस्था परा ज्ञेया.. योगकु. १।८६
सहस्रकलावयवकल्याणं दृष्टमात्रेण मोक्षदं वेषमाददे मुद्गलो. २।२
सहस्रकृत्वः प्रयुक्ताग्निष्टोमाप्तोर्यामादीनां फलमवाप्नोति सन्ध्यो. २
सहस्रदलसंख्यातं ब्रह्मरन्ध्रे महापथिम् । आधारं प्रथमं चक्रं स्वाधिष्ठानं द्वितीयकम् यो. चू. ६
सहस्रधा नैकधा चाप्तमत्र । मया ततमितीदमश्नुते तदन्यथा सद्यदि मे असद्विदुः बा. मं. १९
सहस्रपरमा देवी शतमूला शताङ्कुरा । सर्वं हरतु मे पापं दूर्वा दुःस्वप्ननाशिनी महाना. ४।१
[वनदु. १५९
सहस्रपादेकमूर्ध्ना व्याप्तं स एवेदमावरीवर्तिभूतम् अ.शिर. ३।१४
सहस्रबाहो भव विश्वमूर्ते भ. गी. ११।४६
सहस्रमेकं व्ययुतं षट्शतं चैव सर्वदा । उच्चरन्पठितो हंसः सोऽहमित्यभिधीयते ब्र. वि. ७९
सहस्रयुगपर्यन्तं भ. गी. ८।१७
सहस्ररश्मिः शतधा वर्तमानः प्राणः प्रजानामुदयत्येष सूर्यः प्रश्नो. १।८
[+मैत्रा. ६।८+ अक्ष्यु. २
सहस्रशीर्षं देवं विश्वाक्षं विश्वशम्भुवम् । विश्वं नारायणं देवमक्षरं परमं पदम् महाना. ९।१
सहस्रशीर्षं देवं सहस्राक्षं विश्वशम्भु (सम्भ) वम् [महो.१।५+ चतुर्वे. २
सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् [ऋक्.मं.१०।९०।१+ श्वेता. ३।१४
[+चित्यु.१२।१सुबालो. १।२+ पु. सू. १+
सहस्रसङ्ख्यया जाताः शाखाः साम्नः परन्तप मुक्तिको. १।१३
सहस्रं दद्मस्त एतस्यां वाचि जनको जनक इति वा उ जना धावन्तीति कौ. त. ४।१

सहस्रं वा यस्य वै वितानमादधानः सहस्रं वा आशिषः सहस्रं यस्य वै सासिकाः सहस्रं सहस्रायस्त्राहा पारमा. ४।७
सहस्रं समा आद्यन्तनिहितोङ्कारेण पदान्यगायत् अव्यक्तो. ३
सहस्राङ्कुरशाखात्म-फल-पल्लव-शालिनः। अस्य संसारवृक्षस्य मनोमूलमिदं स्थितम् मुक्तिको. २।३७
सहस्रारे जलज्योतिरन्तर्लक्ष्यम् मं. ब्रा. १।५
सहस्रार्णमतीवात्र मन्त्र एष प्रदर्शितः। एवमेतां समारूढो हंसयोगविचक्षणः॥ न भिद्यते कर्मचारैः पापकोटिशतैरपि ना. विं. ५
सहस्व मन्यो अभिमातिमस्मे रुजन्मृणन्प्रमृणन्प्रेहि शत्रून् वनदु. १०९ [ऋ. मं. १०।८४।३+ अथर्व. ४।३१।३
स ह स्वेनैव रूपेणादित्यानगच्छत् शौनको. ४।४
स ह खेतावस्मिञ्छरीरे वसतः कौ. त. ३।४
स हान्तत एवात्मानमुपसंहृत्य तावदेवाग्राहयत शौनको. २।३
स हान्नमित्यभिव्याहृत्य बृहतीसहस्रं शशंस १ ऐत. २।३।१
स हापश्यत्-सर्व एव न्यूङ्खयन्तो मामभिचक्षीरन्निति शौनको. ३।३
स हापश्यदादित्यो वा उद्गीथोऽसौ खल्वादित्यो ब्रह्म शौनको. ४।३
स हापश्यन्नेतद्‌ऋजसैवसर्वारूपाण्येव-मभिचक्षीरन् शौनको. २।२
स हाग्राप्यैव देवानेतद्भयं ददर्श छांदो. ८।१०।१
स हायमीक्षाञ्चक्रे यन्मदन्यन्नास्ति कस्मान्नु बिभेमीति बृह. १।४।२
स हायस्तः पितुरर्धमेयाय छांदो. ५।३।४
स हाविपरिहृतो मेने न मेऽस्य पुत्रेण समगादिति ३ ऐत. १।१।१
सहास्मदीयैरपि योधमुख्यैः भ. गी. ११।२६
स हाहं यशसां यशः छांदो. ८।१४।१
स हाशाथ हैनमुपससाद तꣳह यत्किञ्च पप्रच्छ सर्वꣳह प्रतिपेदे छांदो. ६।७।४

स हि खादित्वाऽतिशेषाञ्जायाया आजहार छांदो. १।१०।५
स हि ज्येष्ठः श्रेष्ठो राजाऽधिपतिः छांदो. ५।२।६
स हि प्रज्ञानेन सम्पन्नतमो विज्ञातं वदति १ ऐत. ३।२।३
स हि सर्वकाममयः पुरुषोऽध्यवसायसङ्कल्पाभिमानलिङ्गो बद्धोऽतस्तद्विपरीतो मुक्तः मैत्रा. ६।३०
स हि स्वप्नो भूत्वेमं लोकमतिक्रामति मृत्यो रूपाणि बृह. ४।३।७
स हिंकारो मघो जायते छांदो. २।१९।१
स हीदमन्नं धियाधिया जनयते बृह. १।५।२
स हीदमन्नं पुनः पुनर्जनयते बृह. १।५।२
स हेभ्यं कुल्माषान् खादन्तं बिभिक्षे छांदो. १।१०।२
सहेलं सलीलं वा स्मरणाद्वरदानेषु चतुरा गुह्यषोढा. २
सहेश्वरो यशस्वी कल्याणकीर्तिर्भवितोरीश्वरो ह तु पुरुषायुषः प्रैतोरिति ह स्माह १ ऐत. ३।५।२
स हैतयैव निविदा प्रतिपेदे बृह. ३।९।१
स हैतावानास यथा स्त्रीपुमाꣳसौ सम्परिष्वक्तौ स इममेवात्मानं द्वेधा पातयत्ततः पतिश्च पत्नी चाभवताम् बृह. १।४।३
स हैतैः सर्वैरस्माच्छरीरादुत्क्रामति कौ. त. २।१४
स हैनं पप्रच्छ त्वं नु खलु नो याज्ञवल्क्य ब्रह्मिष्ठोऽसी३ति बृह. ३।१।२
स हैव सन्तं न विजानन्ति देवाः इन्द्रस्यात्मानꣳ शतधा चरन्तम् चित्यु. ११।५
स हैवालं भार्येभ्यो भवति बृह. १।३।१८
स होता स मुक्तिः साऽतिमुक्तिः बृह. ३।१।३
स होवाच-आर्तमिवेदं ते विज्ञानमपिस्विदेनद्रोद्रस्योरेव पर्यायेणोपवन्वीमहि आर्षे. ४।२
स होवाचकिंमेप्रतीवाहोभविष्यतीति २ प्रणवो. ८
स होवाच किं मेऽन्नं भविष्यतीति छांदो. ५।२।१
स होवाचकिंमे वासो भविष्यतीति छांदो. ५।२।२

स होवाच–कुरुक्षेत्र एवोपसमेत्य ये बालिशास्तानुपाध्वै ते व इदं प्रवक्ष्यन्तीति छाग. ३।१
स होवाच–कैषा त्वं ब्रह्मवाग्यदसि शंसात्मानमिति अव्यक्तो. २
स होवाच–गार्गि माऽतिप्राक्षी-र्मा ते मूर्धा व्यपप्तत् बृह. ३।६।१
स होवाच–गार्ग्य उप त्वा यानीति बृह. २।१।१४
स होवाच–गार्ग्योयएवासावादित्ये पुरुष एतमेवाहं ब्रह्मोपास इति बृ. उ. २।१।२
स होवाच–जनको वैदेहोऽभयं त्वागच्छताद्याज्ञवल्क्य यो नो भगवन्नभयं वेदयसे बृह. ४।२।४
स होवाच–जपध्वमानुष्टुभं मंत्रराजं षट्पदं सषडक्षरम् ग. पू. १।१०
स होवाच–तपस्यन्तं सिद्धारण्ये भृगुपुत्रं पृच्छध्वमिति ग. पू. १।६
स होवाच–तां हि वै पूर्वं नारायणो यस्मिँल्लोका ओताश्च प्रोताश्च तस्यहृत्पद्माज्जातोऽब्जयोनि-स्तपस्तप्त्वा तस्मै ह वरं ददौ गोपालो. १।१४
स होवाच–त्वामेव जानीयामिति १ ऐत. २।३।४
स होवाच नारदः...निर्वैरः शान्तो दान्तः सन्यासी परमहंसा-श्रमेणास्खलित-स्वस्वरूपध्यानेन देहत्यागं करोति स मुक्तो भवति ना. प. १।१
स होवाच पितरं, तत कस्मै मां दास्यसीति। द्वितीयं तृतीयं तꣳ होवाच, मृत्यवे त्वा ददामीति कठो. १।४
स होवाच– प्रजापतिः स यो ह वै सावित्रस्याष्टाक्षरं पदं श्रिया-भिषिक्तं तत्साम्नोऽङ्गं वेद श्रिया हैवाऽभिषिच्यते नृ. पू. १।३
स होवाच प्रतर्दनस्त्वमेव वृणीष्व यं त्वं मनुष्यायहिततमं मन्यस इति कौ. त. ३।१
स होवाच– बहव इमेऽस्मिन्पुरुषे कामा नानात्ययाः छांदो. ४।१०।३
स होवाच–बालाकिर्य एवैष आदित्ये पुरुषस्तमेवाहमुपास इति कौ. त. ४।२
स होवाच–ब्रह्मपुत्रस्तपस्तेपे सिद्ध-क्षेत्रे महायशाः ग. पू. १।६
स होवाच– भगवंतो यदिदं सब-माध्वै यदृचोऽधीध्वै यद्यजूंषि यत्सामानि कस्यायं महिमेति छाग. १।२
स होवाच भगवान् ब्रह्मा आनन्दं ब्रह्मणो विद्वान्सच्चिदानन्द-स्वरूपो भवति ना. उ. ता. १।१
स होवाच भगवान् ब्रह्मा नारायण-यन्त्रमन्त्रावरणपूजामाचचक्षे ना. पू. ६।१
स होवाच भगवान् उपासनविधिं व्याचष्टे ना. पू. ४।११
स होवाच यदिदमिच्छाचिदिच्छा-चिदीक्षध्वै किं तद्येन ब्राह्मण इति छाग. १।३
स होवाच–यदेतदस्मिन्मण्डले-ऽर्चिर्दीप्यते बम्भ्रम्यमाणमिव, चाकश्यमानमिव, जाज्वल्य-मानमिव, देदीप्यमानमिव, लेलिहानं तदेव मे ब्रह्म आर्षे. ५।२
स होवाच– याज्ञवल्क्यः प्रिया बतारे नः सती बृ. उ. २।४।४
स होवाच याज्ञवल्क्यः – सो-ऽविमुक्त उपास्यः.. जाबालो. २
स होवाचाजातशत्रुं काश्यं ब्रह्म ते ब्रवाणीति बृह. २।१।१
स होवाचाजातशत्रुः सहस्रमेतस्यां वाचि दद्मो जनको जनक इति वै जना धावन्तीति बृह. २।१।१
स होवाचेन्द्रो यत्स्वामुद्गीथेनोपाव-नेष्यन्ते तेनैवते कल्पयिष्यन्तीति शौनको. ४।२
स होवाचोषस्तश्चाक्रायणो यथा विब्रूयादसौ गौरसावश्व इत्येव-मेवैतद्व्यपदिष्टं भवति बृह. ३।४।२
स होहं वैतद्भगवन्मनुष्येषु (मा.पा.) प्रश्नो. ५।१
स ह्येनन्नेदिष्ठं पस्पर्श, स ह्येनं प्रथमो विदाञ्चकार ब्रह्मेति केनो. ४।३
संपूर्ण कुम्भवदेहं कुम्भये-न्मारुतेन्धना त्रि. ब्रा. २।९८

सं मा सिञ्चन्तु मरुतः समिन्द्रः
सं बृहस्पतिः सह्वै. २२
संयमासंयमाभ्यां च संसारः
शान्तिमन्वगात् महो. ४।८७
संयमाग्निषु जुह्वति भ. गी. ४।२६
संयुक्तमेकतां याति तथाऽऽत्म-
न्यात्मविन्मुनिः २ आत्मो. २५
संयुक्तमेतत्क्षरमक्षरं च व्यक्ताव्यक्तं
भरते विश्वमीशः । अनीशश्चात्मा
बध्यते भोक्तृभावाज्ज्ञात्वा देवं
मुच्यते सर्वपाशैः श्वेता. १।८
[+ भवसं. २।५+ ना. प. ९।७
संयोग एषां न त्वात्मभावादात्मा
ह्यनीशः सुखदुःखहेतोः ना. प. ९।१
संयोगो योग इत्युक्तो जीवात्म-
परमात्मनोः भवसं. ३।१३
संवत्सर आत्माऽश्वस्य मेध्यस्य बृह. १।१।१
संवत्सरत्रयादूर्ध्वं प्राणायामपरो नरः त्रि. ब्रा. १०२
संवत्सरत्रयेणाऽपि लयस्थस्यापि
योगिनः । तेजस्तत्त्वस्य सिद्धिः
स्याच्चोयतत्त्वमयो भवेत् अमन. १।७६
संवत्सरश्च यजमानश्च लोकाः
सोमो यत्र पवते यत्र सूर्यः मुण्ड. २।१।६
संवत्सरस्य तेजोभूतस्य भूतस्यात्म-
भूतस्य त्वमात्माऽसि कौ. त. १।६
संवत्सरं दीक्षितो भवति संवत्सरा-
देवात्मानं पुनीते सह्वै. १२
संवत्सरं पयसा जुह्वदपपुनर्मृत्युं
जयतीति बृह. १।५।२
संवत्सरं मज्जो नाश्नीयात्तद्व्रतम् छांदो. २।१९।२
संवत्सरः प्रजननम् सह्वै. २३
संवत्सरात्खल्वेताः प्रजाः प्रजायन्ते
संवत्सरेणेह वै जाता विवर्धन्ते
संवत्सरे प्रत्यस्तं यन्ति मैत्रा. ६।१५
संवत्सरादादित्यमादित्याच्चन्द्रमसं
चन्द्रमसो विद्युतं तत्पुरुषो-
ऽमानवः [छांदो. ४।१५।५+ ५।१०।२
संवत्सरादेवात्मानं पुनीते सह्वै. १२

संवत्सरो वै प्रजापतिः, तस्यायने
दक्षिणं चोत्तरं च प्रश्नो. १।९
संवत्सरोऽसावादित्यः म. ना. १७।१३
संवर्गोऽसि पाप्मानं मे संवृङ्धि कौ. त. २।७
संवर्चसा पयसा संतनूभिरगन्महि
मनसा स९ शिवेन सह्वै. ५
संवर्तकोऽग्निर्मरुतो विराडेकर्षि-
र्भास्वती स्मृता सा साम्न-
श्चतुर्थः पादो भवति नृ. पू. २।१
संवादमिममद्भुतम् भ.गी. १८।७६
संवादमिममश्रौषं भ.गी. १८।७४
संविद्ध सदसच्चापि चाहं
विश्वमिदं ध्रुवम् २ देव्यु. ४
संवित्संरोधनं श्रेयः प्राणादि-
स्पन्दनं वरम् अ. पू. ४।४१
संविदपेतं निरय एव मूत्रद्वारेण
निष्क्रान्तम् (शरीरं) मैत्रे. १।३
संविदा देयम् तैत्ति. १।११।३
संविदितमनोन्मन्यनुभवः मं. ब्रा. ३।१
संविद्भ्रूयाश्च तन्मध्ये शक्तिरुद्धा
स्थिता परा । तत्र पूर्णां गिरौ
पीठे शक्तिं ध्यात्वा विमुच्यते योगरा. १८
संविद्वस्तुदशालम्बः सा यस्येह
न विद्यते । सोऽसंविदजडः
प्रोक्तः कुर्वन्कार्यशतान्यपि अ. पू. ४।९८
संविन्मात्रपरोऽस्म्यहम् १ सं.सो. २।४७
संविन्मात्रमहं महत् महो. ६।८१
संविन्मात्रस्थितश्चाहमजोऽस्मि
किमतः परम् । व्यतिरिक्तं
जडं सर्वं स्वप्नवच्च विनश्यति स्कन्दो. ३
संविन्मात्रं परं ब्रह्म तत्त्वमात्रं
विजृम्भते स्कन्दो. शीर्षकं
संविभज्य सुतानर्थं ग्राम्यकामान्
विसृज्य च कुण्डिको. ३
संविभज्य सुतानर्थैर्ग्राम्यकामा-
न्विसृज्य च । चरेत वाममार्गेण
शुचौ देशे परिभ्रमन् २ सन्यासो. ४
संविशत्यात्मनाऽऽत्मानं य एवं वेद नृसिंहो. २।७

संवृत्त्या जायते सर्वं शाश्वतं नास्ति तेन वै अ. शां. ५७
संवेद्य वर्जितमनुत्तममाद्यमेकं संवित्पदं विकलनं कलयन् महात्मन् । हृद्येव तिष्ठ कलनारहितः क्रियां तु कुर्वन्नकर्तृपदमेत्य शमोदितश्रीः अ. पू. ४।९१
संवेद्यसम्परित्यागात्प्राणस्पन्दनवासने । समूलं नश्यतः क्षिप्रं मूलच्छेदादिव द्रुमः अ. पू. ४।५४
संवेद्येन हृदाकाशे मनागपि न लिप्यते । यस्यासावजडा संवित् जीवन्मुक्तः स कथ्यते अ. पू. ४।५९
संशयात्मा विनश्यति भ. गी. ४।४०
संशये समनुप्राप्ते ब्रह्मनिश्चयमाश्रयेत् ते. बिं. ६।१०१
संशान्तदुःखमजडात्मकमेकमुत्तमानन्दमन्थरमपेतरजस्तमो यत् । आकाशकोशतनवोऽतनवो महान्तस्तस्मिन्पदे गलितचित्तलवा भवन्ति अ. पू. ४।२४
संशान्तसर्वसङ्कल्पः प्रशान्तसकलेषणः । निर्विकल्पपदं गत्वा स्वस्थो भव मुनीश्वर महो. ६।८२
संशान्तसर्वसङ्कल्पा या शिलावदवस्थितिः । जाग्रन्निद्राविनिर्मुक्तासा स्वरूपस्थितिः परा [महो.५।६+ मैत्रे. २।३०
सं॰ शाम्यति तन्निधनम् छांदो. २।१२।१
संशितं मे ब्रह्म संशितं वीर्यं बलं सहवै. ८
संशितं क्षत्रं मे जिष्णु यस्याहमस्मि पुरोहितः सहवै. ८
संसार एव दुःखानां सीमान्त इति कथ्यते । तन्मध्ये पतिते देहे सुखमासाद्यते कथम् महो. ६।२६
संसारदुःखानि न मां स्पृशन्ति वराहो. ३।३
संसारदोषदृष्ट्यैव विरक्तिर्जायते सदा । विरक्तस्य तु संसारात् सन्न्यासः स्यान्न संशयः ना. प. ६।२६
संसारनिवृत्तिमार्गप्रवृत्तिः कदापि न जायते त्रि. म. ना.५।३

संसारपारं मुनयोऽपि यान्ति हेरम्बो. ७
संसारमण्डलं दुःखं पच्यन्ते यत्र जन्तवः इतिहा. १२
संसारमेव निस्सारं दृष्ट्वा सारदिदृक्षया । सन्न्यसेद्बन्धनाशाय परं वैराग्यमाश्रितः[भवसं.१।१+ नार. प. ३।१५
संसाररात्रिदुस्स्वप्ने शून्ये देहमये भ्रमे । सर्वमेव पवित्रं तदृष्टं संसृतिविभ्रमम् महो. ६।२२
संसाराडम्बरमिदं कथमभ्युदितं मुने । कथं च प्रशमं याति किं यत्कस्य कदा वद महो. २।१५
संसाराडम्बरमिदं कथमभ्युत्थितं गुरो । कथं प्रशममायाति यथावत्कथयाशु मे महो. २।३०
संसाराम्बुनिधावस्मिन् वासनाम्बुपरिप्लुते । ये प्रज्ञानावमारूढास्ते तीर्णाः पण्डिताः परे महो. ५।१७६
संसारार्णवसञ्जातं सेवितं मम मानसे । चन्द्रसूर्यविषो दिव्यां ध्वजा मेरुर्हिरण्मयः गोपालो. २।२६
संसारितोऽयमानन्दमयो रस आत्मानमानन्दमयतया प्रपद्यते सामर. १०२
संसारे च गुहावाच्ये मायाज्ञानादिसंज्ञके । निहितं ब्रह्म यो वेद परमे व्योम्नि संज्ञिते ॥ सोऽश्नुते सकलान्कामान्क्रमेणैव द्विजोत्तमः कठश्रु. १३
संसारेषु नराधमान् भ. गी. १६।१९
संसिद्धिमपि गच्छेद्द्वियया सह ज्ञानवान् संहितो. ३।८
संसिद्धिं परमां गताः भ. गी. ८।१५
संसिद्धिं लभते नरः भ. गी. १८।४५
संसिद्धोऽयं जीवसञ्ज्ञो मायोपाधिभेदेन नानाशरीरभावमाप्नोति सामर. १००
संसिद्धौ कुरुनन्दन भ. गी. ६।४३
संसृज्य विश्वा भुवनानि गोपाः श्वेताश्व. ३।२
संसृज्य विश्वा भुवनानि गोप्ता बटुको. २२

(अथ) संसृतिबन्धमोक्षयोर्विद्याविद्ये चक्षुषी उपसंहृत्य — महावा. १
संस्कारसहितं धार्यम् (भस्म) — बृ. जा. ३।१
संसृष्टं धनमुभयं समाकृतमस्मभ्यं दत्तां वरुणश्च मन्युः — वनदु. ११३
[ऋ. मं. १०।८४।७+ — अथर्व. ४।३१।७
संस्तभ्य सिंहं स्वसुतान्गुणार्थान् संयोज्य शृङ्गैर्ऋषभस्य हत्वा । वश्यां स्फुरन्तीमसतीं निपीड्य सम्भक्ष्य सिंहेन स एष वीरः — नृसिंहो. ४।३
संस्तभ्यात्मानमात्मना — भ. गी. ३।४३
संस्थितानि पूर्वाणि दारुपात्राण्यग्नौ जुहुयात् (यतेः) — कठरु. २
संहारप्रणवः सृष्टिप्रणवश्चान्तर्बहिश्चोभयात्मकत्वात्त्रिविधो ब्रह्मप्रणवः — ना. प. ८।१
संहाररूपा रुद्राणी भवति — ना. पू. ता. २।१
संहारो निर्गुणप्रणवः — तुरीयो. १
सं हास्मै पद्यते यं कामं कामयते, य एवं वेद — बृह. ६।१।४,४
सा कलहंसी सृष्टयादौ ब्रह्मणः पुत्री सरस्वती — सामर. ९२
सा कारणं कारणकारणाधिपा नास्याश्च कश्चिज्जनिता न चाधिपः — गुह्यका. ६८
साकारमनित्यं नित्यं निराकारं — त्रि. म. ना. २।१
साकारस्तु द्विविधः सोपाधिको निरुपाधिकश्च — त्रि. म. ना. २।१
साकारः सावयवो निरवयवं निराकारम् — त्रि. म. ना. २।१
सा कालपुत्रपदवी सा महावीचिवागुरा । सासिपत्रवनश्रेणी या देहेऽहमिति स्थितिः — ना. प. ३।५०
साकं स एको भूतश्चरति प्रजानां तस्मादुच्यत एकः — वटुको. २०
सा काष्ठा सा परा गतिः — कठो. ३।११
सा कुण्डलिनी कण्ठोर्ध्वभागे सुप्ता चेद्योगिनां मुक्तये भवति — शाण्डि. १।७।३७

साक्षाच्छक्तिर्भगवतः स्मरणमात्ररूपाविर्भावप्रादुर्भावात्मिका — सीतो. २५
साक्षात् कथयतः स्वयम् — भ. गी. १८।७५
साक्षादपरोक्षाद्ब्रह्म — बृह. ३।४।२,२
साक्षाद्विधिमुखो ह्येष समाधिः पारमार्थिकः — मुक्तिको. २।५६
साक्षान्नारायणो देवः परं ब्रह्माभिधीयते — ना. पू. ता. ५।७
(अहो) साक्षान्नारायणोऽयं परं ब्रह्म — सामर. ५४
साक्षाद्ब्रह्म गोपालपुरी भवति — गोपालो. १।१५
साक्षाद्ब्रह्मस्वरूपो जगन्नाथः — राधोप. ४।१
साक्षाद्ब्रह्मैव, नान्योऽस्तीत्येवं ब्रह्मविदां स्थितिः — वराहो. २।२१
साक्षाद्भूयात्तु मङ्गलम् — शिवो. ७।८०
साक्षिण्येषा केवला निर्गुणा च — गुह्यका. ६९
साक्षिभूते समे स्वच्छे निर्विकल्पे चिदात्मनि । निरिच्छं प्रतिबिम्बन्ति जगन्ति मुकुरे यथा — महो. ५।५५
साक्षी चेता केवलो निर्गुणश्च — श्वेता. ६।११
[+राधोप. ४।३+ब्रह्मो. १६+ — गोपालो. २।१९
साक्षी सम्पूर्णकेवलः — महो. २।७३
साक्षी स्वप्रकाशः — नृसिंहो. ९।६
साक्ष्यनपेक्षोऽहं निजमहिम्नि संस्थोऽहमचलोऽहम् — आ. प्र. ४
साक्ष्यविशेषोऽनन्योऽसुखदुःखोऽद्वयः परमात्मा — नृसिंहो. ९।७
साक्ष्यहं किञ्चिदप्यत्र न कुर्वे नापि कारये — १ अवधू. १५
साक्ष्यहं सर्वदा नित्यश्चिन्मात्रोऽहं न संशयः — सर्वसारो. ८
सा गतिर्लोक एव सः — मैत्रा. ६।२४
सा गौरभवदृषभ इतरस्तां समेवाभवत् — बृह. १।४।४
साग्निका अग्निव्रतधारकाः कर्मजडास्तैः सह कदाचित्तद्धर्मालापनं न कुर्यात् — सामर. २२

साऽग्र एव सुभिक्षा बभूव तान्प्रति- गृह्य निदधौ	छांदो. १।१०।५
साङ्ख्य एवाववुद्धा ये ते साङ्ख्या योगिनः परे	अ. पू. ५।४९
साङ्ख्ययोगौ पृथग्बालाः	भ. गी. ५।४
साङ्ख्यं योगं समभ्यस्ये पुरुषं पञ्चविंशकम्	निरुक्तो. १।७
साङ्ख्ये कृतान्ते प्रोक्तानि	भ. गी. १८।१३
सा चेदस्मै न दद्यात् काममेना- मवक्रीणीयात्, सा चेदस्मै नैव दद्यात्काममेनां यष्ट्या वा पाणिना वोपहत्यातिक्रामेत्	बृह. ६।४।७
सा चेदस्मै दद्यादिन्द्रियेण ते यशसा यश आदधामीति	बृह. ६।४।८
सा चैवाग्निः, सा च सूर्यः, सा वायुः, सा च चन्द्रमाः	गुह्यका. ५२
सा जीवन्मुक्ततोदेति स्वरूपानन्द- दायिनी	महो. ४।३८
साज्यं हविरनामयं मोदमिति शिखां यज्ञोपवीतं पितरं पुत्रं कलत्रं कर्म चाध्ययनं मन्त्रान्तरं विसृज्यैव परिव्रजत्यात्मवित्	ना. प. ३।७७
सा तु (सुषुम्ना) मूलाधारादारभ्य ब्रह्मरन्ध्रगामिनी भवति	अद्वयता. २
सा त्वं वीरवती भव याऽस्मान् वीरवतोऽकरत्	बृह. ६।४।२८
सात्यकिश्चापराजितः	भ. गी. १।१७
सा त्याज्या सर्वयत्नेन सर्वनाशे- ऽप्युपस्थिते। स्प्रष्टव्या सा न भव्येन सश्वमांसेव पुल्कसी	ना. प. ३।५०
सा त्रिविधा व्याप्य तिष्ठति (माया)	सामर. ९८
सात्त्विकत्वात् समष्टित्वात् साक्षि- त्वाज्जगतामपि। जगत्कर्तुमकर्तुं वा चान्यथा कर्तुमीशते...	सरस्व. ४०
सात्त्विकमायात्मको विष्णुः	पा. ब्र. २
सात्त्विक-राजस-तामस-लक्षणानि त्रयो गुणाः	शारीरको. ५
सात्त्विकं निर्मलं फलम्	भ. गी. १४।१६
सात्त्विकं परिचक्षते	भ. गी. १७।१७
सात्त्विकांशेन जायन्ते कर्मण्या द्रव्यसम्पदः। रजस्तमः- स्वरूपेण भावा यज्ञबहिष्कृताः	भवसं. ४।७
सात्त्विकी ज्ञानशक्तिः। राजसी क्रियाशक्तिः। तामसी द्रव्यशक्तिः	ग. शो. ४।३
सात्त्विकी राजसी चैव	भ. गी. १७।२
सात्त्विकोऽस्मि सदाऽस्म्यहम्	मैत्रे. ३।६
सात्त्विक्या दिशो वायुःसूर्योवरुणो- ऽश्विनाविति ज्ञानेन्द्रियदेवताः	गणेशो. ४।४
सार्धकार्णद्वयं रामो रमन्ते यत्र योगिनः	रामर. ५।४
सा देवी त्रिधा भवति, शक्त्यासना इच्छाशक्तिः क्रियाशक्तिः साक्षाच्छक्तिरिति	सीतो. ६
साधकः साधयेत्सर्वमिह लोके परत्र च	सूर्यता. ६।३
साधनचतुष्टयसम्पन्नः सन्न्यस्तुमर्हति	ना. प. २।१
साधनचतुष्टयसम्पन्नः सर्वसंसारोपरि मनोवाक्कायकर्मभिर्यथाशानिवृत्तः	ना. प. १।१
साधनचतुष्टयसम्पन्नो यः सन्न्यस्यति स एव ज्ञानसन्न्यासी	१ सं. सो. २।१३
साधनसम्पन्न एव सन्न्यस्तुमर्हति	१ सं. सो. २।१
साधनं प्रभवेत्पुंसां वैराग्यादि- चतुष्टयम्	वराहो. २।२
साधयन् वज्रकुम्भानि नव द्वाराणि बन्धयेत्	ब्र. वि. ७५
साधवो दीनवत्सला एवासते	सामर. ३७
साधिभूताधिदैवं मां	भ. गी. ७।३०
साधियज्ञं च ये विदुः	भ. गी. ७।३०
साधुकारी साधुर्भवति	बृह. ४।४।५
साधुत्वे नियोगं सुलभं पवित्रं सुलभं सुकरं तद्विष्णुक्षेत्रं	नारदो. १
साधुनैनमुपागादित्येव तदाहुः	छांदो. २।१।२
साधुभिः पूज्यमानोऽस्मिन् पीड्य- मानेऽपि दुर्जनैः। समभावो भवेद्यस्य स जीवन्मुक्त उच्यते	अध्यात्मो. ४७
साधुरेव स मन्तव्यः	भ. गी. ९।३०

साधुवेशं समाश्रित्य जीवन्ति बहवो नराः । नरके रौरवे घोरे कर्मत्यागात्पतन्ति ते — भवसं. १।५४
साध्या उत्तरत उद्यन्ति तपन्ति वर्षन्ति स्तुवन्ति — मैत्रा. ७।४
साधुष्वपि च पापेषु — भ. गी. ६।९
साध्यानामेव तावदाधिपत्यं स्वाराज्यं पर्येता — छांदो. ३।१०।४
साध्या मनुष्याः पशवो वयांसि । प्राणापानौ व्रीहियवौ तपश्च — मुण्ड. २।१।७
सानन्दं निश्चलं चेतस्ततः सुश्लिष्ट-मुच्यते । अतीव निर्मलीभूतं सानन्दं च सुलीनकम् — अमन. २।५७
सा निशा पश्यतो मुनेः — भ. गी. २।६९
सान्निध्ये विषयाणां यः समर्थो विकलेन्द्रियः । सुप्तवद्वर्तते नित्यं स भिक्षुर्मुग्ध उच्यते — ना. प. ३।६८
सान्नेनोपसमाहिता प्राज्वालीत्तयै-तर्हि वेदाननुभवति — छांदो. ६।७।६
सा पुनर्विकृतिं प्राप्य सत्त्वोद्रिक्ता-ऽव्यक्ताख्यावरणशक्तिरासीत् — पैङ्गलो. १।२
सा प्रसिद्धाऽतिदुःखाय सुखा-योच्छेदमागता (वासना-तन्तुबद्धोऽयं लोको विपरिवर्तते) — महो. ५।८७
साऽब्रवीत्तपसा मां विजिज्ञासस्वेति — अव्यक्तो. २
साऽब्रवीदज्ञेयं हि तत्सौम्य तेजः । यदविज्ञेयं तदव्यक्तम — अव्यक्तो. २
साऽब्रवीदहं ब्रह्मस्वरूपिणी — देव्यु. १
साऽब्रवीद्विमेमि वा एतदेभ्यो ययोजीयांसो बलीयांस इमे पराभवन्निति — शौनको. ३।२
साऽब्रवीद्विमेमि वा एतदेतेभ्यो ययोजीयांसो बलीयांस इमे परावृतन्निति — शौनको. ४।२
सा ब्रह्मणः पुत्री आप्तयौवनैवास्त — सामर. ९२
सा ब्रह्मेति होवाच ब्रह्मणो वा एतद्विजये महीयध्वमिति — केनो. ४।१
सा भक्तिस्त्रिविधैव भवति — सामर. २
सा भावयित्री भावयितव्या भवति — २ ऐत. ४।३

साम तु जानीयाद्यो जानीते सोऽमृतत्वं च गच्छति — नृ. पू. १।५
सामतो गायत्र्युष्णिग्बृहती त्रिष्टु-ब्विद्वपदेति — १ ऐत. ३।४।२
सामन्तश्चेन्द्रियाक्रान्तैर्मनो मन्ये विवेकिनः — महो. ५।७९
साम प्राणं प्रपद्ये [प्रवर्ग्यः. १+ — वा. सं. ३६।१
साम-प्राणो वै साम, प्राणे हीमानि सर्वाणि भूतानि सम्यञ्चि — बृह. ५।१३।३
सामर्थ्यशक्तिः सर्वसिद्धिप्रदा भवति — सौभाग्य. २६
सामवेद एवोद्यजुर्वेदो गीः ऋ-ग्वेदस्थं दुग्धेऽस्मै वाग्दोहम् — छांदो. १।३।७
सामवेदस्तथा द्यौश्चाहवनीयस्तथैव च । ईश्वरः परमो देवो मकारः परिकीर्तितः — ब्र. वि. ६
सामवेदेनास्तमये महीयते — सूर्यता. १।५
सामवेदे ह्रस्वोदात्त एकाक्षर उकारः — २ प्रणवो. १२
साम वै स्वः, स हिरण्यगर्भो भवति — ग. पू. ३।१
सामहंसकूजितैरतिशोभित-मानन्दमयानन्तशिखरै-रलङ्कृतं..प्रणवाख्यं विमानं विराजते — त्रि. म. ना.७।९
सामाथो यः कश्च गेष्णः स स्वरः — १ ऐत. ३।६।४
सामानि यो वेद स वेद सर्वं, यो मानसं वेद स वेद ब्रह्म — इतिहा. ९
सामानि सम्राड्सुरन्तरिक्षम् — एका. ७
सामान्येव मधुकृतः, सामवेद एव पुष्पं, ता अमृता आपः — छांदो. ३।३।१
सा माया स्ववशोपाधिः सर्व-ज्ञस्येश्वरस्य हि । वश्यमायत्व-मेकत्वं सर्वज्ञत्वं च तस्य तु — सरस्व. ३९
सामैवाहं संहितां मन्य इति — ३ ऐत. १।५।३
सामैश्चिदन्तो विरजश्च बाहुं हिरण्मयं वेदविदां वरिष्ठम् — एका. १०
सामोत्तरः पक्षः, आदेश आत्मा — तैत्ति. २।३
साम्न उद्गीथो रसः — छांदो. १।१।२
साम्नः सहस्रशाखाः स्युः, पञ्च-शाखा अथर्वणः — सीतो. १६

साम्नः सायुज्यꣳ सलोकतां जयति, य एवमेतत्साम वेद — बृह. १।३।२२
साम्नः सायुज्यꣳ सलोकतां जयति, य एवं वेद — बृह. ५।१३।३
साम्नामादित्यो दैवतं तदेव ज्योतिः — २ प्रणवो. २१
साम्नामेव तद्रसेन साम्नां वीर्येण साम्नां यज्ञस्य विरिष्टꣳ सन्दधाति — छांदो. ४।१७।६
साम्बरा वा दिगम्बरा वा न तेषां धर्माधर्मौ, न मेध्यामेध्यौ — १ अवधू. ६
साम्बं मामव वृषभारूढं...पशुपाशविमोचकं पुरुषं... — भस्मजा. २।४
साम्येन मधुसूदन — भ. गी. ६।३३
साम्राज्यदायिनी नित्यं सर्ववेदस्वरूपिणी। महाविद्या जगन्माता मुनीनां मोक्षदायिनी — ना. पू. ता.२।३
सा यदा मृत्युमत्यमुच्यत सोऽग्निरभवत् — बृह. १।३।१२
सायंप्रातस्तु यः सन्ध्यामरकन्यामुपविष्ठते। स तया पावितो देव्या ब्राह्मणः पूतकिल्बिषः — सन्ध्यो. ७
सायं प्राश्नीयात्सोऽयं सायंहोमः यत्प्रातः सोऽयं प्रातः (होमः) — कठश्रु. २१
सायं ये नोपतिष्ठन्ति ब्राह्मण्यं प्राप्य दुर्लभम्। अब्राह्मणांस्तु तान्विद्याद्यथा शूद्रास्तथैव ते — सन्ध्यो. १५
सायं सन्ध्यामुपासीत कृतवीरासनो द्विजः। कृतोत्थानस्तथा प्रातः प्राञ्जलिः सुसमाहितः — सन्ध्यो. ५
सायं सन्ध्या सरस्वती वृद्धा कृष्णाङ्गी कृष्णवासिनी — गायत्रीर. ६
सा या दीनतयाऽसम्पूर्णाऽसंसृष्टाऽसंव्यता वाक् सा पुरुषपशव्या — संहितो. १।३
सा या ब्रह्मणि चितिर्या व्यष्टिस्तां चितिं जयति तां व्यष्टिं व्यश्नुते — कौ. त. १७
सा या यदा मृत्युमत्यमुच्यत[मा.पा.] — बृ.ह. १।३।१२
सारमेव रसं लब्ध्वा...सुखी भवति — कठरु. २६
सारस्वतो वा एष देवो न हि पारमात्मिकः ह योऽभयो वा सर्वे सन्धुषे स्वाहा — पारमा. ३।७
सारादपि महासारं शिवोपनिषदं परम्। अल्पग्रन्थं महार्थं च प्रवक्ष्यामि जगद्धितम् — शिवो. १।८
सार्धत्रिकोटितीर्थेषु स्नात्वा गृहमुपागतः। स्वोदन्तं कथयामास ऋभुं नत्वा महायशाः — महो. ३।२
सार्धत्रिकोटितीर्थेषु स्नानपुण्यप्रभावतः। प्रादुर्भूतो मनसि मे विचारः सोऽयमीदृशः — महो. ३।३
सार्धसंवत्सरेणापि लयस्थस्यापि योगिनः। तोयतत्त्वस्य सिद्धिः स्यात्तोयतत्त्वमयो भवेत् — अमन. १।७५
सार्धं श्रविष्ठार्धान्तं सौम्यम् — मैत्रा. ६।१४
सार्वकामिकं मोक्षद्वारमृङ्मयं यजुर्मयं साममयं ब्रह्ममयममृतमयं भवति — नृ. पू. ५।७
सार्वकामिकं मोक्षद्वारमुद्योगिन उपदिशन्ति — नृ. पू. ५।१
सालज्यं संस्थानमपराजितमायानं — कौ. त. १।३
सालम्बस्तु समस्तकर्मातिदूरतया करचरणादिमूर्तिविशिष्टं मण्डलाद्यालम्बनं सालंबयोगः — त्रि. म. ना.८।४
सालोक्यादिविभागेन चतुर्धा मुक्तिरीरिता — मुक्तिको. १।१७
सावधानो भव त्वं च ग्राह्यग्राहकसङ्क्रमे। अजस्रमेव सङ्कल्पदशाः परिहरञ्छनैः — अ. पू. ५।१०३
सावयवत्वादवश्यमनित्यं भवत्येव — त्रि. म. ना. २।१
सा वा एषा देवतैतासां देवतानां पाप्मानं मृत्युमपहत्य यत्रासां दिशामन्तस्तद्गमयाञ्चकार — बृह. १।३।१०
सा वा एषा सर्वाणि छंदांसि — अव्यक्तो. ६
सा वाक् संवत्सरं प्रोष्यागत्योवाच कथमशकत मदृते जीवितुमिति — बृह. ६।१।८
सा वाक्—सोऽग्निस्तदेतद्ब्रह्मवर्चसमन्नाद्यमित्युपासीत — छांदो. ३।१३।२

(अथ) सावित्री गायत्र्या यजुषा प्रोक्ता तया सर्वमिदं व्याप्तं नृ. पू. ४।३
सावित्री प्रवेशपूर्वकमप्सु...वेदमातरं क्रमाद्व्याहृतिषु त्रिषु प्रविलाप्य ...ब्रह्माहमस्मीति तत्त्वमस्यादिवाक्यार्थस्वरूपानुसन्धानं कुर्वन्नुदीचीं दिशं गच्छेत् प. हं. ५
सावित्रीं प्रणवं यजुर्लक्ष्मीं स्त्रीशूद्राय नेच्छन्ति नृ. पू. १।३
सावित्रीं लक्ष्मीं यजुः प्रणवं यदि जानीयात् स्त्री शूद्रः स मृतोऽधो गच्छति नृ. पू. १।३
सावित्र्यात्मा पाशुपतं परं ब्रह्मावधूतकम् मुक्तिको. १।३७
सावित्र्याः सरस्वत्यभवत् गायत्रीर. १
सा वेत्ति वेद्यं न च तस्यास्तु वेत्ता तामाहुरग्र्यां महतीं महीयसीम् गुह्यका. ५१
सा वै दैवी वाग्यया यद्यदेव वदति तत्तद्भवति बृह. १।५।१८
सा शक्तिर्येन चालिता स्यात्स तु मुक्तो भवति [शाण्डिल्यो. १।७।३७
सा शिखा नीरैः सर्वत्रावस्थितैः कार्यं निवर्तयेत् कठश्रु. ९
(अथ) सा शुध्यति द्वितीयां जहाति, अथ सा शुध्यति तृतीयां जहाति, अथ सा शुध्यति सर्वं जहाति,सर्वैः शुध्यति छांदो. ६।११।२
सा षोडशी सषोडशीकं पुरमध्यं बिभर्ति त्रि. म. ना. १०
सा सत्यता सा शिवता साऽवस्था पारमात्मिकी। सर्वज्ञता सा सन्तुष्टिर्न तु यत्र मनः क्षतम् १सं. सो. २।४६
सा (सीता) सर्ववेदमयी सर्वदेवमयी सीतो. ६
सा (वाक्) संवत्सरं प्रोष्य पर्येत्योवाच कथमशकतर्ते मज्जीवितुमिति छांदो. ५।१।८
सा साम्नश्चतुर्थपादो भवति (क्षकारात्मिका पृथिवी) नृ. पू. २।१
सा साम्नस्तृतीयः पादो भवति नृ. पू. २।१
सा साम्नः प्रथमः पादो भवति नृ. पू. २।१
सा साम्नो द्वितीयः पादो भवति नृ. पू. २।१
सा सृष्टिर्द्विभेदा भवति; एका संसिद्धा, अन्या साधनसिद्धा सामर. ६
साऽस्यै तमात्मानमत्र गतं भावयति २ ऐत. ४।३
साहङ्कारेण वा पुनः भ. गी. १८।२४
साऽहं ब्रह्म न संसारी न मत्तोऽन्यः कदाचन। यथा फेनतरङ्गादि समुद्रादुत्थितं पुनः जा. द. १०।६
सा हि वाचामगम्यत्वादसत्तामिव शाश्वतीम्। नैरात्मसिद्धात्मदशामुपयातैव शिष्यते १ सं.सो. २।२८
सा हि सर्वगता संवित् प्राणस्पन्देन चाल्यते। चित्तैकाग्र्यादतो ज्ञानमुक्तं समुपजायते मुक्तिको. २।४१
सा हि सर्वगता संवित् प्राणस्पन्देन बोध्यते। संवित्संरोधनं श्रेयः प्राणादिस्पन्दनं वरम् अ. पू. ४।४२
सा हेयमीक्षाञ्चक्रे कथं नु माऽऽत्मान एव जनयित्वा सम्भवति बृह. १।४।४
सा हैषा गयांस्तत्रे, प्राणा वै गयास्तत्प्राणांस्तत्रे बृह. ५।१४।४
सा हैषा गायंस्तते प्राणा वै गायास्तान्प्राणांस्तते तद्गायंस्तते तस्माद्गायत्री नाम गायत्र्यु. ३
सा होवाच गान्धर्वी कथं वाऽस्मासु जातो गोपालः कथं वा ज्ञातोऽसौ त्वया मुने कृष्णः गोपालो. १।१२
सा होवाच नमस्तेऽस्तु याज्ञवल्क्य यो म एतं व्यवोचोऽपरस्मै धारयस्वेति बृह. ३।८।५
सा होवाच–बिभेमि वा एतद्देतेभ्यो यथैतत्परावृतमिति शौनको. १।३
सा होवाच मैत्रेयी–यन्नु म इयं भगो सर्वा पृथिवी वित्तेन पूर्णा स्यात्कथं तेनामृता स्यामिति बृह. २।४।२
सा होवाच– यदूर्ध्वं याज्ञवल्क्य... यद्भूतं च भवच्च भविष्यच्चेत्याचक्षते कस्मिंस्तदोतं च प्रोतं चेति बृह. ३।८।६

सा होवाच—यदेष पुरागा उदेष मे भागधेयी स्यादिति — शौनको. १।३

सा होव काले भुवनस्य गोप्त्री विश्वाधिपा सर्वभूतेषु गूढा। यस्यां युक्ता ब्रह्मर्षयोऽपि देवा ज्ञात्वा तां मृत्युपाशाश्छिनत्ति — गुह्यका. ५८

सांसारिकक्रियायुक्तं ब्रह्मज्ञोऽस्मीति वादिनम्। कर्मब्रह्मोभयभ्रष्टं तं त्यजेदन्त्यजं यथा — अमन. २।१०१

सांसिद्धिकी स्वाभाविकी, सहजा अकृता च या। प्रकृतिः सेति विज्ञेया स्वभावं न जहाति या — अ. शां. ९

सिक्त्वा ततः स्वाभिमुखं च कृत्वा लिङ्गेऽर्पयेत्पृष्ठमध्यं दलानाम् — १ बिल्वो. ८

सितया शर्करयाऽभिषिच्य सर्वजीववधात्पूतो भवति — भस्मजा. २।११

सितासिता च रक्ता च सर्वकामदुघा विभोः — मंत्रिको. ५

सिद्धत्वासिद्धत्वाभ्यां स्वतन्त्रास्वतन्त्रत्वेन सैषा वटबीजसामान्यवदनेकवटशक्तिरेकैव — नृसिंहो. ९।२

सिद्धमन्नं यदानीतं ब्राह्मणेन मठं प्रति। उपपन्नमिति प्राहुर्मुनयो मोक्षकाङ्क्षिणः — १सं. सो. २।७०

सिद्धये सर्वकर्मणाम् — भ. गी. १८।१३

सिद्धये सर्वभूतादि विश्वाधिष्ठानमद्वयम्। यस्मिन् सिद्धिंगताः सिद्धास्तत् सिद्धासनमुच्यते — ते. बिं. १।२६

सिद्धलक्ष्मी राजलक्ष्मीर्जयलक्ष्मीः सरस्वती। श्रीलक्ष्मीर्वरलक्ष्मीश्च प्रसन्ना मम सर्वदा — वनदु. ४

सिद्धविद्यानामासां फलं दक्षिणावत् — तारोप. ५

(ततः) सिद्धस्य कृपया योगी भवति, नान्यथा — यो. शि. १।५०

सिद्धं पद्मं तथा सिंहं भद्रं चेति चतुष्टयम् — १ यो. त. २९

सिद्धं हि ब्रह्म न ह्यत्र किञ्चानुभूयते — नृसिंहो. ९।६

सिद्धा अपि विनश्यन्ति जीर्यन्ते दानवादयः — महो. ३।५०

सिद्धानां कपिलो मुनिः — भ. गी. १०।२६

सिद्धानां सिद्धलक्ष्मीर्भवति — ना. पू. ता. २।१

सिद्धा नित्या महावीर्या इच्छारूपाः स्वयोगजाः। चिरकालात् प्रजायन्ते वासनारहितेषु च — यो. शि.१।१५५

सिद्धान्तश्रवणंनाम वेदान्तार्थविचारः — शांडि. १।२।१

सिद्धान्तोऽध्यात्मशास्त्राणां सर्वापह्नव एव हि। नाविद्याऽस्तीह नो माया शान्तं ब्रह्मेदमक्रमम् — अ. पू. ५।११२

सिद्धासने स्थितो योगी मुद्रां सन्धाय वैष्णवीम्। शृणुयाद्दक्षिणे कर्णे नादमन्तर्गतं सदा — ना. बिं. ३१

सिद्धा हि ते महाभागा नरा होकान्तिनोऽभवन्। तमोरजोभ्यां निर्मुक्ताः प्रवेक्ष्यन्ति च मां मुने — ना. महो. ३८

सिद्धिभिर्लक्षयेत्सिद्धं जीवन्मुक्तं तथैव च — यो. शि.१।१५९

सिद्धिभिः परिहीनं तु नरं बद्धं तु लक्षयेत् — यो. शि.१।१६०

सिद्धिमार्गेण लभते, नान्यथा पद्मसम्भव। नानामार्गैस्तु दुष्प्रापं कैवल्यं परमं पदम् — यो. शि. १।४

सिद्धिर्भवति कर्मजा — भ. गी. ४।१२

सिद्धिं प्राप्तो यथा ब्रह्म — भ. गी. १८।५०

सिद्धिं विन्दति मानवः — भ. गी. १८।४६

सिद्धिं समधिगच्छति — भ. गी. ३।४

सिद्धोऽहं बलवान् सुखी — भ. गी. १६।१४

सिद्धो चित्तं न कुर्वीत चञ्चलत्वेन चेतसः — यो. शि. ५।६२

सिद्धौदनं त्रिमासं तु जुह्वदमावनन्यधीः। तावज्जुह्वत्पृथुकान्हि साक्षाद्वैश्रवणो भवेत् — ग. पू. २।१२

सिद्ध्यन्ति सिद्धयो यास्तु कल्पितास्ताः प्रकीर्तिताः — यो.शि. १।१५२

सिद्ध्यसिद्ध्योर्निर्विकारः — भ. गी. १८।२६

सिद्ध्यसिद्ध्योः समो भूत्वा — भ. गी. २।४८

सिंहनादं विनद्योच्चैः — भ. गी. १।१२

सिन्दुरव्रातसङ्काशं रविस्थान-
स्थितं रजः। शशिस्थान-
स्थितं शुक्लं तयोरैक्यं सुदुर्लभम् योगचू. ६१
सिन्दूरवर्णः पुरुषः पुराणः हेरम्बो. ५
सिंहारूढां श्यामकान्तिं शङ्ख-
चक्रधरां हृदा। दुर्गां देवीं तथा
ध्यायेच्छरचापौ च बिभ्रतीम् वनदु. ७
सिंहो वा कुञ्जरो वाऽपि तथाऽन्यो
वा मृगो वने। नवग्राहो
दुराधर्षो विश्वस्तश्च प्रजायते योगो. ७
सीता इति त्रिवर्णात्मा साक्षा-
न्मायामयी भवेत् सीतो. २
सीता भगवती ज्ञेया मूलप्रकृति-
संज्ञिता सीतो. ५
सीतारामौ तन्मयावत्र पूज्यौ
जातान्याभ्यां भुवनानि द्विसप्त रा. पू. ३।१
सीदन्ति मम गात्राणि भ. गी. १।२८
सीवनीपार्श्वमुभयं गुल्फाभ्यां
व्युत्क्रमेण तु। निपीड्यासन-
मेतच्च मुक्तासनमितीरितम् त्रि. ब्रा. २।४६
सीवनीं गुल्फदेशाभ्यां निपीड्य
व्युत्क्रमेण तु। प्रसार्य जानुनो-
र्हस्तावासनं सिंहरूपकम् त्रि. ब्रा. २।४४
(एवं) सुकृतदुष्कृते सर्वाणि च
द्वन्द्वानि कौ. त. १।४
सुखदं संविदः स्वास्थ्यं प्राण-
संरोधनं विदुः अ. पू. ४।४५
सुखदुःखदशाधीरं साम्यान्न प्रो-
द्धरन्ति यम्। निःश्वासा इव
शैलेन्द्रं चित्तं तस्य मृतं विदुः अ. पू. ४।१२
सुखदुःखबुद्ध्या श्रेयोऽन्तःकर्ता
यदा तदा इष्टविषये बुद्धिः
सुखबुद्धिरनिष्टविषये बुद्धि-
र्दुःखबुद्धिः सर्वसारो. ५
सुखदुःखमोहसंज्ञं ह्यन्नभूतमिदं
जगत् मैत्रा. ६।१०
सुखदुःखं यथा यत्तु बोद्धव्यं
तत्तथोच्यते आयुर्वे. ५
सुखदुःखादिमोहेषु यथा संसारिणां
स्थितिः॥ तथा ज्ञानी यदा
तिष्ठेद्वासनावसितस्तदा। तयो-
र्नास्ति विशेषोऽत्र समा
संसारभावना [यो. शि. १।२२,२३
सुखदुःखे मे त्वयि दधानीति पिता,
सुखदुःखे ते मयि दध इति पुत्रः कौ. त. २।१५
सुखदुःखे समे कृत्वा भ. गी. २।३८
सुखमक्षयमश्नुते भ. गी. ५।२१
सुखमात्यन्तिकं यत्तद्बुद्धिग्राह्यमती-
न्द्रियम्। एतत्क्षराक्षरातीत-
मनक्षरमितीर्यते यो. शि. ३।१५
सुखमात्यन्तिकं यत्तत् भ. गी. ६।२१
सुखमानन्त्यमुत्तमम् शिवो. ७।११८
सुखमाप्रियते नित्यं दुःखं विप्रियते
सदा। यस्य कस्य च धर्मस्य
ग्रहेण भगवानसौ म. शां. ८२
सुखमेव लब्ध्वा करोति सुखं त्वेव
विजिज्ञासितव्यमिति छांदो. ७।२२।१
सुखरूपत्वमस्त्येतदानन्दत्वं सदा
मम (निरुपाधिकनित्यं
यत्सुप्तौ सर्वसुखात्परम्) वराहो. ३।१०
सुखरूपः स्वयम्प्रभः (आत्मा) जा. द. ५।१३
सुखसङ्गेन बध्नाति भ. गी. १४।६
सुखसंसेवितं स्वप्नं सुजीर्णमित-
भोजनम्। शरीरशुद्धिं कृत्वाऽऽदौ
सुखमासनमास्थितः॥ प्राणस्य
शोधयेन्मार्गं रेचपूरककुम्भकैः यो. शि. ५।३६
सुखस्थापितसर्वाङ्गः सुस्थिरात्मा
सुनिश्चलः। बाहुदण्डप्रमाणेन
कृतदृष्टिः समभ्यसेत् अमन. २।४९
सुखस्यानन्तरं दुःखं दुःखस्या-
नन्तरं सुखम्। न नित्यं लभते
दुःखं न नित्यं लभते सुखम् भवसं. १।१०
सुखस्यैकान्तिकस्य च भ. गी. १४।२७
सुखं त्विदानीं त्रिविधं भ. गी. १८।३६
सुखं दुःखं न जानाति शीतोष्णे
च न विन्दति। विचारं चेन्द्रि-
याणां च न वेत्ति हि लयं गतः अमन. १।२४

सुखं दुःखं भवोऽभावः म. गी. १०।४
सुखं बन्धात्प्रमुच्यते भ. गी. ५।३
सुखं भगवो विजिज्ञासे छांदो. ७।२२।१
सुखं मोहनमात्मनः भ. गी. १८।३९
सुखं वा यदि वा दुःखं भ. गी. ६।३२
सुखं ह्यवमतः शेते सुखं च प्रतिबुद्ध्यते । सुखं चरति लोकेऽस्मिन्नवमन्ता विनश्यति ना. प. ३।४२
सुखादिं दुःखनिधनां प्रतिमुञ्चस्व स्वां पुरम् अरुणो. १
सुखाद्यनुभवो यावत्तावत्प्रारब्धमिष्यते । फलोदयः क्रियापूर्वो निष्क्रियो नहि कुत्रचित् अध्यात्मो. ४९
सुखानां मूर्ध्नि दुःखानि किमेकं संश्रयाम्यहम् । (सतोऽसत्तास्थिता मूर्ध्नि रम्याणां मूर्ध्न्यरम्यता) महो. ६।२४
सुखाभ्युदयिकं चैव नैःश्रेयसिकमेव च । प्रवृत्तं च निवृत्तं च द्विविधं कर्म वैदिकम् भवसं. ५।६
सुखासनवृत्तिश्चीरवासाश्चैवमासनियमो भवति मं. ब्रा. १।१
सुखासनस्थो दक्षनाड्या बहिस्थं पवनं समाकृष्य केशमानखाग्रं कुम्भयित्वा सव्यनाड्यारेचयेत् शांडि. १।७।१४
सुखासने समासीनस्तत्त्वाभ्यासं समाचरेत् । सदाऽभ्यासेन तत्कुर्यात्परतत्त्वप्रकाशनम अमन. १।१६
सुखिनः क्षत्रियाः पार्थ भ. गी. २।३२
सुखिनः स्याम माधव भ. गी. १।३७
सुखेन ब्रह्मसंस्पर्शं भ. गी. ६।२८
सुखेनैव भवेद्यस्मिन्नजस्रं ब्रह्मचिन्तनम् । आसनं तद्विजानीयादन्यत्सुखविनाशनम् ते. बिं. १।२९
सुखेषु विगतस्पृहः भ. गी. २।५६
सुघोषमणिपुष्पकौ भ. गी. १।१६
सुजीर्णोऽपि सुजीर्णासु विद्वांस्त्रीषु न विश्वसेत् । सुजीर्णास्वपि कन्यासु सज्जते जीर्णमम्बरम् १ सं. सो. २।९०
सुदर्शनदिव्यतेजोन्तर्गतः सुदर्शनपुरुषो यथा सूर्यमण्डलान्तर्गतः सूर्यनारायणोऽमितापरिच्छिन्नाद्वैतपरमानन्दलक्षणतेजोराश्यन्तर्गत आदिनारायणस्तथा सन्दृश्यते त्रि. म. ना. ३।४
सुदर्शनपुरुषो महाविष्णुरेव त्रि. म. ना. ७।४
सुदर्शनामेवाप्येति यः सुदर्शनामेवास्तमेति सुबालो. ९।२
सुदर्शनाय विद्महे हेतिराजाय धीमहि । तन्नश्चक्रः प्रचोदयात् त्रि.म.ना. ७।१०
सुदामा नारदो मुनिः कृष्णोप. २४
सुदुर्दर्शमिदं रूपं भ. गी. ११।५२
सुपर्णोऽसि गरुत्मांस्त्रिवृत्ते शिरोगायत्रं चक्षुः स्तोम आत्मा साम ते तनू वामदेव्यम् गारुडो. १४
सुपर्णोऽसि गरुत्मान्दिवं गच्छ सुवः पत ओमी... गारुडो. १५
सुपुण्यं पुण्यात्मकं वितानं दाधार देवाय स्वाहा पारमा. ६।३
सुप्तेरुत्थाय सुप्त्यन्तं ब्रह्मैकं प्रविचिन्त्यताम् वराहो. २।६४
स्वसिद्धान्तव्यवस्थासु द्वैतिनो निश्चिता दृढम्। परस्परं विरुध्यन्ते तैरयं न विरुध्यते — अद्वैत. १७

स्वसृहा वै त्वमस्याचार्यहा वै त्वमसि ब्राह्मणहा वै त्वमसीति — छांदो. ७।१५।२

स्वस्ति सर्वजीवेभ्य इत्युक्त्वाऽऽत्मानमनन्यं ध्यायंस्तदूर्ध्वबाहुर्विमुक्तमार्गो भवेत् — कठरु. ४

स्वस्थक्रमेणैव चेदात्मश्राद्धं विरजाहोमं कृत्वा...तत्त्वमस्यादिवाक्यार्थस्वरूपानुसन्धानं कुर्वन्नुदीचीं दिशं गच्छेत् — प. हं. प. ५

स्वस्थं शान्तं सनिर्वाणमकथ्यं सुखमुत्तमम्। अजमजेन ज्ञेयेन सर्वज्ञं परिचक्षते — अद्वैतो. ४७

स्वस्तिक-गोमुख-पद्म-वीर-सिंह-भद्रमुक्तमयूराख्यान्यासनान्यष्टौ — शांडि. १।३।१

स्वस्तिकं गोमुखं पद्मं वीरसिंहासने तथा। भद्रं मुक्तासनं चैव मयूरासनमेव च॥ सुखासनसमाख्यं च नवमं मुनिपुङ्गव — जा. द. ३।१

स्वस्तिकं नाम-जानूर्वोरन्तरे सम्यक्कृत्वा पादतले उभे। ऋजुकायः समासीनः स्वस्तिकं तत्प्रचक्षते — शांडि. १।३।१

स्वस्तिकासनमास्थाय समाहितमनास्तथा... — जा. द. ६।१२

स्वस्तिको दक्षिणं पादं वामपादं तु कुञ्चिताम्। प्राञ्जलीकृतदोर्युग्मं गरुडं हरिवल्लभम् — गारुडो. १

स्वस्तिदा विशस्पतिर्वृत्रहा विमृधो वशी। वृषेन्द्रः पुर एतु नः स्वस्तिदा अभयङ्करः
[महाना. ५।२+१३।१७+ — वनदु. १५४
[ऋ. मं. १०।१५२।२+ — अथर्व. १।२१।१
तै. आ. १०।१।९

स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः। स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु [शां. पा. — म. ना. ५।३
[+ऋ.मं.१।८९।६+सा.वे. — २।१२।२५
[+वा. सं. २५।१९+ — तै. आ. १।१।१

स्वस्ति नो मघवा करोतु हन्तु
  पाप्मानं योऽस्मान्द्वेष्टि   महाना. ५।९
  [तै. सं. १।४।४१+तै. आ.   १०।१।११
स्वस्ति नो मिमीतामश्विना भगः   महाना.
  [+ऋ. मं. ५.५१।११
स्वस्ति वः पाराय तमसः परस्तात्   मुण्ड. २।२६
स्वस्ति सर्वजीवेभ्य इत्युक्त्वा
  दीक्षामुपेयात्   कठश्रु. २२
स्वस्ति सर्वजीवेभ्य इत्युक्त्वा-
  ऽऽत्मानमनन्यं ध्यायंस्त-
  दूर्ध्वबाहुर्विमुक्तमार्गो भवेत्   कठरु. ४
स्वस्तीत्युक्त्वा महर्षिसिद्धसङ्घाः   भ. गी. ११।२१
स्वस्मिन्विलीनं सकलं जगदा-
  विर्भावयति (प्रकृतिः)   पैङ्गलो. १।२
स्वस्यात्मनि स्वयं रंस्ये स्वात्मन्येव
  विलोकये । स्वात्मन्येव सुखा-
  सीनः स्वात्ममात्रावशेषकः   ते. बिं. ३।२४
स्वस्वरूपतया सर्वं वेद स्वानु-
  भवेन यः । स धीरः स तु
  विज्ञेयः सोऽहं तत्त्वं ऋभो भव   वराहो. २।३०
[अग्राह्यमिति च—] स्वस्वरूप-
  व्यतिरिक्तमायामयबुद्धी-
  न्द्रियगोचर-जगत्सत्यत्व-
  चिन्तनमग्राह्यम्   निरा. ३१
स्वस्वरूपज्ञः परिव्राट् परिव्राडे-
  काकी चरति भयत्रस्तसारङ्ग-
  वत्तिष्ठति   ना. प. ९।२१
स्वस्वरूपं तु चिन्मात्रं सर्वदा
  सर्वदेहिनाम् । नैव देहादि-
  सङ्घातो घटवद्दृष्टिगोचरः   वराहो. २।२४
स्वस्वरूपं स्वयं भुङ्क्ते नास्ति
  भोज्यं पृथक्स्वतः   वराहो. २।२६
स्वस्वरूपानुसन्धानान्नृत्यन्तं सर्व-
  साक्षिणम् । मुहूर्तं चिन्तयेन्मां
  यः सर्वबन्धैः प्रमुच्यते   वराहो. २।३२
स्वस्वेतरद्वितीयांशैः पञ्चधा
  संयोज्य पञ्चीकृतभूतैरनन्त-
  कोटिब्रह्माण्डानि   पैङ्गलो. १।४

स्वहृदि चैतन्ये तिष्ठति
  त्रिविधं ब्रह्म   परब्रह्मो. ७
स्वस्वं विषयमुद्दिश्य प्रवर्तन्ते
  निरन्तरम् । प्रवर्तकत्वं
  चाप्यस्य मायया, न स्वभावतः   पा. ब्र. १५
स्वरूपं ध्यायन्पुनः पृथक् प्रणव-
  व्याहृतिपूर्वकं...तत्त्वमस्यादि-
  वाक्यार्थस्वरूपानुसन्धानं
  कुर्वन्नुदीचीं दिशं गच्छेत्   प. हं. प. ५
स्वꣳ ह्यपीतो भवति   छांदो. ६।८।१
स्वः पश्यन्त उत्तरम्   छांदो. ३।१७।७
स्वः स्वाहेत्यग्नौ हुत्वा मन्थे
  सꣳस्रवमवनयति   बृह. ६।३।३
स्वः प्रपद्येऽमुनाऽमुनाऽमुना   छांदो. ३।१५।३
स्वाचाग्ने तनुवं पिप्रयस्वास्मभ्यं
  च सौभगमायजस्व[म.ना.६।१८   ऋ.मं.८।१०।१०
  [+अथर्व.६।११०।१+   तै.आ. १०।२।१
स्वातीका गुप्तयो गुप्तिः सत्त्वं
  सत्त्वानां(सत्यं सत्यानां)सात्त्वं-
  पदं तत्सत्त्वं सत्त्वमासीत् सात्त्वं
  सात्त्वं वै सत्त्वमादधानाय स्वाहा   पारमा. ४।८
स्वाज्ञानासुरराड्ग्रासस्वज्ञान-
  नरकेसरी । प्रतियोगिविनि-
  र्मुक्तं ब्रह्ममात्रं करोतु माम्   अध्यात्मो. शीर्षकं
स्वात्मनि व्योमनि स्वस्थे
  जगदुन्मेषचित्रकृत्   महो. २।६
स्वात्मनिष्ठानुकूलेन सर्वं विसृज्य
  तुरीयातीतावधूतवेषेणाद्वैत-
  निष्ठापरः प्रणवात्मकत्वेन देह-
  त्यागं करोति यः सोऽवधूतः   तुरीया. ३
स्वात्मनि स्वपरिस्पन्दैः
  स्फुरत्यच्छैरिवार्णवः   महो. ५।११७
स्वात्मनैव सदा तुष्टः स्वयं सर्वात्म-
  ना स्थितः । निर्धनोऽपि सदा
  तुष्टोऽप्यसहायो महाबलः   १ आत्मो. १२
स्वात्मनैव सदानन्दरूपेणास्मि
  स्वलक्षणः   अध्यात्मो. ६७
स्वात्मन्यवस्थितः सम्य-
  ग्ज्ञानिभिश्च सुशिक्षितः   ना. दु. ५।३

स्वात्मन्यारोपिताशेषाभासवस्तु-निरासतः । स्वयमेव परं ब्रह्म पूर्णमद्वयमक्रियम् अध्यात्मो. २१
स्वात्मन्येवं सदा स्थित्या मनो नश्यति योगिनः अध्यात्मो. ४
स्वात्मन्येव स्वयं सर्वं सदा पश्यति निर्भयः । तदा मुक्तो न मुक्तश्च बद्धस्यैव विमुक्तता पा. ब्र. ३६
स्वात्मन्येवावतिष्ठेऽहं तुर्यरूपपदेऽनिशम् । अन्तरेव शशामास्य क्रमेण प्राणसन्ततिः अ. पू. ३।१०
स्वात्मबन्धहरः (रहितः) [रामो. ता. २।४+ गणेशो. १।४
स्वात्ममंत्रं सदा पश्येत्स्वात्म-मन्त्रं सदाऽभ्यसेत् ते. बिं ३।५९
स्वात्मयोगैकनिष्ठेषु स्वातन्त्र्यादीश्वरप्रियाः । प्रभूताः सिद्धयो यास्ताः कल्पनारहिताः स्मृताः यो.शि. १।१५४
स्वात्मप्रकाशरूपं तत् किं शास्त्रेण प्रकाश्यते यो. शि. १।५
स्वात्मराज्ये त्वमेवासि स्वयम्भाव-विवर्जितः ते. बिं. ५।७३
स्वात्मवत्सर्वभूतेषु कायेन मनसा गिरा । अनुज्ञा या दया सैव प्रोक्ता वेदान्तवेदिभिः जा. द. १।१५
स्वात्मसिंहासने स्थित्वा स्वात्मनोऽन्यन्न चिन्तये ते. बिं. ३।२५
स्वात्मानन्दानुभवतरङ्गिण्याः प्रवाहैरविमङ्गलं...चिद्रूप-विलासनिभचिन्मयासनं विराजते सि. सा. ४।१
स्वात्मानमेवैषा ददाति नृसिंहो. ७।६
स्वात्मानं च श्रियं ध्यायेदमृत-प्लावनं ततः [वराहो. ५।३४,३९
स्वात्मारामः सुखासनः ते. बिं. ४।४७
स्वाधिष्ठानं ततश्चक्रं मेढ्रमेव निगद्यते । मणिवत्तन्तुना यत्र वायुना पूरितं वपुः ध्या. बिं. ४८
स्वाधिष्ठानं द्वितीयं स्याच्चक्रं योगरा. ७
स्वाधिष्ठानाह्वयं चक्रं लिङ्गमूले षडस्रके । (कम्) । नाभिदेशे स्थितं चक्रं दशा(स्रं)रं मणिपूरकम् [यो. शि. १।१७२+ ५। ८
स्वाध्यायज्ञानयज्ञाश्च भ. गी. ४।२८
स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यम् तैत्ति. १।११।१
स्वाध्यायप्रवचने एवेति नाको मौद्गल्यः तैत्ति. १।९।१
स्वाध्याययुक्ता ब्राह्मणाश्चरन्ति पा. ब्र. ९
स्वाध्याय-शौच-सन्तोष-तपांसि नियतात्मवान् । कुर्वीत ब्रह्मणि तथा परस्मिन्प्रवणं मनः भवसं. ३।१७
स्वाध्यायसंयमाभ्यां स दृश्यते पुरुषोत्तमः । तत्प्राप्तिकारणं राजंस्तदेतदिति पठ्यते भवसं. ३।६
स्वाध्यायस्तप आर्जवम् भ. गी. १६।१
स्वाध्यायान्मा प्रमदः तैत्ति. १।११।१
स्वाध्यायाभ्यसनं चैव भ. गी. १७।१५
स्वानन्दमयानन्ताचिन्त्यविभव आत्माऽन्तरात्मा परमात्मा ज्ञानात्मा तुरीयात्मा..शुद्धो देव एको नारायणः त्रि. म. ना.१।५
स्वानन्दानुभवाच्छान्तिरेषैवोपरतेः फलम् अध्यात्मो. २८
स्वानुभूतेश्च शास्त्रस्य गुरोश्चैवैकवाक्यता । यस्याभ्यासेन तेनात्मा सततं चावलोक्यते महो. ४।५
स्वानुभूत्या स्वयं ज्ञात्वा स्वमात्मानमखण्डितम् । स सिद्धः... अध्यात्मो. ६४
स्वानुभूत्यैकमानं च यत्तत्त्वं तदसौ स्थितः । यदेकं चाप्यनेकं च साञ्जनं च निरञ्जनम् ॥ यत्सर्वं चाप्यसर्वं च यत्तत्त्वं तदसौ स्थितः अ. पू. ३।२१
स्वान्तर्विजृंभितभानुमण्डलध्यानतदाकाराकारितपरब्रह्माकारितमुक्तिमार्गमारूढः परिपक्वो भवति मं. ब्रा. २।७

स्वान्तःस्थितः स्वयमेवेति य एवं वेद स मुक्तो भवति — ना. प. ९।२०
स्वाम्यं परस्वरूपं स्याद्दास्यं जीवस्य सर्वदा । प्राक्प्रत्यगात्मनो रूपं स्वाम्यं दास्यमिति स्थितिः — भवसं. २।५७
स्वायत्तमेकान्तहितं स्वेप्सित-त्यागवेदनम् । यस्य दुष्करतां यातं धिक्तं पुरुषकण्टकम् — महो. ४।८९
स्वाय लोकायारिष्टिमिच्छेदेवम् हैवंविदे सर्वाणि भूतान्य-रिष्टिमिच्छन्ति — बृह. १।४।१६
स्वाराज्यमतिरात्रेण (यजति) — मैत्रा. ६।३६
स्वार्थसंयमात्पुरुषज्ञानम् — शांडि. १।७।५२
स्वार्थे स्वाभाविकेऽर्थे च बहुधा संस्थितिस्त्वयि — मैत्रा. ५।२
स्वालोकतः शास्त्रदृशा स्वबुद्ध्या स्वानुभावतः । प्रयच्छति परां सिद्धिं त्यक्त्वात्मानं मनःपिता — महो. ५।८१
स्वावगम्यो लयः कोऽपि यो मनोवागगोचरः (जायते वाग-गोचरः) [वराहो. २।८१+ — अमन. २।२२
स्वावबोधकलालापकुशला दुर्लभा भुवि — अमन. २।२३
स्वाविद्यातत्कार्यजातं यद्विद्यापहवं गतम् । तद्ध्वंसविद्यानिष्पन्नं रामचन्द्रपदं भजे — अ. वि. शीर्षकं
स्वाविद्याद्वयतत्कार्यापह्नवज्ञान-भासुरम् । मन्त्रिकोपनिषद्वेद्यं रामचन्द्रमहं भजे — मन्त्रिको. शीर्षकं
स्वाश्रमेष्वेवानुक्रमणं स्वधर्मे एव सर्वं यत्ते — मैत्रा. ४।३

स्वाहान्ते जुहुयात्तत्र वर्णदेवाय पिण्डकान् । आघारावाज्यभागौ च प्रक्षिपेद्वयाहृतीः सुधीः — बृ. जा. ३।१३
स्वाहा स्वधा यश्च वषट्करोति रुद्रः पशूनां गुहया निमग्नः — एका. उ. ५
स्विष्टम् सुहुतं यज्ञक्रतूनां प्रायणम् सुवर्गस्य लोकस्य ज्योति-स्तस्मादग्निहोत्रं परमं वदन्ति — महाना. १७।९
स्वेच्छाचारस्वस्वभावोमोक्षःपरं ब्रह्म — निर्वाणो. ८
स्वेदजाः क्रिमिकीटादयः — ना. पू. ता. ५।६
स्वेन भासा स्वेन ज्योतिषा प्रस्वपि-त्यत्रायंपुरुषःस्वयंज्योतिर्भवति — बृह. ४।३।९
स्वेन रूपेणाभिनिष्पद्यते एष आत्मेति [छांदो. ८।३।४+ — मैत्रा. २।२
स्वेनावृतं सर्वमिदं प्रपञ्चं पञ्चात्मकं पञ्चसु वर्तमानम् । पञ्चीकृता-नन्तभवप्रपञ्चं पञ्चीकृतस्वा-वयवैरसंवृतम् — ना. प. ९।१८
स्वे महिम्नि तिष्ठमानं दृष्ट्वाऽऽवृत्त-चक्रमिव संसारचक्रमालोकयति — मैत्रा. ६।२८
स्वे महिम्नि सदा समासते तस्मादेनमकारार्थेन परेण ब्रह्मणैकीकुर्यात् — नृसिंहो. ७।६
स्वे स्वे कर्मण्यभिरतः — भ. गी. १८।४५
स्वैरं न विगायेत्तन्महाव्रतम् । न स मूढवल्लिप्यते — अवधू. ६
स्वैरं स्वैरविहरणं तत्संसरणम् — अवधू. ६
स्वौजसा सर्वमादधाति यः पापीयां-समनुपदमाहिंसत्सुपुण्यं पुण्यात्मकं पुण्यं वितान्त दाधार देवाय स्वाहा — पारमा. ६।३

ह

हकारं वियत्स्वरूपं च समानं स्फटिकप्रभम् । हन्नाभिनासा-कर्णं च पादाङ्गुष्ठादिसंस्थितम् — ध्या. बिं. ९७
हकारः परमेशः स्यात्तत्पदं चेति निश्चितम् । सकारो ध्यायते जन्तुर्हकारो हि भवेद्ध्रुवम् — यो. चू. ८३

हकारेण तु सूर्यः स्यात्सकारेणे-न्दुरुच्यते । सूर्याचन्द्रमसो-रैक्यं हठ इत्यभिधीयते — यो.शि. १।१३३
हकारेण बहिर्याति सकारेण विशेत् पुनः । हंस हंसेत्यमुं मन्त्रं जीवो जपति सर्वदा । हंस हंसेति

मन्त्रोऽयं सर्वैर्जीवैश्च जप्यते
[ध्या. बि. ६१+ यो. शि. १।१३०
हकारो सकारोमकारो
त्रयमेकस्वरूपं भवति हयग्री. ६
हठेन ग्रस्यते जाड्यं सर्वदोष-
समुद्भवम् । क्षेत्रज्ञः परमात्मा
च तयोरैक्यं यदा भवेत् ॥
तदैक्ये साधिते ब्रह्मंश्चित्तं
याति विलीनताम् यो.शि. १।१४
हतो वा प्राप्स्यसि स्वर्गं भ. गी. २।३७
हत्वाऽपि स इमाँल्लोकान् भ. गी. १८।१७
हत्वाऽर्थकामांस्तु गुरूनिहैव भ. गी. २।५
हत्वा स्वजनमाहवे भ. गी. १।३१
हत्वैतानाततायिनः भ. गी. १।३६
हनिष्याम वा एतद्यो यद्देवान्न
पराभावयिष्यथ शौनको. १।१
हनिष्ये चापरानपि भ. गी.१६।१४
हन्तकारं मनुष्याः स्वधाकारं
पितरः (उपजीवन्ति) बृह. ५।८।१
हन्त चित्तमहत्तायां कैषा विश्वासता
तव (चित्तमूलं हि संसारः) वराहो. ३।२१
हन्त त इदं प्रवक्ष्यामि गुह्यं ब्रह्म
सनातनम् कठो. ५।६
हन्ततर्हिभवत्येतद्व्याख्यास्यामि ते
व्याचक्षाणस्य तु मे निदिध्यासस्वेति बृह. ४।५।५
हन्त ते कथयिष्यामि भ. गी. १०।१९
हन्त तेऽनया कात्यायन्याऽन्तं
करवाणि बृह. २।४।१
हन्ता चेन्मन्यते हन्तुं हतश्चेन्मन्यते
हतम् । उभौ तौ न विजानीतो
नायं हन्ति न हन्यते कठो. २।१९
हन्ताहमेतद्भगवतो वेदानीति छांदो. १।८।७
हन्ताहमेतद्भगवतो वेदानीति(मा.पा.) छांदो. १।८।७
हन्ति पाप्मानं जहाति च य एवं वेद बृह. ५।५।३,४
हन्तुं स्वजनमुद्यताः भ. गी. १।४५
हन्तेन्द्रियगणा यूयं त्यजताकुलतां
शनैः । चिदात्मा भगवान्सर्व-
साक्षित्वेन स्थितोऽस्म्यहम् अ. पू. ३।८
हन्यान्मुष्टिभिराकाशं क्षुधार्तः
खण्डयेत्तुषम् । नाहं ब्रह्मेति
जानाति तस्य मुक्तिर्न जायते पैङ्गलो. ४।२२
हयग्रीवैकाक्षरजपशीलाज्ञया
सूर्यादयः स्वतः स्वस्वकर्मणि
प्रवर्तन्ते हयग्री. ६
हयो भूत्वा देवानवहत् बृह. १।१।२
हरन्ति प्रसभं मनः भ. गी. २।६०
हरमायात्मकेन ह्रीङ्कारेण हृल्लेखाख्या
भगवती त्रिपुरेति व्यापठ्यते त्रि. ता. १।१
हरमुवाच-कुरु हर संहारम् ।
जगद्धरणाद्धरो भव गणेशो. ३।११
हरितस्य नीलस्य पीतस्य लोहितस्य
श्वेतस्य नाड्यो रुधिरस्य पूर्णाः सुबालो. ४
हरिहरहिरण्यगर्भस्रष्टारमप्रमेय-
मनाद्यन्तं रुद्रसूक्तैरभिषिच्य भस्मजा. २।४
हरिं हरन्तं पादाभ्यामनुयान्ति
सुरेश्वराः शरभो. ६
हरिꣳ हरन्तमनुयन्ति देवा विश्व-
स्येशानं वृषभं मतीनाम्
[महाना. १३।११+ चित्त्यु. १५।१
हरिः पतङ्गः पटवी सुपर्णः चित्त्यु. ११।८
हरे राम हरे राम राम राम हरे
हरे । हरे कृष्ण हरे कृष्ण
कृष्ण कृष्ण हरे हरे कलिसं. २
हरो वै विलोक्य रुदति
स्म । रोदनाद्रुद्रसंज्ञः गणेशो. ३।१२
हर्षशोकान्वितः कर्ता भ. गी. १८।२७
हर्षामर्षभयक्रोधकामकार्पण्यदृष्टिभिः।
न परामृश्यते योऽन्तः स जीव-
न्मुक्त उच्यते महो. २।४४
हर्षामर्षभयक्रोधकामकार्पण्य-
दृष्टिभिः । न हृष्यति ग्लायति
यः परामर्शविवर्जितः महो. ६।४९
हर्षामर्षभयोद्वेगैः भ. गी. १२।१५
हविर्गुणा न वक्तव्याः पितरो
यावदर्पिताः । तृप्तैस्तु पितृभिः
पश्चाद्वक्तव्यं शोभनं हविः इतिहा. ८२
हविर्मेऽजस्रं विलहति इतिहा. ८९
हसत्युल्लसति प्रीत्या क्रीडते मोदते
तदा । तनोति जीवनं प्रीत्या
बिभेति सर्वतो भयात् यो. शि. ६।६७

हसन्ति लोकायतिका हसन्ति कुटिला जनाः — सूयंता. १।१२
हसौं हयग्रीवस्वरूपो भवति — हयग्री. ६
हस्तप्राप्तं च भक्षयेत् (यतिः) — ना. प. ५।४८
हस्तमेवाप्येति यो हस्तमेवास्तमेति — सुबालो. ९।६
हस्तं हस्तेन सम्पीड्य दन्तैर्दन्ता-न्विचूर्ण्य च। अङ्गान्यङ्गैः (इवाक्रम्य) समाक्रम्य जयेदादौ स्वकं मनः [महो. ५।७५+ — मुक्तिको. २।४२
हस्ताभावात्क्रिया न च — ते. बिं. ५।१९
हस्ताभ्यां चाग्निमसृजत — बृह. ६।४।६
हस्ताभ्यां नद्युत्तरणं न कुर्यान्न (वृक्षारोहणमपि)वृक्षमारोहेत् — ना.प.५।८+७।१
हस्तावध्यात्मं, आदातव्यमधिभूतं, इन्द्रस्तत्राधिदैवतं, नाडी तेषां निबन्धनम् — सुबालो. ५।११
हस्तावेवास्या एकमङ्गमुदूढं, तयोः कर्म परस्तात्प्रतिविहिता भूतमात्रा — कौ. त. ३।५
हस्तिजिह्वा तथा सव्यपादाङ्गुष्ठान्त-मिष्यते — जा. द. ४।२१
हस्तिजिह्वाभिधायास्तु वरुणो देवता भवेत् — जा. द. ४।३६
हस्ति हिरण्यं दासभार्यं क्षेत्राण्या-यतनानीति — छांदो. ७।२४।२
हस्तिनि सिंहे दंशे मशके नकुल-सर्पराक्षसगन्धर्वे मृत्यो रूपाणि विदित्वा न बिभेति कुतश्चनेति — सुबालो. १३।२
हस्तेन दक्षिणेनैव पीडयेन्नासिकापुटम् — त्रि. ब्रा. २।९५
हस्तौ च दातव्यं च –(मा. पा.) — प्रश्नो. ४।८
हस्तौ चादातव्यं च — प्रश्नो. ४।८
हस्तौ चादातव्यं च नारायणः — सुबालो. ६।१
हस्तौ पादावुपस्थं च जिह्वा पायुस्तथैव च। कर्मेन्द्रियाणि पञ्चैव राजन्नस्मिञ्छरीरके — भवसं. २।१८
हस्तौ वै ग्रहः, स कर्मणाऽतिग्राहेण गृहीतो हस्ताभ्याꣳ हि कर्म करोति — बृह. ३।२।८
हस्त्यृषभꣳ सहस्रं ददामीति होवाच जनको वैदेहः — बृह. ४।१।२-७
हं नमः शिरसि प्रोक्तं वेदु शिवो भवेत् — हंसषोढो. २

हंमी तृतीयस्याद्यार्धान्त्यं मृत्युं चतुर्थस्याद्यार्धान्त्यं साम तु जानीयाद्यो जानीते सोऽमृतत्वं च गच्छति — नृ. पू. १।५
हंस एव परं वाक्यं हंस एव तु वादिकम्। हंस एव परो रुद्रो हंस एव परात्परम् — ब्र. वि. ६१
हंसज्योतिरनूपम्यं मध्ये देवं व्यव-स्थितम्। दक्षिणामुखमाश्रित्य ज्ञानमुद्रां प्रकल्पयेत् — ब्र. वि. ६४
हंसपरमहंसयोरान्तरप्रणवः, तुरीयातीतावधूतयोर्ब्रह्म प्रणवः — ना. प. ७।१०
हंसपरमहंसयोर्ध्यानाधिकार-स्तुरीयातीतावधूतयोर्न — ना. प. ७।९
हंसपरमहंसयोर्मननं, तुरीया-तीतावधूतयोर्निदिध्यासः — ना. प. ७।११
हंसपरमहंसयोर्मानसार्चनं, तुरीया-तीतावधूतयोः सोऽहम्भावना — ना. प. ७।९
हंसप्रणवयोरभेदः — पा. ब्र. ३
हंसविद्यामिमां लब्ध्वा गुरुशुश्रूषया नरः॥ आत्मानमात्मना साक्षा-द्ब्रह्म बुद्ध्वा सुनिश्चलम्। देह-जात्यादिसम्बन्धान्वर्णाश्रम-समन्वितान्॥ वेदशास्त्राणि चान्यानि पदपांसुमिव त्यजेत् — ब्र. वि. २८
हंसविद्यामृते लोके नास्ति नित्यत्वसाधनम् — ब्र. वि. २६
हंसस्य तपोलोकः परमहंसस्य सत्य-लोकः [ना. प. ५।९+ — १सं. श्रो. २।५९
हंसस्य प्रार्थनाखिकालाः — पा. ब्र. ३
हंसस्याष्टगृहेष्वष्टकवलं परमहंसस्य पञ्चगृहेषु करपात्रं फलाहारो गोमुखं तुरीयातीतस्याजगरवृत्तिः — ना. प. ५।७
हंस हंस वदेद्वाक्यं प्राणिनां देह-माश्रितः। स प्राणापानयो-र्ग्रन्थिरजपेत्यभिधीयते — ब्र. वि. ७८
हंसहंसाय विद्महे सोहं हंसाय धीमहि। तन्नो हंसः प्रचोदयात् — वनदु. १४९

हंसहंसेति मन्त्रोऽयं सर्वैर्जीवैश्च
जप्यते । गुरुवाक्यात्सुषुम्नायां
विपरीतो भवेज्जपः — यो.शि. १।१३१
हंसहंसेति यो ब्रूयाद्धंसो
ब्रह्मा हरिः शिवः — ब्र. वि. ३४
हंसहंसेति सदा ध्यायन्सर्वेषु
देहेषु व्याप्य वर्तते — हंसो. ४
हंसहंसेत्यमुं मंत्रं जीवो जपति सर्वदा
[ध्या. बिं. ६२+ यो. चू. ३१+ — यो. शि. ६।५४
हंसः कं खं गं घं ङं महामुण्ड-
मालाधारिणि महाकालप्रिये
मां रक्ष रक्ष — हंसषोढो. २
हंसः चं छं जं झं ञं महात्रिपुर-
भैरवि पुस्तकाक्षमालाधारिणि
शत्रुमुखस्तम्भनं कुरु कुरु
स्वाहेति महापद्मे — हंसषोढो. २
हंसः टं ठं डं ढं णं डां डीं डं
डाकिनि मां रक्ष रक्ष
स्वाहेत्यनाहते न्यसेत् — हंसषोढो. २
हंसः तं थं दं धं नं महामारि
मारहारिणि हुं हुं दारिद्र्यं
हर हर स्वाहा — हंसषोढो. २
हंसः परमहंसो भूत्वा स्वरूपानु-
सन्धानेन सर्वप्रपञ्चं विदित्वा
...प्रणवात्मकत्वेन देहत्यागं
करोति यः सोऽवधूतः — तुरीया. ३
हंसः पं फं बं भं मं मार्जारि वीरा-
वलि ममालस्यं नाशय नाशय — हंसषोढो. २
हंसः यं रं लं वं शं षं सं हं
लम्बोदरि मातर्महामङ्गलप्रिये
मम जाड्यं छेदय छेदय — हंसषोढो. २
हंसःशक्तेरधिष्ठानं चराचरमिदंजगत् — वराहो. ५।५५
हंसः शिखा, प्रणव उपवीतम् — परब्र. ६
हंसः शुचिषद्वसुरन्तरिक्षसद्धोता
वेदिषदतिथिर्दुरोणसत् — कठो. ५।२
[महाना. ८।६+१२।३+ — नृ. पू. ३।६+
[ना. प. ५।४+ ग. पू. ता. २।९+ — ऋ.मं.४।४०।५
हंसा एकदण्डधराः शिखावर्जिता
यज्ञोपवीतधारिणः शिक्यकम-
ण्डलुहस्ता ग्रामैकरात्रवासिनो
नगरे तीर्थेषु पञ्चरात्रं वसन्त
एकरात्रद्विरात्रकृच्छ्रचांद्राय-
णादि चरन्त आत्मानं प्रार्थयन्ते — आश्रमो. ४
हंसात्मकं ते विरजा भवन्ति — ध्या. बिं. २४
(अथ) हंसा नाम ग्राम एकरात्रं
नगरे पञ्चरात्रं क्षेत्रे सप्तरात्रं
तदुपरि न वसेयुः-गोमयाहा-
रिणो नित्यं चान्द्रायणपरायणा
योगमार्गे मोक्षमेव प्रार्थयन्ते — भिक्षुको. ३
(अथ ह) हंस निशायामतिपेतुः — छांदो. ४।१।२
हंसेति वर्णद्वयेनान्तःशिखोपवीतित्वं
निश्चित्य...चतुर्विंशतितत्त्वा-
पादनतन्तुकत्वं नवतत्त्वमेकमेव — परब्र. ९
हंसे तु सकृदेव स्यात्
परमहंसे न विद्यते (स्नानं) — ना. प. ४।२३
हंसो जटाधारी त्रिपुण्ड्रोर्ध्वपुण्ड्र-
धारी असङ्कॢप्तमाधुकरान्नाशी
कौपीनखंडतुंडधारी [ना.प.५।५+ — १ सं.सो. २।१३
हंसो भगवाञ्छुचिरप्रतिरूपः — चाक्षुषो. २
हंसो भगवाञ्छुचिरूपः प्रतिरूपः — अक्ष्यु. २
हंसो विशोको अजरः पुराणो
ऋतीयमानो ब्रह्मस्मि नाम — बा. मं. २४
हंसो हंसमभ्युवाद हो होऽयि
भल्लाक्ष भल्लाक्ष जानश्रुतेः
पौत्रायणस्य समं दिवा ज्योति-
राततं तन्मा प्रसाङ्क्षीः — छांदो. ४।१।२
हानिरस्योपजायते — भ. गी. २।६५
हानोपादानचेष्टादि ध्यानकर्म — शांडि. १।४।९
हारे त्वा शूद्र तवैव सह गोभि-
रस्त्विति — छांदो. ४।२।३
हास्यनिष्ठीवनास्फोटमुखभाष्य-
विजृम्भणम् । पादप्रसारणं
गीतं न कुर्याद्गुरुसान्निधौ — शिवो. ७।१३
हिक्का कासस्तथा श्वासः शिरः-
कर्णाक्षिवेदनाः । भवन्ति
विविधा रोगाः पवनव्यत्यय-
क्रमात् — यो. चू. ११७

हिङ्कार इति त्र्यक्षरं प्रस्तार इति त्र्यक्षरं तत्समम् छांदो. २।१०।१
हितं मितं च भोक्तव्यं स्तोकं स्तोकमनेकधा वराहो. ५।९
हिता नाम नाड्यो द्वासप्ततिसहस्राणि हृदयात्पुरीततमभिप्रतिष्ठन्ते ताभिः प्रत्यवसृप्य पुरीतति शेते (आत्मा) बृह. २।१।१९
हितानाम हृदयस्य नाड्यो हृदयात् पुरीततमभिप्रतन्वन्ति कौ. त. ४।१९
हिताहितं मनोरामं वचः शोकावहं तु यत्। श्रुत्वाऽपि न शृणोतीव बधिरः स प्रकीर्तितः ना. प. ३।६७
हित्वा पापमवाप्स्यसि भ. गी. २।३३
हित्वैकारं तुरीयस्वरं सर्वादौ सूर्याचन्द्रमस्केन कामेश्वर्येवागस्त्यसंज्ञा त्रि. ता. १।१६
हिरण्मयं पुरुषं ज्योतीरूपं तपन्तम् चाक्षुषो. ४
हिरण्मयं यस्य विभाति सर्वं व्योमान्तरे रश्मिमिवांशुनाभिः एका. उ. ८
हिरण्मयं वेदविदां वरिष्ठं यमध्वरे ब्रह्मविदः स्तुवन्ति एका. उ. १०
हिरण्मयं सौम्यतनुं स्वभक्तायाभयप्रदम् गोपालो. २।२३
हिरण्मयः पुरुष एकहंस: बृह.४।३।११,१२
हिरण्मयः सर्वेभ्यो भूतेभ्यो ददर्श १ ऐत. १।३।१
हिरण्मयी अरणी याभ्यां निर्मन्थतामश्विनौ बृह. ६।४।२२
हिरण्मयेन पात्रेण सत्यस्यापिहितं मुखम्। तत्त्वं पूषन्नपावृणु सत्यधर्माय दृष्टये [बृह.५।१५।१+ मैत्रा. ६।३५
हिरण्मये परे कोशे विरजं ब्रह्म निष्कलम्। तच्छुभ्रं ज्योतिषां ज्योतिस्तद्यदात्मविदो विदुः मुण्ड. २।२।९
हिरण्मयो ह वा अमुष्मिँल्लोके सम्भवति १ ऐत. १।३।१
हिरण्मयोऽहं शिवरूपमस्मि [कैव. २० +२बिल्वो. १३
हिरण्यगर्भस्तदाज्ञया सूक्ष्माण्यपालयत् पैङ्गलो. १।५
हिरण्यगर्भस्त्रिरूप ईश्वरवद्व्यक्तचैतन्यः नृसिंहो. ९।४
हिरण्यगर्भस्तैजसः सूक्ष्मश्च उकारः यो. चू. ७५
हिरण्यगर्भः स्थूलोऽन्तर्द्वितीयः पाद उच्यते ना. प. ८।१३
हिरण्यगर्भस्य कारणं परमात्मानमण्डपरिपालकनारायणमभ्येति त्रि. म. ना. ३।४
हिरण्यगर्भं जनयामास पूर्वं स (सा) नो बुद्ध्या शुभया संयुनक्तु [श्वेताश्व. ३।४+ गुह्यका. ५६
हिरण्यगर्भं पश्यति जायमानं स नो देवः शुभया स्मृत्या संयुनक्तु महाना. ८।१२
हिरण्यगर्भं पश्यति जायमानं स नो बुद्ध्या शुभया संयुनक्तु श्वेताश्व. ४।१२
हिरण्यगर्भः स्थूलोऽन्तर्द्वितीयः पाद उच्यते ना. प. ८।१४
हिरण्यगर्भादीनहं जायमानान् पश्यामि भस्मजा. २।५
हिरण्यगर्भाधिष्ठितविक्षेपशक्तितस्तमोद्रिक्ताऽहङ्काराभिधा स्थूलशक्तिरासीत् पैङ्गलो. १।३
हिरण्यगर्भो भगवानेव च्छन्दसि सुष्टुतः। सोऽहं योगरतिर्ब्रह्मन्योगशास्त्रेषु शब्दितः ना. महो. ५८
हिरण्यगर्भो लोकादिश्चतुर्वक्त्रो निरुक्तगः। ब्रह्मा सनातनो देवो मम बह्वर्थचिन्तकः ना. महो. ३९
हिरण्यज्योतिर्यस्मिन्नयमात्माऽधिक्षियंति भुवनानि विश्वा सुबालो. २।१
हिरण्यज्योतिः शरीरस्य मध्ये चित्त्यु. ११।८
हिरण्यदन्तो बभसोऽनसूरिमहान्तमस्य महिमानमाहुः छांदो. ४।३।७
हिरण्यबाहुं हिरण्यरूपं हिरण्यवर्णं हिरण्यनिधिमद्वैतं... भगवन्तं शिवं प्रणम्य मुहुर्मुहुरभ्यर्च्य... कृताञ्जलिपुटः पप्रच्छ भस्मजा. १।१
हिरण्यबाहुं हिरण्यवर्णं हिरण्यरूपं पशुपाशविमोचकं पुरुषं कृष्ण-

पिङ्गलमूर्ध्वरेतं विरूपाक्षं...
रुद्रसूक्तैरभिषिच्य... भस्मजा. २।४
हिरण्ययोवेतसोमध्यआसाम्[त्रिसु.३ महाना. १२।३
हिरण्यवर्णः शकुनो हृद्यादित्ये
प्रतिष्ठितः मैत्रा. ६।३४
हिरण्यवर्णां हरिणीं सुवर्णरजत-
स्रजाम् । चन्द्रां हिरण्मयीं
लक्ष्मीं जातवेदो ममावह श्री. सू. १
[ऋ. खि. ५।८७।१
हिरण्यवर्णो हिरण्यश्मश्रुरानखा-
ग्रेभ्यो दीप्यमान इव आर्षे. ६।२
हिरण्यशृङ्गं वरुणं प्रपद्ये तीर्थं मे
देहि याचितः महाना. ५।१५
(तत्र) हिंसा नाम मनोवाक्काय-
कर्मभिः सर्वभूतेषु सर्वदा
क्लेशजननम् शांडि. १।१।३
हीनान्नपानवस्त्रः स्यान्नीचशय्या-
सनो गुरोः । न यथेष्टश्च सन्तिष्ठे-
त्कलहं च विवर्जयेत् शिवो. ७।१४
हीयतेऽर्थाद्य उ प्रेयो वृणीते कठो. २।१
हुतमन्नं समं नयति
(समुन्नयति मा. पा.) प्रश्नो. ३।५
हुतमहुतं दत्तमदत्तं सर्वमसर्वं
विश्वमविश्वं कृतमकृतं परमपरं
परायणं च त्वम् [अशिरः.३।१+ चतुर्वे. ८
हुताशनश्चापि हि सर्वभक्षः ...
हृ इत्येकमक्षरमभिहरन्ति...(मा.पा.) बृ. ह. ५।३।१
हृत्पद्मं वेदिकातत्रलिङ्गमोङ्कारमिष्यते शिवो. १।२४
हृत्पद्मकर्णिकामध्ये स्थिरदीप-
निभाकृतिम् । अङ्गुष्ठमात्र-
मचलं ध्यायेदोङ्कारमीश्वरम् ध्या. बिं. १९
हृत्पद्ममध्ये सर्वं यत्तत्प्रज्ञाने
प्रतिष्ठितम् आ. प्र. १
हृत्पुण्डरीकमध्यस्थं चैतन्यज्योति-
रव्ययम् त्रि. ब्रा. २।१५६
हृत्पुण्डरीकमध्यस्थां प्रातःसूर्यसम-
प्रभाम् । पाशाङ्कुशधरां सौम्यां
वरदाभयहस्तकाम् ॥ त्रिनेत्रां
रक्तवसनां भक्तकामदुघां भजे १ देव्यु. १८

हृत्पुण्डरीकमध्ये तु भावयेत्परमे-
श्वरम् । साक्षिणं बुद्धिवृत्तस्य
परमप्रेमगोचरम् मैत्रे. १।१३
हृत्पुण्डरीकं विरजं विशुद्धं
विचिन्त्य मध्ये विशदं विशोकम् कैव. ६
हृत्स्थं ज्ञानासिनाऽऽत्मनः भ. गी. ४।४२
हृदयग्रन्थिरस्तित्वे छिद्यते ब्रह्म-
चक्रकम् । संशये समनुप्राप्ते
ब्रह्मनिश्चयमाश्रयेत् ते. बिं. ६।१०१
हृदयग्रन्थिहीनोऽस्मि हृदया-
म्भोजमध्यगः मैत्रे. ३।१७
हृदयज्ञं चाहृदयज्ञं च यद्वै
वाङ्नाभविष्यन्न धर्मो नाधर्मो
व्यज्ञापयिष्यत् छांदो. ७।२।१
हृदयज्ञं चाहृदयज्ञं चान्नं च रसं
चेमं च लोकममुं च विज्ञाने-
नैव विजानाति छांदो. ७।७।१
हृदयमेव सम्राडिति होवाच बृह. ४।१।७
हृदयमेवान्ववक्रामति बृह. ४।४।१
हृदयमेवायतनमाकाशः प्रतिष्ठा बृह. ४।१।७
हृदयस्त्वं भूतभव्यः पुराणो ह्येको
वीरो वेदगुणैकवेद्यः २ रुद्रो. ६०
हृदयस्य दश छिद्राणि भवन्ति
येषु प्राणाः प्रतिष्ठिताः सुबालो. ४।१
हृदयस्य मध्ये लोहितं मांसपिण्डं,
यस्मिंस्तद्दहरं पुण्डरीकं कुमुद-
मिवानेकधा विकसितं सुबालो. ४।१
हृदयस्य रेतो मनः १ ऐत. १।३।१
हृदयं कुण्डली भस्म रुद्राक्ष-
गणदर्शनम् मुक्तिको. १।३७
हृदयं न हि सत्यं जानाति हृदये
ह्येव सत्यं प्रतिष्ठितं भवति बृह. ३।९।२३
हृदयं निरभिद्यत २ ऐत. १।४
हृदयं निर्मलं कृत्वा चिन्तयित्वा-
ऽप्यनामयम् । अहमेव परं
सर्वमिति पश्येत्परं सुखम् पैङ्गलो. ४।९
हृदयं यूपः (यज्ञस्य) महाना. १८।१
हृदयं वै ब्रह्मेति बृह. ४।१।७
हृदयं ब्रह्मेत्याक्षणेयः १ ऐत. १।४।१

हृदयं विश्वमस्य मुण्ड. २।१।४
हृदयं वै सम्राट् परमं ब्रह्म नैनं॰
हृदयं जहाति बृ. उ. ४।१।७
हृदयं वै सम्राट् सर्वेषां भूताना-
मायतनम् बृह. ४।१।७
हृदयं वै सम्राट् सर्वेषांभूतानांप्रतिष्ठा बृह. ४।१।७
हृदयं ह्यष्टकपालानि निरुक्तो. २।१
हृदयाकाशे महोज्ज्वलाज्ञानरूपा भवति शांडि. १।४।५
हृदयात्सम्परित्यज्य सर्ववासन-
पङ्क्तयः । यस्तिष्ठति गतव्यग्रः
स मुक्तः परमेश्वरः महो. ६।८
हृदयात्सर्वमिदं जायते सुबालो. १।९
हृदयादायता तावच्चक्षुष्यस्मिन्
प्रतिष्ठिता । सारणी सा तयो-
र्नाडी द्वयोरेका द्विधा सती मैत्रा. ७।११
हृदयादिकण्ठपर्यन्तं सस्वनं
नासाभ्यां शनैः पवनमाकृष्य
यथाशक्तिः कुम्भयित्वा इडया
विरेच्य गच्छंस्तिष्ठन्कुर्यात् । तेन
श्लेष्महरं जठराग्निवर्धनं भवति शांडि. १।७।१४
हृदयादिव सृप्तो हृदयादिव निर्मित
इति हृदये ह्येव रेतः प्रतिष्ठितं
भवति बृह. ३।९।२२
हृदयाद्धृदयं मृत्योः चित्यु. १५।२
हृदयानि व्यदारयत् भ. गी. १।१९
हृदयान्मनः (निरभिद्यत) २ ऐत. १।४
हृदयाम्बुरुहासीनं ध्यायेद्वा
विष्णुरूपिणम् त्रि. ब्रा. १५३
हृदयेन हि रूपाणि जानाति बृह. ३।९।२०
हृदयेन हि श्रद्धां जानाति हृदये
ह्येव श्रद्धा प्रतिष्ठिता भवति बृह. ३।९।२१
हृदयेनात्तसर्वेहो मुक्त एवोत्तमाशयः मुक्तिको. २।१९
हृदये व्यज्यते घोषो गर्जत्पर्जन्य-
सन्निभः । तत्र स्थिता सुरेशान
मध्यमेत्यभिधीयते यो. शि. ३।४
हृदये ह्येव रूपाणि प्रतिष्ठितानि
भवन्ति बृह. ३।९।२०
हृदये ह्येव रेतः प्रतिष्ठितम् बृह. ३।९।२२
९०

हृदये ह्येव श्रद्धा प्रतिष्ठिता भवति बृह. ३।९।२१
हृदये ह्येव सत्यं प्रतिष्ठितं भवति बृह. ३।९।२३
हृदये ह्येव सम्राट् सर्वाणि भूतानि
प्रतिष्ठितानि भवन्ति बृह. ४।१।७
हृदयोर्ध्वभागे चित्तसंयमात्
महर्लोकज्ञानम् शांडि. १।७।५२
हृदाकाशे चिदादित्यः सदा भासति
भासति । नास्तमेति न चोदेति
कथं सन्ध्यामुपास्महे मैत्रे. २।१४
हृदा पश्यन्ति मनसा मनीषिणः चित्यु. ११।११
हृदा मनीषा मनसाऽभिक्लृप्ता ये तां
विदुरमृतास्ते भवन्ति गुह्यका. ६०
हृदा मनीषा मनसाऽभिक्लृप्तां य एनां
विदुरमृतास्ते भवन्ति गुह्यका. ६३
हृदा मनीषी मनसाऽभिक्लृप्तो य
(एवं एनं-विदुः) एतद्विदु-
रमृतास्ते भवन्ति [कठो.६।९+ श्वेताश्व. ४।१३
+४।१७+ म. ना. १।११+ त्रि. म.ना. ६।४
हृदासन-नाभि-कण्ठ-सर्वाङ्गानि
स्थानानि पैङ्गलो. २।३
हृदा हृदिस्थं मनसा य एनमेवं
विदुरमृतास्ते भवन्ति श्वेताश्व. ४।२०
हृदि चित्तस्य संयमात्स्वर्लोकज्ञानम् शांडि. १।७।५२
हृदि दक्षिणाग्निः (शारीरयज्ञस्य) गर्भो. ११
हृदि प्रतीष्या कवयो मनीषेति
उपैन... [बृ. जा. १।२+ नृ. पू. १।१
हृदिस्था देवताः सर्वा हृदि प्राणाः
प्रतिष्ठिताः । हृदि प्राणः स्थितो
नित्यमपानो गुदमण्डले यो. चू. २१
हृदिस्था देवताः सर्वा हृदि प्राणे
प्रतिष्ठिताः । हृदयं पुरुषोऽस्मि
त्वं तिस्रो मात्राः परश्च सः २ ब्रह्मो. ५४
हृदिस्था देवताः सर्वा हृदि
प्राणाः प्रतिष्ठिताः । हृदि
प्राणाश्च ज्योतिश्च त्रिवृत्सूत्रं
च तद्विदुरिति ब्रह्मो. ४
हृदि सर्वस्य धिष्ठितम् भ. गी. १३।१८

हृदिस्था देवताः सर्वा हृदि प्राणाः
प्रतिष्ठिताः । हृदि त्वमसि
यो नित्यं तिस्रो मात्राः परस्तु
सः [अ. शिरः. ३।४+ — बटुको. १८

हृदिस्थाने अष्टदलपद्मं वर्तते — ध्या. बिं. ६४

हृदि स्थाने स्थितं पद्मं तस्य
वक्त्रमधोमुखम् — १ यो. त. १३७

हृदिस्थाने स्थितं पद्मं तच्च पद्म-
मधोमुखम् । ऊर्ध्वनालमधो
बिन्दुस्तस्य मध्ये स्थितं मनः — २ योगत. ९

हृदि ह्येष आत्मा । अत्रैतदेकशतं
नाडीनां — प्रश्नो. ३।६

हृदीन्द्रियाणि मनसा सन्निरुध्य
ब्रह्मोडुपेन प्रतरेत विद्वान् — श्वेताश्व. २।८

हृद्देशेऽर्जुन तिष्ठति — भ. गी. १८।६१

हृद्द्वारं वायुद्वारं च मूर्ध्नि द्वारमथा-
परम् । मोक्षद्वारं बिलं चैव
सुषिरं मण्डलं विदुः — अ. ना. २७

हृद्यन्तःकरणं ज्ञेयं शिवस्यायतनं
परम् । हृत्पद्मं वेदिका तत्र
लिङ्गमोङ्कारमिष्यते — शिवो. १।२४

हृद्याकाशमयं कोशमानन्दं परमा-
लयम् । स्वं योगश्च ततोऽस्माकं
तेजश्चैवाग्निसूर्ययोः — मैत्रा. ६।२७

हृद्याकाशस्तेजोमयोऽमृतमयः
पुरुषोऽयमेव सः योऽयमात्मेद-
ममृतमिदं ब्रह्मेद१ सर्वम् — बृह. २।५।१०

हृद्याकाशे परे कोशे दिव्योऽय-
मात्मा स्वपिति । यत्र सुप्तो
न कञ्चन कामं कामयते
न कञ्चन स्वप्नं पश्यति — सुबालो. ४।४

हृद्यादित्यमरीचीनां पदं षण्णवतिः — पा. ब्र. ४

हृद्येव तिष्ठ कलनारहितः क्रियां तु
कुर्वन्नकर्तृपदमेत्य शमोदितश्रीः — अ. पू. ४।९१

हृद्रोगं मम सूर्य हरिमाणं च
नाशय [सूर्यता. २।१+ — ऋ.मं. १।५०।११

हृ इत्येकमक्षरमभिहरन्त्यस्मै
स्वाश्चान्ये च य एवं वेद — बृह. ५।३।१

हृषीकेशं तदा वाक्यं — भ. गी. १।२१

हृष्टरोमा धनञ्जयः — भ. गी. ११।१४

हृष्यामि च पुनः पुनः — भ. गी. १८।७७

हृष्यामि च मुहुर्मुहुः — भ. गी. १८।७६

हे कृष्ण हे यादव हे सखेति — भ. गी. ११।४१

हेतुद्वयं हि चित्तस्य वासना च
समीरणः । तयोर्विनष्ट एकस्मिं-
स्तद्द्वावपि विनश्यति — योगकुं. १।१

हेतुनाऽनेन कौन्तेय — भ. गी. ९।१०

हेतुमद्भिर्विनिश्चितैः — भ. गी. १३।५

हेतुर्न जायतेऽनादेः फलं चापि
स्वभावतः । आदिर्न विद्यते
यस्य तस्य ह्यादिर्न विद्यते — अ. शां. २३

हेतुस्तु सुखदुःखस्य योगो दृष्ट
श्चतुर्विधः — आयुर्वे. २

हेतुः प्रकृतिरुच्यते — भ. गी. १३।२१

हेतोरादिः फलं येषामादिर्हेतुः
फलस्य च । हेतोः फलस्य
चानादिः कथं तैरुपवर्ण्यते — अ. शां. १४

हेतोरादिः फलं येषामादिर्हेतुः
फलस्य च । तथा जन्म भवेत्तेषां
पुत्राज्जन्म पितुर्यथा — अ. शां. १५

हेतोः किं नु महीकृते — भ. गी. १।३५

हेमप्रख्यामिन्दुखण्डान्तमौलिं
शङ्खारिष्टाभीतिहस्तां त्रिने-
त्राम् । हेमाब्जस्थां पीतवस्त्रां
प्रसन्नां देवीं दुर्गां दिव्यरूपां
नमामि — वनदु. २

(अथ ह) हेममासन्यं प्राण-
मूचुस्त्वं न उद्गायेति, तथेति ।
तेभ्य एष प्राण उदगायत — बृह. १।३।७

हेमाभया द्विभुजया सर्वालङ्कृतया
चिता । श्लिष्टः कमलधारिण्या
पुष्टः कोसलजात्मजः — रा. पू. ४।९

हेरम्बतत्त्वे परमात्मसारे नो वै
योगान्नैव तपोबलेन । नैवायुध-
प्रभावतो महेशि दग्धं पुरा
त्रिपुरं दैवयोगात् — हेरम्बो. ३

हैरण्यो गोपवेषमभ्राभं
कल्पद्रुमाश्रितम् गो. पू. १।५
होता ऋग्भूय साममयमुद्गाता.. कौ. त. २।६
होता भोक्ता हविर्मन्त्रो यज्ञो विष्णुः
प्रजापतिः। सर्वः कश्चित्प्रभुः
साक्षी योऽमुष्मिन्भाति मण्डले मैत्रा. ६।१६
होतृषदनाद्धैवापि दुरुद्गीथ-
मनुसमाहरति छांदो. १।५।५
होत्रर्त्विजाऽग्निना वाचा, वाग्वै यज्ञस्य
होता, तद्येयं वाक्सोऽयमग्निः स
होता स मुक्तिः साऽतिमुक्तिः बृह. ३।१।३
होमशेषं तु निर्वृत्य पूर्णपात्रोदकं
तथा। पूर्णमसीति यजुषा
जलेनान्येन बृंहयेत् बृ. जा. ३।१७
ह्रस्वो दहति पापानि दीर्घः सम्पत्प्रदो
ऽव्ययः। अर्धमात्रा समायुक्तः
प्रणवो मोक्षदायकः ध्या. बिं. १७
(तस्य) ह्रादुनयो विस्फुलिङ्गाः
[छां. उ. ५।५।१× बृह. ६।२।१०
ह्रियते ह्यवशोऽपि सः भ. गी. ६।४४
ह्रिया देयम्। भिया देयम्।
संविदा देयम् तैत्ति. १।११।३
ह्रीर्नाम वेदलौकिकमार्गकुत्सित-
कर्मणि लज्जा शांडि. १।२।१
(श्री-) ह्रीश्च ते लक्ष्मीश्च पत्न्यौ।
अहोरात्रे पार्श्वे। नक्षत्राणि
रूपम्। अश्विनौ व्यात्तम त्रिसु. १३।२
[+वा. सं. ३१।२२+ तै. आ. ३।१३।२
ह्रीं आनो दिवो बृहतः पर्वतादा
सरस्वती यजतागन्तु यज्ञम् सरस्व. ८
ह्रीं पद्मावत्यन्नपूर्णे माहेश्वरी स्वाहा त्रि. म. ना. ७।९
ह्रौं (ह्सौं) हयग्रीवाय नमो
ह्रौं (ह्सौम्) त्रि. म. ना. ७।९
ह्वयामि वां ब्रह्मणा तूर्तमेतम् त्रिसु. १४।२

अयं कोश आमोददैः पूर्णगात्रो मनोहारिसिद्धान्तवाक्यैः श्रुतीनाम्।
ददात्वात्मतोषं विपश्चिद्वरेभ्यो यथा हेमकुम्भोऽमरेभ्योऽमृतासः॥

इत्युपनिषद्वाक्यमहाकोशस्योत्तरार्धः समाप्तः।

*परिशिष्टम् ।

—:०:—

ॐ

ॐकार ज्वलद्रूपं मन्मस्तकम् — २ तारो. १
ॐ क्रतो स्मर कृतं स्मर — ईशा. १७
ॐ खं ब्रह्म खं पुराणं वायुरं खमिति — बृह. ५।१।१
ॐ चत्वारिंशत्संस्कारसम्पन्नः सर्वतो विरक्तः...साधन-चतुष्टयसम्पन्न एव सन्न्यस्तुमर्हति — १ सं. सो. २।१
ॐ जाग्रत्स्वप्नसुषुप्तितुरीय-तुरीयातीतोऽन्तर्यामी — गोपालो. ३।१८
ॐ जानश्रुतिर्ह पौत्रायणः श्रद्धा-देयो बहुदायी बहुपाक्य आस — छांदो. ४।१।१
ॐ तत्सद्ब्रह्मतद्रूपं प्रकृतिपरं गगनाभं — २ तारो. १
ॐ तत्सद्भूर्भुवः सुवस्तस्मै प्राणात्मने नमो नमः — गोपालो. ३।२
ॐ वयः सुपर्णा उपसेदुरिन्द्रं प्रिय-मेधा ऋषयो नाधमानाः — म. ना. १६।७
[चाक्षुषो. ५+ ऋ. मं. — १०।७३।११
[+ साम.१।३।१९+ — तै.आ. ४।४२।३
ॐ देवा ह वै सत्यं लोकमायन् — नृ. षट्च. १
ॐ नमो विश्वरूपाय विश्व-स्थित्यन्तहेतवे — गो. पू. ४।४
ॐ नमोऽस्तु शर्व शम्भो त्रिनेत्र चारुगात्र — २ शिवो. १
ॐ नित्यं शुद्धं बुद्धं निर्विकल्पं निराख्यातमनादिनिधनमेकं ...सर्वदाऽनवच्छिन्नं परं ब्रह्म — यो. चू. ७२
ॐ नृसिंहाय विद्महे वज्रनखाय धीमहि । तन्नः सिंहः प्रचोदयात् — नृ. पू. ४।३
ॐ परोरजसे सावदोम् — त्रि.म.ना. ७।११
ॐ पृथिवी वाग्नमापोऽन्नादाः — सुबालो. १४।१
ॐ भूमिरन्तरिक्षं द्यौरित्यष्टा-क्षराणि [बृ. ५।१४।१+ — गायत्र्यु. १
ॐ भूर्भुवः सुवरिति व्याहृतयः — २ प्रणवो. १८
ॐ योऽसाविन्द्रियात्मा गोपाल ॐ तत्सत् भूर्भुवः सुवस्तस्मै वै नमो नमः — गोपालो. ३।१३
ॐ योऽसावुत्तमपुरुषो गोपाल ॐ तत्सत् — गोपालो. ३।१५
ॐ योऽसौ प्रधानात्मा गोपाल ॐ तत्सत् — गोपालो. ३।१२
ॐ योऽसौ ब्रह्म परं वै ब्रह्म ॐ तत्सत् — गोपालो. ३।१६
ॐ योऽसौ भूतात्मा गोपाल ॐ तत्सत् — गोपालो. ३।१४
ॐ योऽसौ सर्वभूतात्मा गोपाल ॐ तत्सत् — गोपालो. ३।१७
ॐ यो ह वै श्रीवेङ्कटेश्वरो देवो भगवा-न्भूर्भुवः सुवस्तस्मै वै नमो नमः — व्यङ्कटेशो. ३
ॐ यो ह वै श्रीवेङ्कटेश्वरो देवो भगवान्यश्च ब्रह्मा तस्मै वै नमो नमः — व्यङ्कटेशो. ३
ॅ वृषादर्विकुलॅ ह वै शिविकुलं बभूव — इतिहा. १
ॐ श्रीगुरुः सर्वकारणभूता शक्तिः — भावनो. २

---

* पश्चादुपलभ्यमानान्युपनिषदां वाक्यानि पूर्वापरोत्तरार्धयोश्चानवधानतया गलितानि वाक्यान्यस्मिन्परिशिष्टे सन्निवेशिता-नीति विदाङ्कुर्वन्तु विपश्चितः ।

अकार उकारमध्ये ब्रह्म परिपूर्णं अद्वैतो. ५
अग्रावाज्यस्य हुत्वा मन्थे सम्पातमवनयेत् छांदो. ५।२।४
अग्राह्यः सर्वभूतेषु सर्वेन्द्रिय-गुणातिगः २ रुद्रो. ४५
अग्र्यश्च धाम्नां त्वमेव ऋग्भिः सुभाण्ड इज्योऽसि विष्णू. ५
अज त्वन्नाभौ जगदेतद्विचित्रं मध्ये-ऽर्पितं यस्मिन्विश्वं भुवनं च त्वमेव २ रुद्रो. ७
अजस्त्वेको जुषमाणोऽनुशेते जहा-त्येनां भुक्तभोगामजस्त्वम् २ रुद्रो. ४७
अजां मायां लोहितशुक्लकृष्णां बह्वीःप्रजाःजनयन्तीं सरूपाम् २ रुद्रो. ४७
अजो नित्यः शाश्वतश्च निर्गुणो निष्कलस्तथा ना. म. १२
अणोरणीयान्महतो महीयानात्मा गुहायां निहितोऽस्य जन्तोः वे. सारो. २४
अतिरात्राग्निहोत्रभस्मनाग्नेर्भसित-मिदं...प्रणवेनोद्धूलनं कुर्यात् वासु. १६
अत्याश्रमस्थाः परिमुच्यन्ति धीरा-स्तेषां सुखं शाश्वतं नेतरेषाम् वे. सारो. ३
अत्याश्रमस्थो हि हिरण्यगर्भः वे. सारो. ५
अथ परमात्मा नाम यथाक्षर-मुपासनीयः आत्मोप. ७
अथ येनैताः शिरा अनुव्याप्ता एष वाव स व्यानः मैत्रा. २।७
अथान्तरात्मा नाम पृथिव्याप... कर्मविशेषणं करोति आत्मोप. २
अद्वैतं कथितं येन पुरुषोऽमूढो भवति अद्वैतो. ५
अन्यत्तपन्तु हेतयो घोररूपा भक्तेषु त्वं शिवो भव शत्रूनस्माकं जहि.. २ रुद्रो. ६९
अदीनाः स्याम शरदः शतं भूयश्च शरदः शतात् [प्रवर्ग्यो. २४+ वा. सं. ३६।२४
अयमग्निर्वैश्वानरो योऽयमन्तः पुरुषः वे. पू. ३।७
अयमेव परा काष्ठा स ब्रह्म स शिवः स्वयम् २ देव्यु. ३५
अयं वाव खल्वस्य प्रतिनिधिः वे. पू. ४।८
अरजोऽयममृतो वै विशोकः २ देव्यु. २७
अवधूतानां परमहंसानां शीतोष्ण-सुखदुःखमानावमानसहनं बहु-जन्मान्तरेषु योगसिद्धानाम् भक्तियो. १
अवस्थातीतः पर आत्मा त्वमेव २ रुद्रो. ६६
अव्यक्तैकाक्षरं पूर्णा सूर्याख्य-ध्यात्मकुण्डिका मुक्तिको. १।२६
अस्मिन्मूर्तिश्चतुर्थी या साऽसृज-च्छेषमव्ययम् । स हि सङ्कर्षणः प्रोक्तः... अनिरुद्धात्तथा ब्रह्मा तन्नाभिकमलोद्भवः । ब्रह्मणः सर्वभूतानि चराणि स्थावराणि च ना. म. ६०
अहमेव वात इव प्रवाम्यारभमाणा भुवनानि विश्वा [२देव्यु.६+ऋ.मं. १०।१२५।८
अहमेव स्वयमिदं वदामि ज्ञानमैश्वरम् (देवी) २ देव्यु. ५
अहमेवाखिलाराध्या ह्यहं ध्येयाऽखिलैरपि (देवी) २ देव्यु. ३
अहं दधामि द्रविणं हविष्मते (सुप्राव्ये) सुवीर्याय सुन्वते [२ देव्यु. ७+ऋ. मं. १०।१२५।२
अहं विश्वं भुवनं चेतयामि २ देव्यु. ६
अहं विश्वेभि(रुद्रेभि-)र्वसुभि-श्चराम्यह-मादित्यैरुत विश्वदेवैः[२देव्यु.६+ऋ.मं. १०।१२५।१
अहं सर्वत्रगो ब्रह्मन् भूत-ग्रामान्तरात्मकः ना. म. ३७
अहं हयशिरा भूत्वा समुद्रे पश्चि-मोत्तरे । पिबामि सुहुतं हव्यं कव्यं च श्रद्धयाऽन्वितम् ना. म. ४९
अहं हि जीवसंज्ञातो मयि जीवः समाहितः ना. म. ३६
अहं हि पुरुषो ज्ञेयो निष्क्रियः पञ्चविंशकः । निर्गुणो निष्कल-श्चैव निर्द्वन्द्वो निष्परिग्रहः ना. म. ३२
अहानि शं भवतु नः शꣳ रात्रीः प्रतिधीयताम् [प्रवर्ग्यो. ११ वा. सं. ३६।११
आपो वा इदमासन् सलिलमेव वेङ्कटो. १
आपो हि ष्ठा मयोभुवः... [वा. सं. ३६।१४+ प्रवर्ग्यो. १४ ऋ. मं. १०।९।१

आर्जवं नाम मनोवाक्कायकर्मणां विहिताविहितेषु जनेषु... एकरूपत्वम् शांडि. १।१।३
आवहन्ती वितन्वाना कुर्वाणा चीरमात्मनः । वासांसि मम गावश्चान्नपाने च सर्वदा । तै.आ. ७।४।१
ततो मे श्रियमावह वे. सारो. ३१
आश्रमेष्वेवावस्थितस्तपस्वी मुच्यते वें. पू. ४।८
आह्लादिनी गरीयसीयमन्तरे भूत्वा राधा कृष्णेनाराधिता राधाकृष्णमाराधयत् राधिको. ४
इदं सार्वकामिकं मोक्षद्वारं यद्योगिन उपदिशन्ति वेङ्कटो. ३
इन्द्रो विश्वस्य राजति [प्रवर्ग्या. ८+ वा. सं. ३६।८
ईशानो भगवो भगवान् रुद्रो महादेवस्त्वमीश्वरः । परंब्रह्म परं धाम परः पारः परायणः २ रुद्रो. ५६
उभयात्मको विराट् प्रणवः ना. प. ८।१
उत्पन्न एव भवति शरीरं चेष्टयन् प्रभुः ना. म. २४
ऋचं वाचं प्रपद्ये [प्रवर्ग्या. १+ वा. सं. ३६।१
ऋचो अक्षरे परमे व्योमन् यस्मिन्देवा अधि विश्वे निषेदुः । यस्तं न वेद किमृचा करिष्यति.. वेङ्कटो. ३
ऋतं सत्यं नामरूपातिगत्वं २ रुद्रो. ६७
एकमेवाद्वितीयं यद्गुरोर्वाक्येन निश्चितम् । एतदेकान्तमित्युक्तं न मठो न वनान्तरम् मैत्रे. २।१५
एको रुद्रस्त्वं हि सर्वस्य कर्ता.. २ रुद्रो. ५१
एतत्खलु वाव सर्ववरिष्ठः श्रूयते उत्तमपुरुषः वें. पू. ३।५
एतत्त्वया न विज्ञेयं रूपवानिति दृश्यते । इच्छन्मुहूर्तान्मर्त्येय-मीशोऽहं जगतो गुरुः ना. म. ३४
एतदमृतमभयमेतत्परायणमेतद्ब्रह्मेति वें. पू. ३।२
एतद्रूपेवाक्षरं ब्रह्म वे. सारो. १९
एतद्विराटकं वपुः मङ्गलं सत्त्वं बिन्दुस्वरूपं महाकारस्वरूपं ज्योतिर्मयं विद्धि २ तारो. १
एनमात्मानं गूढमनुप्रविष्टं २ देव्यु. ८
एवं विदित्वा परमात्मलिङ्गमस्या-श्रमस्थाः परिमुच्यन्ति सर्वे वे. सारो. ४१
एवं स्थित्वा संसृतौ वर्तमानः संसारीव सुखदुःखादिभोक्ता । उन्मत्तमूकबधिरान्धवत्सदा विभाव्यमानो मूढधीभिर्विमुक्तः निर्लेपो. १३
एष आत्मा तपसाऽऽलोक-नीयो नान्यैर्धर्मैः.. २ देव्यु. १९
एष आत्माऽपहत पाप्मा विरजो विशोको विमृत्युरजिघृत्सो-ऽपिपासः २ देव्यु. २९
एष आदित्ये तपति तेजसेद्धः २ देव्यु. २८
एष एव हि भूतात्मा भूते भूते व्यवस्थितः २ देव्यु. १२
एष धाता विधाता च स्वराट् सम्राट् प्रजापतिः २ देव्यु. १०
एष दिव्यो देव एकः पुराणः २ देव्यु. ११
एष देवः शीर्यमाणैर्न शीर्णः २ देव्यु. २६
एष देवैर्वेदसङ्घैश्च विप्रैरभिष्टुतो-ऽप्रतर्क्यो ह्यतीन्द्रियैश्च २ देव्यु. २७
एष ब्रह्मैष एवेन्द्र एष सर्वं चराचरम् २ देव्यु. २५
एष भूतपतिरेव सेतुर्विधरणो... २ देव्यु. ९
एष सुप्तेषु जागर्ति भूतंभूतं.. २ देव्यु. ९
एषोऽनन्तश्चेष्टते देहजालैर्यथो-र्णनाभिः सृजते तन्तुजालम्.. २ देव्यु. २८
एषोऽनन्तो महिमाधार ईशो भूमा.. २ देव्यु. २४
एषोऽन्तरादित्ये ह्यमृतो दृश्यते हिरण्मयः पुरुषः शिवः २ देव्यु. १०
एषोऽन्तर्याम्यमृतः पुराणः सदा जनानां हृदये सन्निविष्टः २ देव्यु. ८
एषोऽशरीरो विश्वकर्ता गुणेशः २ देव्यु. २६
एषो हि देवः प्रदिशो नु सर्वाः पूर्वो हि जातः स उ गर्भे अन्तः । स एव जातः स जनिष्यमाणः प्रत्य-ङ्मुखस्तिष्ठति विश्वतोमुखः श्रुतिर. ४.
ओङ्कारः प्रणवो व्यापी ह्यनन्तो-ऽनन्तविक्रमः । तारं सूक्ष्मं वैद्युतस्त्वं शुक्लं सर्वशरीरगम् २ रुद्रो. ९५

लोकाध्यक्षत्वमेव च ॥ अहङ्कार-
कृतं चैव नाम पर्यायवाचकम् — ना.म. ४९–५१
महाग्रासस्त्वमेवेश मृत्युस्त्वदुपसेचनः — २ रुद्रो. ५२
मायां चाहं ह्येष मायी महेशः — २ देव्यु. १८
मायावी परमानन्दस्त्यक्त्वा
वैकुण्ठमुत्तमम् । स्वामि-
पुष्करिणीतीरे रमया सह मोदते — वें. पू. ५।२
माया ह्येषा मया सृष्टा यन्मां
पश्यसि नारद — ना. म. ३४
मायां तु प्रकृतिं विद्यान्मायिनं
तु महेश्वरम् — २ रुद्रो. ४८
मां प्रविश्य भवन्तीह मुक्ता
भक्तास्तु ये मम — ना. म. ३२
मोक्षोऽसि योगोऽसि सृजसि धाता
परमयज्ञोऽसि — विष्णू. ६
य इमं विश्वं भुवनं यासि जुह्वदृषिः.. — २ रुद्रो. ७०
य एनं विदुरमृतास्ते भवन्ति
अथेतरे दुःखमेवाविशन्ति — २ देव्यु. ३५
य एष एतस्मिन्मण्डले पुरुषो यश्चायं
दक्षिणेऽक्षन्पुरुषस्तावेतावन्यो-
न्यस्मिन्प्रतिष्ठितौ — बृह. ५।५।२
य एष सम्प्रसादोऽस्माच्छरीरात्समुत्थाय
परं ज्योतिरुपसम्पद्य स्वेन
रूपेणाभिनिष्पद्यत एष आत्मा — वें. पू. ३।३
य एषोऽव्यवष्टम्भेनेत्यूर्ध्वमुत्क्रान्तो
व्ययमानो व्ययनप्रीतस्तस्य तमः
प्रणुदत्येष आत्मा — वें. पू. ३।२
यतो वाचो निवर्तन्ते... आनन्दं
प्राप्नुवन्त्येते पुनरावृत्तिवर्जितम् — वे. सारो. ७
यथा बिम्बाद्विद्योद्भूतं बिम्बं तद्ना-
रायणाद्वेङ्कटेशः — वें. पू. ५।२
यथा लोहपिण्डस्त्वग्निसम्पर्काल्लोहमयो
लोहगतप्रहारादीननुभवतीति
तद्वदेवेन्द्रियभूतगुणैरयं
पुरुषोऽभिभूयत इव — वें. पू. ४।३
यदा चर्मवदाकाशं वेष्टयिष्यन्ति
मानवाः । एकदैवमकरश च... — वे. सारो. ४२
यदा तमस्तन्न दिवा न रात्रिर्न सन्न
चासच्छिव एव केवलः । तदक्षरं
तत्सवितुर्वरेण्यं प्रज्ञा च
तस्मात्प्रसृता पुराणी — श्रुतिर. २
यदा पश्यन्ति मनसा मनीषिणो ये
ब्रह्म मन्वान उपासते त्वाम् — २ रुद्रो. ७७
यदेतत्कर्णौ च पिधाय शृणोति च,
यदाक्रमिष्यन् भवति नैनं
घोषं तं शृणोति — वें. पू. ३।८
यद्भूतजालं निखिलं वै विसृष्टमेता-
दृशं त्वां न विदन्ति केचित्... — २ रुद्रो. ७४
यन्नारायणताराार्थसत्यज्ञानसुखा-
कृति । त्रिपान्नारायणाकारं
तद्ब्रह्मैवास्मि केवलम् — तारसा. शीर्षकं
यश्छन्दसामृषभो विश्वरूपः...
स मेन्द्रो मेधया स्पृणोति ।
अमृतस्य देवधारिणो भूयासम् — वे. सारो. २८
यस्मात्परं नापरमस्ति किञ्चिद्यस्मा-
न्नाणीयो न ज्यायोऽस्ति कश्चित् ।
वृक्ष इव स्तब्धो दिवि तिष्ठत्येक-
स्तेनेदं पूर्णं पुरुषेण सर्वम् — श्रुतिर. ७
यस्य त्रिपुण्ड्रं लसते ललाटे तत्र
त्रिलोके लसते च सत्यम् — चिदम्बरो. ८
यो देवानां प्रथमं पुरस्ताद्विश्वाधिको
रुद्रो महर्षिः — वे. सारो. ५४
यो देवानां प्रथमश्चोद्भवश्च
विश्वाधिको देवो महर्षिः ।
हिरण्यगर्भं जनयामास पूर्वं — श्रुतिर. ५
योनौ रेतः सिञ्चति यदर्वाचीन-
मेनो भ्रूणहत्यायास्तस्मान्मुच्यते — सहवै. १२
यो ह खलु वा वाशितामात्रः
प्रतिपुरुषं क्षेत्रज्ञः सङ्कल्पाध्यव-
सायाभिमानलिङ्गः प्रजापति-
र्विश्वोऽक्षरस्तेन चेतनेनेदं शरीरं
चेतनवत्प्रतिष्ठापितम् — वें. पू. ३।५
यो ह खलु वाव अशरीर इत्युक्तः
स भूतात्मा — वें. पू. ४।१
यो ह वै भगवानात्मा यथाऽन्तर्बहि-
र्व्याप्तः प्रसिद्धस्तथा स्वं रूपं
परमं द्वेधा चकार — वें. पू. ५।२

लीलामूर्ते रुद्रसंज्ञस्य शम्भोरक्ष्युत्पन्नो
बीजकोशो पुराणः । रुद्राक्षाख्यः
सर्वदेवर्षिजुष्टो यस्मिञ्जुष्टे
सर्वसंसारमुक्तिः चिदम्बरो. ७

लिङ्गं सत्यं निष्कलं ब्रह्मरूपं धार्यं
पूज्यं हृदये ज्योतिराद्यम् ।
सत्तामात्रं वाङ्मनोतीतमेतत्
पञ्चात्मकं भासते येन मुक्तः निर्लेपो. ३

विमुक्तो विशुद्धाद्वैतभावमाश्रित्य
न द्रष्टा नाद्रष्टा न श्रोता
नाश्रोता न वक्ता नावक्ता न
कर्ता नाकर्ता नाभिमानो
नानावमानः सोऽवधूतः भक्तियो. १

विश्वभूत विश्वं त्वमेव विश्वगोप्ताऽसि
पवित्रमसि विष्णू. ८

वेदा मद्वस्ताश्चन्द्रार्कानला मन्नेत्राः २ तारो. १

वेदपर्वतजालोत्थमन्त्रैः
कूर्मोऽयमेव हि २देव्यु. ३७

वेदशास्त्रपुराणानि पर्यवस्यन्ति
शङ्करे । तावत्तेषां समभ्यासो
यावत्तद्भक्तिसम्भवः चिदम्बरो. ११

वेदान्तसारसर्वस्वं यो जानाति स
ईश्वरः वे. सारो. ५९

व्यष्टिस्वरूपः प्रणवस्तदेतत्संसेवमानो
न पुनर्भवे स्यात् चिदम्बरो. ९

शकटमिवाचेतनमिदं शरीरं वैं. पू. ३।४

शब्दस्पर्शादयो ह्यर्था अनर्था इव ते.. वैं. पू. ४।६

शम्भुः साक्षाद्द्वयात्मा स एव
रहस्यमेतन्न विदन्ति लोकाः चिदम्बरो. १०

शरीरमिदं मैथुनादेवोद्भूतं... वैं. पू. ४।४

शरीरमेनत्कूटव छिदित्वा चिदम्बरं
नियमीशं विदित्वा । मृत्युं तीर्त्वा
सर्वपापं विहृत्य शिवे परब्रह्मणि
यो...तेजः चिदम्बरो. १२

शरीरं मे विचर्षणं जिह्वा मे मधु-
मत्तमा । कर्णाभ्यां भूरि विश्रुवम् वे. सारो. २९

शं न इन्द्रा पूषणा वाजसातौ
शमिन्द्रा सोमा सुविताय शं योः
[प्रवर्ग्या. ११+ वा. सं.३६।११ ऋ. मं.

शं नः कनिक्रदद्देवः पर्जन्यो प्रवर्ग्या. १०

शं नः कुरु प्रजाभ्योऽभयंनः पशुभ्यः प्रवर्ग्या. १२

शाश्वतश्च स्थिर ईशः स्वतन्त्रः
स्वमहिम्नि तिष्ठत्यनेनेदं शरीरं
चेतनवत्प्रतिष्ठापितम् वैं. पू. ३।५

शांतिरेव शांतिः सा मा शांतिरेधि प्रवर्ग्या. १७

शिवद्रोही शिवभक्तैर्विनिन्द्यः शिव-
प्रसादे च पराङ्मुखेन । दात्रोरस्त-
स्मिन्मद्मात्सर्यं एताभियुञ्जीत
भगवान्नीलकण्ठः निर्लेपो. १२

शिवध्याने शिवपूजाप्रसङ्गे
रुद्राक्षाणां धारणे भस्म धार्यम् निर्लेपो. ११

शिवः प्राणः शिवभक्तस्य सेवा
शिवप्रसङ्गे मतिरस्य सर्वदा ।
शिवप्रसादस्य धृतिर्निरन्तरं
शिवादन्यद्देवविचिन्तनं न भक्तियो. २

शिवे भक्तिर्जायते पुण्यलेशाद्भक्ति-
मूलं सर्वसंसारमुक्तेः चिदम्बरो. ५

शिवो हि कर्ता जगतामनादिर्नं
जानते यं श्रुतयोऽपि सम्यक् चिदम्बरो. २

स एव काले भुवनस्य मध्ये विश्वस्य
स्रष्टारमनेकरूपम् । विश्वस्यैकं
परिवेष्टितारं ज्ञात्वा शिवं
शांतिमत्यन्तमेति श्रुतिर. १०

स एव दहराकाशमादित्यरूपः
शरीरमित्थं रथीकृत्य स्वयं
रथिको भूत्वैवमेव पिण्डब्रह्माण्ड-
रथरथिको बभूव वैं. पू. ३।१०

स एष पञ्चधात्मानं विभज्य निहितो
गुहायां मनोमयोऽशरीरो
भारूपः सत्यसङ्कल्प आत्मा
दिव्यशरीरः श्रीवेङ्कटेश इति वैं. पू. ३।८

स एष शुद्धः पूतः शान्तो प्राणो-
ऽनिशमात्मा नो ह्येयः वैं. पू. ३।९

स ओङ्कारो महादेवः स विष्णुः स
च तारकः । नातः परं जगन्नाति
यस्य भासा निरन्तरम् चिदम्बरो. ११

स जीवः परिसंख्यातः शेषः सङ्कर्षणः प्रभुः	ना. म. २५
सदानन्दं परमानन्दं...परमपदं वेङ्कटेशाख्यं वैष्णवं यद्गत्वा न निवर्तन्ते योगिनः	वेङ्कटो. ५
स प्रजापतिरेकः पुष्करपर्णे समभवद्भगवतोऽस्यान्तर्मनसि कामः समवर्तत इदं सृजेयमिति	वेङ्कटो. १
समग्रीवशिरःकायः संवृतास्यः सुनिश्चलः	वराहो. ५।३२
स यः सायं प्राश्नीयात्सोऽस्य सायं होमः	कठश्रु. २१
सर्वमोङ्कार एव [माण्डू. १+	नृ. पू.२।२+४।२
[+नृसिंहो. १।२+	रामो. २।१
सर्वाननशिरोग्रीवः सर्वभूतगुहाशयः	श्रुतिर. ८
स वा एष आत्मेहात्मनिवसितानि तैः कर्मफलैः परिभूयमान इव शरीरे वा विचरति	वैं. पू. ३।११
स वा एष शुद्धः स्थिरो चलसालेपोऽव्यग्रो प्रेक्षकवदवस्थितः	वैं. पू. ३।१२
स वा एषोऽभिभूतः परकृतैर्गुणैरित्यंशाभिभूतत्वात्सम्मूढः प्रयातः सम्मूढत्वाद्वात्मानं प्रभुं भगवन्तं कारयितारं नापश्यत्	वैं. पू. ४।२
स वा एषोऽस्य हृदन्तरे तिष्ठन्नकृतार्थो मन्यते	वैं. पू. ३।९
स वा योऽयं हृद्यन्तःपुरुषो भगवान् वेङ्कटेशः रीयो वासुदेवात्मा	वैं. पू. ३।१०
स विश्वकृद्विश्वविदात्मयोनिर्यः..	निर्लेपो. १२
स सोमः स सत्यं स विष्णुः स रुद्रः स देवः स सर्वम्	वेङ्कटो. ५
सहस्रबाहो सहस्रमूर्ते सहस्रास्य सहस्रसम्भव विश्वं त्वामाहुः	विष्णू. १
सहस्रशीर्षा पुरुषः सहस्राक्षः...	श्रुतिर. ९
सुमित्रिया न आप ओषधयः सन्तु	प्रवर्ग्या. २३
सोऽहं ममेदमित्येवं मन्यमानो निबद्धो ह्यात्मनाऽऽत्मानं जानन्नेव खचरः कृतस्वानुचरैः पञ्चैरभिभूयमानः परिभ्रमति	वैं. पू. ४।२
स्वधर्म एव सर्वं धत्ते	वैं. पू. ४।८
स्थविर हिरण्यगर्भ नारायण... स्वयम्भूर्भूतादिर्महाभूतोऽसि	विष्णू. ७

इति परिशिष्टं समाप्तम् ।